
कविकुलगुरु - कालिदास - संस्कृत - विश्वविद्यालयः

Accession No:- ~~3116~~ M 1244.

Title:- ~~न्यायग्रन्थ~~ (Title etc. could not be traced)

~~(न्याय परिष्कारः (?))~~ तत्त्वनिर्णय विजय

Subject:- न्याय (नव्य).

पत्र :- 113.

५ (=स्वव्यक्तिनिरूपाभावसमानाधिकरणनिरूप्यतावच्छेदकत्वमवच्छेदकावच्छेदेन स्मारकसंबंधः =) ५ पेक्षानर्हत्वं =१२ (=एतस्य सद्धेतुसाधारण्येपि स्मारकसंबंधातिप्रसंगदोष वेतिभावः =) २

॥ श्रीगणेशाय नमः ॥ श्रीगुरुभ्यो नमः ॥ तत्त्वनिर्णयविजयप्रयोजकत्वादिति मूले पंचम्यर्थस्य तत्त्वानजन्यजिज्ञासाधीनत्वस्य निरूपणेऽन्वयादेव संगतिप्रदर्शन
सिद्धौ तत्सप्रसंगादिति पूरणमनुचितमित्याशंकां परिहरति हेत्वाभासेति । प्रसंगस्यापीति । स्मृतत्वे सत्युपेक्षानर्हत्वं चकारार्थः हेत्वाभासत्वस्यापास्यर्थः । विरोधीति
तद्ग्रहप्रतिबंधकग्रहविषये सत्यर्थः वस्तुतस्तु तदसमानाधिकरणे सत्यर्थः तद्ग्रहेति एतावता स्वव्यक्तिनिरूपाभाववत्त्वं स्मारकसंबंधघटकः दीधितावपि सपरिकरमिति तदाभा
सेऽसाध्यात्तस्यैव सूचनात् । व्याप्तिपक्षधर्मते इति । यथा चैवं सत्साकीर्णबाधितादेः कथं स्मृतित्वं तथाविधनिरूप्यतावच्छेदकसामानाधिकरण्येन स्मारकसंबंधघ
स्य तदवच्छेदेन निरूपणोपयिकत्वाज्ञोसंगतिः अत एव तद्विरहवत्त्वाद्दुष्टहेतोः स्मरणादिति भट्टाचार्येणापि पुनर्दुष्टपदं लिखितं । यद्वा पक्षः साध्याविशिष्टत्वेन विशेष्यः
तेनाबाधितत्वानुपादानेप्यसंकीर्णबाधितस्य दुष्टत्वेन निरूप्यत्वं तत्र हेत्वाभासे सत्त्वात् तत्सद्धेतुस्मृ[illegible]हेतुपरामर्शत्वं च संगच्छते । यद्युभयरूपवतोः संबंधो गृहीतः तद्रूपाव
च्छिन्ने कतानात् तद्रूपावच्छिन्नापरस्मरणं यथा चैत्रत्वेन हस्तिपकेऽभद्रत्वेन हस्तिनः संबंधग्रहे मनुष्यत्वेन तत्स्मरणा[illegible]जत्वेन हस्तिस्मरणवारणाय संबंधि
तावच्छेदकरूपयोर्निवेशः एवं च सद्धेतुदुष्टसंबंधीति ज्ञानादेव दुष्टत्वेन स्मृतिसंभवात् तस्यापि निरूप्यतावच्छेदकत्वमक्षुण्णं । ननु सपरिकरहेतुप्रसंगादिसेवास्तु
किं निरूप्येऽसंतेनेस्सत आह निरूप्येति । पूर्वकालीनत्वं [illegible]र्थः तथा च व्याप्त्यादिविशिष्टे हेतुनिरूपणेन तद्दूष्यहेतुनिरूपणाकांक्षाजनकत्वं स प्रतियोगित्वलाभेन संबं
धिज्ञानादिरूपसामग्रीलाभादिति भावः उक्तक्रमेणेति सद्धेतुनिरूपणानंतरं [illegible] व्याप्त्यादिस्वनिष्ठव्याप्तिपक्षधर्मतादिविरोधितद्विरहवत्तो हेत्वाभासा इति ज्ञानं जायते
अनंतरं च तेषामेव हेत्वाभासानामिति स्मरणं तत्स्वीकारो हेत्वाभासस्य प्रसंगपदार्थः तल्लक्षणं तूपेक्षानर्हत्वादि पंचकमितीत्वेसति अनंतराभिधानप्रयोजकजिज्ञासाजनकस्म

3116

१

न ३ … रानु २

रणप्रकारत्वमिति॰ न च प्रसंगपूरे नैवस्य तत्वलाभसंभवे निरूप्ये सति व्यर्थमेवेति वाच्यं॰ तेन तादृशनिरूपणस्य सिद्धत्वात्याऽवसरत्वा
भात्॰ एतेन यत्किंचिदेकसंगत्यपेक्षायां प्रसंगपूरणं व्यर्थं यावत्तद्रूपेक्षायामवस[illegible] तदूर्नितत्वं पास्तं॰ तथा च शोधिताभेतावतापर्वंधेनावयवातेन
तिर यथेनूतृतीयार्थोऽभेदः धात्वर्थैधनवाणिनत् निरूपणे तदन्वयः हेतुलिंगं विषयित्वं द्वितीयार्थः निरूपे सत्र प्रतिपत्त्यनुकूल व्यापारो निरूपणतदेकदेशे
प्रतिपत्तौ द्वितीयार्थान्वयः ल्यप्प्रत्ययार्थ आनंतर्यं॰ तच्च ध्वंसाधिकरणक्षणवृत्तित्वं तस्य तदाभासनिरूपणमित्यत्र सानानुकूलव्यापाररूपेनि
रूपणपदार्थेऽन्वयः अत्रैव पंचमीद्वया[illegible]र्थान्वयोन्वयश्चास्य निरूपणमित्यत्रैतत [illegible] दर्शितः तदाभासेतित्त सूदेन हेतुमात्रपरा
मर्शः ननु सपरिकरहेतोः तद्दोषाणामप्रसिद्धत्वात्॰ अतएव सपरिकरहेतुमित्यसमासेन लिखनेन हेतुश्च[illegible] पंचम्यन्तार्थः हेतुसदृशो वा तत्स
दर्थः पूर्वक्त्वे च मौल्लेत्याभासपदहेतुरूपाभास इति वोध्यं निरूपणपदोत्तरद्वितीयाया विषयित्वमर्थः प्रतिपूर्वकजानातेरुत्तरका
लीनवृत्तिविषयत्वे प्रकारकत्वानानुकूलव्यापारोऽर्थः वर्तमानत्वमाख्यातार्थः निरूपणस्य निरूपितत्वसंबंधेन द्वितीयार्थेऽन्वयः द्वि
तीयार्थनिरूपितायाश्चोत्तरव्यापाररूपधात्वर्थैकदेशे ज्ञानेऽन्वयः व्यापारस्य जनकतासंबंधेनैव अथशब्दोप्यहेत्वाभासादितिमौलवाक्य
परः इतिशब्दः स्वरूपार्थकः अथपदार्थस्येति पदार्थे तस्य च व्यापारेऽभेदसंबंधेनान्वयः तथा चावयवोत्तरं यथाभिन्नायः सपरिक
रहेतुसानानुकूलव्यापारस्तदुत्तरकालीनं पेक्षं सपरिकरहेतुनिरूपितत्वसंगसंगतिसानजन्यापेक्षितासाप्रयोज्यं तत्वौ निर्णयादित

त्वावन्वयः तत्रैव वचनमीमानतान्वयः तदभानवान्तत्वमाणिकार आश्रयतासंबंधेन ३

(प्रतिभासेवात्रलिंगकरणतापक्षः समीचीनः) दरकज्ञानानुकूलव्यापाः

पतत्कार्यकारित्वज्ञानजन्यजिज्ञासाप्रयोज्यं च यत्तदाभासनिरूपणमनुमितिकारणीभूताभावेसादिज्ञाव्याप्यकं तद्विरोध्यकाव्यवहितोत्तरकालकर्त्तव्यताप्रकारो [illegible] थ हेत्वाभा
ससादिज्ञाव्याप्यकस्तदनुकूलकृतिमान् मणिकार इति बोधः द्वितीयायाः विषयतार्थ इति मते तद्विरोध्यकत्वं तं निष्ठविरोध्यतानिरूपकत्वं बोध्यं अवयवांतग्रंथाभिन्नत्वं सद्धेतुनि
रूपणस्य कथमिति चेदित्थं मूले ऽनुमितिकरणमनुमानमिति ग्रंथेनानुमानलक्षणप्रकारकज्ञानानुकूलव्यापारो दर्शितः तत्र लिंगपरामर्श इति स्वरूपनिरूपणं अप्र
माणसाधर्म्यादिना प्रामाण्यनिरूपणं न च लक्षणस्वरूपप्रामाण्यप्रकारकज्ञानानुकूलव्यापारोऽयं निरूपणं तच्चेदमनुमानस्य वेति वाच्यं सपरीकरहेत्वाभासेनानुमानस्ये
वोपोद्धानात् स्वविषयरूपाभाववत्त्वस्यैव तत्प्रतिबंधकग्रहविषयत्वस्वरूपतद्विरोधित्वस्य वो स्मारकसंबंधत्वसंभवात् व्याप्तिपक्षधर्मताविशिष्टहेतुप्रतिपत्त्यनुकूलत्वेन तन्नि
रूपणरूपत्वाच्च अनुमानप्रामाण्ये मवरूह्याप्यमाने व्याप्तिनिश्चयाय मा प्रिमहेपायस्य तदुपयोगिव्याप्तिस्वरूपं निरूप्य निरूपणं तत्सहितं चिदयाभिचारज्ञं कथिवनूनमा
तं र्थकस्य व्याप्तिज्ञानस्य कारणतानिर्वाहार्थमाप्यनुगमस्य परामर्शार्थं सामान्यलक्षणायाः कारणसंपत्त्यर्थं पक्षतायाः अनुमितिकारणत्वरूपलक्षणज्ञानस्य प्रमा
त्वनिर्वाहाय परामर्शस्य हेतुतायाः ततः स्वार्थपरार्थत्वे इति पदव्यास्यानुमानविभागस्य परार्थानुमानं न्यायसाध्यमिति तदर्थमवयवनिरूपणं एवं रीत्या सद्धेतुरूपानुमा
ने निरूपिते प्रसक्तोपजीवकत्वादित्यादिग्रंथमारभ्यावयवांतनिरूपकं सद्धेतुनिरूपणमित्यभिहितमिति। एतावता थ हेत्वाभासा इति मूलार्थोपि स्थापितः अथ शब्दस्यानंतर्य
मर्थः तच्च ध्वंसाधिकरणकालवृत्तित्वं ध्वंस एव वा समानकालीनत्वं संसर्गः ध्वंसे चावयवांतग्रंथात्मकसद्धेतुनिरूपणस्यानंतर्यावधिताया अर्थतो लभ्यतया अनुयोगि
ताविशेषसंबंधेनान्वयः वस्तुतस्तु शब्दटिप्पण्यां अथशब्दस्य पूर्ववाक्यस्थक्रियानंतर्यार्थकतायाः स्वयमभिधानात् अत्र सद्धेतुनिरूपणानंतर्यमेवार्थः ज्ञानजन्यजि
ज्ञासाधीनत्वं पञ्चम्यर्थः अनयोर्लक्षणादिप्रकारकज्ञानानुकूलव्यापारे [illegible]र्थेऽन्वयः प्रतिज्ञाविषयत्वेन हेतुत्वं च कर्माख्यातार्थः वर्तमानसामीप्येन तद्विधानात् प्रतिज्ञा

पात्ते

(5)

(विषयत्वं)

(:तदाभासान् कृत्स्नस्यार्थाविष्क्रि...)

पोत्तरकालीनत्वं ज्ञप्तेश्चोत्तरत्वे प्रकृतवाक्यस्यावधित्वेनान्वयः कर्माख्यातवशान्नयेय ध्याहारः उत्पत्तित्वं तृतीयार्थः तस्योत्तरकालीनत्वस्य च वृत्तावन्वयः तादृशवृत्ते
श्च धात्वर्थव्यापारे विषयतासंबंधेनान्वयः उक्तव्यापाररूपधात्वर्थस्य निरूपितत्वसंबंधेनाख्यातार्थे विषयत्वेन्वयः तस्य प्रथमांतपदोपस्थाप्ये हेत्वाभासे आ
श्रयतासंबंधेनान्वयः बहुत्वरूपसंख्यान्वयोपि तत्रैव तथा च सद्धेतुनिरूपणध्वंसाधिकरणकालवृत्तित्वनिर्णयादिज्ञानजन्यजिज्ञासाप्रयोज्यः पदार्थसादि
रूपात्मकवाक्योत्तरकालीनवृत्तिविषय [illegible] प्रयोगादिप्रकारकज्ञानानुकूलव्यापारः तद्विषया बहवो हेत्वाभासा इति बोधः शब्दात्मकव्यापारस्य विषयताश्रा

(विषयतासंबंधेन) पारानुबंधिनी। वस्तुतस्तु यत्सस्यार्थः फलं जन्यत्वे संसर्गः आश्रयत्वे माख्यातार्थः तादृशव्यापारजन्यफलाश्रया इत्साकारको बोध इति हेत्वाभासा इत्यस्य
दुष्टा हेतव इत्यर्थो ऽग्रे व्यक्तीभविष्यति। यत्तु तस्य हेतुदोषा इत्येवार्थ इति दीधितावर्पितहेत्वाभासपदं दोषपरमेवेति तत्र तथा सति पक्षधर्मतां निरूपयितुमा
हेति वदुष्टान्निरूपयितुं प्रतिजानीत इत्येव वा स्यात् ग्रंथकारस्य दुष्टसंगत्युपपादनश्रमवैफल्यापाताच्च यदि च दुष्टानां दोषाणां च निरूपणद्वयमपि तादृ
शव्यापारः मूले च दोषेप्याख्यातार्थान्वयः दीधितौ दुष्टहेतुप्रतिपत्त्यनुकूलो दोषनिरूपणात्मको पि व्यापारो भिमत इत्युच्यते तदा हेत्वाभासपदस्य दुष्टहेतुपर
तापाद्यावश्यकत्वे किं दोषेषु सद्धेतुसंगत्युपपादनश्रमेण। तस्माद्दुष्टत्वज्ञानस्य दोषत्वज्ञानाधीनत्वेन दुष्टत्वघटकतयैव दोषनिरूपणं कृतं इत्येव सम्यगि
ति न तु तदाभासन्नाब्धे ते च ते आभासा इति तेषामाभासा इति वा न व्युत्पत्तिः तथा सति तत्सदृशस्य सत्प्रतिपक्षहेतुपरामर्शित्वे तदाभासत्वाभावेनाभासाभावेन बा
संगत्यापत्तेः केवलहेतुपरामर्शित्वेपि ग्रंथमध्ये सत्संगतिः द्वितीयव्युत्पत्तौ यद्धर्मावच्छिन्नहेतुकानुमितिः तत्सदृशस्य तद्धर्मावच्छिन्नपरतया तत्संगतावपि ते
रदुष्टत्वज्ञानस्य दोषत्वज्ञानजन्यत्वादेककार्यकारित्व

(=ज्ञौत्रैतादृशपरत्वं यथार्थं केवलहेतुपरामर्शेपि न दोषः=)

१६ वस्तुतस्तु साहचर्यं भेदागर्भमेव निवेश्यं अन्यथा तेषां प्रमेयादि साध्यको सद्धेतुभेदाप्रसिध्या साहचर्यस्यैवाप्रसिध्यापत्तेः अथ वा तद्गतिधर्मशून्यत्वमेव तत्र = १

हेतुस २

चेत्यादि विभागासंगतिः मैवं तद्धस्व आसंतरमिति युक्तत्वेः तस्य हेत्वाभासादि विशिष्टहेतुपरामर्शतया तत्साहचर्यं तद्भिन्नत्वे सति पंचम्यंतपरोद्दिष्टत्वेन पंचम्यंतपद
जन्यप्रतीतिविषयत्वेनाभोध्यं तादृशसाहचर्यप्रकारकज्ञानविषयाद्यर्थः यद्वा तद्धसं दृष्टाद्यर्थः साहचर्यं चेतद्भिन्नत्वे सति अनुमितिजनकज्ञानविषयत्वेन मूलेपि हेतु
सदृशा आभासा इत्यर्थः आभासाद्यस्यानुमितिप्रतिबंधकज्ञानविषयतानाप्तिरित्यर्थः आभासंतेरिह सत्राप्ययमेवार्थः एवं च ते च ते आभासा इति न वृत्तसन्निसंभवः सद्धेतो
रेव प्रकांतत्वात् इति तद्धृदिस्थं अत्रोपमानस्य क्रियान्वयार्थं संतरमिव व्याहार्यं तेनानन्वयेऽपि न कैपि इत्यवधीत इति न तेनानुपपत्तिः तन्निरूपितत्वं तदधीनज्ञान
विषयत्वं तज्ज्ञानेति। शिष्यस्य गुरुस्मृतिविषयत्वेन प्रथमतः प्रसंगज्ञानं ततः गुरुस्मृतिविषयव्याप्यज्ञानं मदिष्टसाधनमिती इष्टसाधनताज्ञानं ततो गुरुस्मृति
विषयवान्कः इत्याकांक्षा गुरुस्मृतिविषयव्याप्यत्वेन हेत्वाभासत्वप्रकारकज्ञानविषयिणी इच्छा ततः प्रयोज्यत्वादित्यर्थः। अवयवनिरूपणानंतरं अनेन व्याप्तिपक्षधर्म
ताविशिष्टहेतुनिरूपणानंतरं शिष्यस्य तज्ज्ञाने तन्निरूपितप्रसंगसंगतिर्यत्किंचित्स्यात् इति प्रसंगरूपा आनंतर्याभिधानप्रयोजकीभूतजिज्ञासाजनकतायां ज्ञान
निष्ठायां याविषयितासंबंधावच्छिन्नावच्छेदकता विषयितासंबंधावच्छिन्नतदवच्छेदकतायां अवच्छेदकतापर्याप्त्यधिकरणत्वमिति संगतिलक्षणं। सामान्यधर्मप्रकारकज्ञा
नं गुरुस्मृतिविषयवानिति तदनात्मकं वा ततः प्रसंगसंगतिर्व्याप्यत्वोपलक्षितधर्मप्रकारेण तद्विषयज्ञानं मदिष्टसाधनमिती इष्टसाधनताज्ञानं इति स्पष्टताज्ञानादिकमपि
ततः प्रसंगसंगति व्याप्यत्वोपलक्षितधर्मप्रकारकज्ञानं मे भूयादितीच्छा ततः व्याप्तिपक्षधर्मताविशिष्टहेतुनिरूपितप्रसंगसंगतिमान् कइति गुरुं प्रति जिज्ञासाजनक
वाक्यप्रयोगः किं शब्दस्य स्वसमभिव्याहृतपदार्थतावच्छेदकावांतरधर्मप्रकारकज्ञानेच्छायां शक्तत्वात् ततः गुरोः प्रसंगसंगत्यवांतरधर्मप्रकारकशिष्यज्ञानं मदिष्टसा
धनं इतीष्टसाधनताज्ञानं शिष्यज्ञाने धार्मिकं इति स्पष्टताज्ञानादिकमपि ततः शिष्यस्य प्रसंगसंगत्यवांतरधर्मज्ञानं भूयादिति गुरोर्बुबोधयिषा ततो हेत्वाभासनिरूपणं

२ ततो गुरोर्गुरुस्मृतिविषयव्याप्यत्वोपलक्षितधर्मप्रकारकज्ञानेच्छाविषयकशाब्दबोधः २

३

क्रियत इति रीत्या सामान्यधर्मप्रकारकज्ञानविधया प्रसंगसंग■तिरिति ज्ञानजन्यविशेषधर्मप्रकारकजिज्ञासायाहेत्वाभासनिरूपणप्रयोजकत्वेननुकद्दातिप्ररंतप्रति
शिष्यजिज्ञासायामनुबोधयिषां प्रति प्रश्नार्थबोधस्य हेतुत्वे च मानाभावादिति चेदत्र भट्टाचार्यैः स्वजिज्ञासाया निरूपणप्रयोजकत्वे शाब्दप्रयोगात्मके निरूपणानुकूलवत्त्व
तुबोधयिषानुकूलत्वं स्यादिति पापज्ञानस्यासिद्धत्वे ज्ञानेन तत्संपादकस्यासिद्धत्वव्याप्त्येषाविषयत्वे प्रतिपाद्यस्य को हेत्वाभास इति प्रश्नवाक्यस्य व्यवहारोऽज्ञानविधया
निर्धारकपरजिज्ञासाप्रसक्तविषय■विधया तदानुकूल्येनेत्युक्तप्रायं तथा चेन को विशेषः। ननु सर्वमिदं तदा संगच्छते यदि व्याप्तिपक्षधर्मताविशिष्टहेतुनिरूपणानं
तरं तं निरूपितसंगतिमान् क इति शिष्यस्य जिज्ञासायाः सर्वानुभवसिद्धेति चेन्न एकनिरूपणानन्तरं इतः परं गुरुणा किं वक्तव्यं गुरोः स्मृतिविषयः क इत्याकारक
जिज्ञासायाः सर्वानुभवसिद्धत्वे उपोद्घातादिपंचकभिन्नत्वविशिष्टस्मृतिविषयत्वस्यैव प्रसंगत्वपरत्वेन न तादृशजिज्ञासाया निर्वाहात्। ननु तथापि हेत्वाभासनिरूप
ये हेत्वाभासत्वप्रकारकज्ञानेच्छाया एव प्रयोजकत्वात्तन्निर्वाहो न जायत एवेति चेन्न हेत्वाभासत्वस्यैव प्रसंगसंगतिरूपत्वेन तस्य तद्व्याप्यत्वेन च तादृशजिज्ञासायाः स्वरूपत्वात्
न चैतस्यैव तद्व्याप्यत्वेन तत्प्रकारकजिज्ञासातः पूर्वं सामान्यधर्मप्रकारकज्ञानविधया तत्प्रकारकज्ञानस्यावश्यकत्वेन पूर्वमेव तादृशजिज्ञासाविषयस्य सिद्धत्वेन कथं जिज्ञासे
ति वाच्यं ज्ञानुमितिकारणीभूताभावप्रतियोगियथार्थज्ञानविषयत्वेन व्याप्यत्वस्य गुरुस्मृतिविषयत्वेन व्यापकत्वस्य च स्वीकारेण च प्रसंगसंगतित्वं पुरस्कृत्य हेत्वाभासत्वप्रकार
कज्ञानस्य प्राक्सत्त्वेऽपि तादृशयथार्थज्ञानविषयतात्वेन तत्प्रकारकज्ञानस्यासिद्धत्वेन तादृशजिज्ञासायाः संभवात्। एवं चानन्तराभिधानप्रयोजकजिज्ञासाजनकतायाया
ज्ञाननिष्ठविषयितासंबंधावच्छिन्नावच्छेदकताविशिष्टतानिष्ठायास्तदवच्छेदकताया अवच्छेदकतापर्याप्त्यधिकरणत्वरूपसंगतिलक्षणसमन्वयः। एवं जिज्ञासायाः प्रसं
गति ज्ञानजन्यत्वं निरूप्यतावच्छेदकसंगतिहीं संउपोद्घातादिपंचकभिन्नत्वे सति अनन्तराभिधानप्रयोजकजिज्ञासाजनकनिरूप्यतावच्छेदकधर्मप्रकारकस्मार
णप्रयोजको निरूप्यनिष्ठसंबंधः प्रसंगः। प्रकृते हेत्वाभासनिरूपणप्रयोजकीभूता को हेत्वाभास इति हेत्वाभासपदार्थतावांतरधर्मप्रकारकजिज्ञासा■तज्जनकनिरू

रूप्यतावच्छेदकमिसर्वः

प्यता।वच्छेदकप्रकारकस्मरणं च हेत्वाभासपदार्थत्वप्रकारकं स्मरणं स्मरणेऽजिज्ञासाजनकत्वं सामान्यधर्मप्रकारकज्ञानविषयताताद्दशस्मरणप्रयोजकानि स
प्यनिष्ठसंबंधश्च व्याप्तिपक्षधर्मताविरहवत्त्वादिः संबंधे स्मरणप्रयोजकत्वं स्मरणजनकज्ञानविषयत्वमेव स्मरणजनकसंबंधज्ञानं च सद्धेतुनिरूपणानंतरमि
तः परं गुरूणां किं निरूपणीयं प्रसंगादिकिंचित्संगतिमदिति सामान्यतः शिष्याणामसत्वप्रतिज्ञातरादेः श्रूयमाणत्वात् संबंधज्ञानस्य स्मरणजनकत्वमेकसंबंधिज्ञा
नविधया अन्यविधेयस्यप्रदेतत् इति प्रकारांतरं द्रष्टव्यं। ननु दीधितिकृतां तत्र स संगादित्यनेन संगतिं प्रदर्श्य तत्त्वनिरूपणादित्यादिना फलप्रदर्शनेऽर्पणेन च संगति
प्रदर्शनोत्तरं तदावश्यकतया तेषां तदभिधानमावश्यकमिति वाच्यं तत्त्वनिर्णयेत्यादिनैव तल्लाभादित्याशयेन शंकते। तत्त्वेति। हेत्वाभासनिष्ठं यत्तत्त्वनिर्णयादिजनकज्ञान
विषयत्वमिति योजना। शिष्यप्रवृत्त्युपयोगीति तत्स्वरूपं सुहृदुपसर्पः अस्य प्रयोजनपदार्थेऽन्वयः प्रयोजनप्रदर्शनमिति हेत्वाभासत्वज्ञाने तत्त्वनिर्णयादेः कार्यकारणभा
वग्राहकमिसर्पः तथा च मूले तत्त्वनिर्णयविजयप्रयोजकत्वादि सत्र प्रयोजकत्वं जनकज्ञानविषयत्वं हेत्वाभासानामिति पूरणीयं निष्ठत्वं च षष्ठ्यर्थः तस्य निरूपकविषय
त्वेऽन्वयः प्रयोज्यत्वं पंचम्यर्थः अस्य च धात्वर्थनिरूपणेऽन्वयः एवं च हेत्वाभासनिष्ठताद्दशप्रयोजकत्वे निष्ठप्रयोजकतानिरूपिता या प्रयोज्यता तच्छालि यन्निरूपणं तद्विष
याद्दसर्पः शिष्यस्य निरूपणघटकहेत्वाभासत्वज्ञानसाध्यकप्रवृत्तिजनकीभूताया हेत्वाभासत्वज्ञानधर्मिकेष्टसाधनताज्ञानस्यापेक्षिततया तत्त्वनिर्णयेत्यादिग्रंथस्य फलप्रदर्श
नपरत्वं संभवतीति भावः यद्यपि प्रयोज्यत्वं न तत्त्वज्ञानजन्यजिज्ञासाधीनत्वमेव फलतीति तथापीदानीं तत्त्वनिर्णयादिप्रयोजकत्वेन संगतिरूपमिति विशेषः तन्मूलस्य फलत्वप्र
दर्शनपरत्ववत् संगतिप्रदर्शनपरत्वमप्यानुरूप्यात्कमिसेत तल्लाभार्थं दीधितिकृता पुनः तत्कार्येति पूरणसंवलितं विवक्षितमिति न तद्वैयर्थ्यमिति साकूतेनैव समाधत्ते तथापीति
मूलतेति प्रसक्तोपजीवकत्वादि सत्र प्रथमं मणिकारेण संगतिप्रदर्शनात् तेन चावश्यमवांतरग्रंथसाकांक्षत्वानुमितिसर्थं संगतिः प्रदर्शनीयेति किमधिकेनेति वाच्यं यस्याप्रदर्श

8

८ नेतस्यैव साकांक्षत्वात् साधकत्वम् अन्तुत्सार्थं आपिकसंगतिप्रदर्शनात् अत एव प्रसंगे कार्यकारित्वयोरन्योन्यनिरपेक्षयोः क्रमनियामकत्वसूचनाय पदार्थितो चकारः अपि
तिजिज्ञासायां निरूपणप्रयोजकत्वं दर्शितं रीत्या प्रसिद्धत्वव्याप्यत्वाविषयत्वप्रतिपादकस्य कस्तत्कार्यत्वनिर्णयादि प्रयोजकः इति प्रश्नवाक्यस्य व्यवहर्तव्य
ज्ञानविधाया निर्वाकियत् जिज्ञासाप्रत्यक्षं विषयविधया तदनुकू[illegible]ल्येन एवं सद्धेतु[illegible] निरूपणानंतरं सद्धेतु निष्टतत्वनिर्णयादिप्रयोजकत्वज्ञाने शिष्यस्य
ततः तत्वनिर्णयादिप्रयोजकांतरस्मरणे न विशेषधर्मप्रकारेण तादृशप्रयोजकज्ञाने इष्टसाधनताज्ञानात् तत्वनिर्णयादिप्रयोजकांतरं किमिति तादृशप्र
योजकसाधनांतरहेत्वाभासत्वरूपधर्मविषयिणी जिज्ञासा ततः प्रश्नः ततस्तदर्थशाब्दबोधः ततः हेत्वाभासास्तत्वनिर्णयादि जनकज्ञानविषयतायां ततः इति ज्ञाना
तच्छिष्यसमवेतं तत्कार्यतत्वनिर्णयादिप्रयोजकत्वावांतरधर्मवत्वेन हेत्वाभासज्ञानमदिष्टसाधनमिति इष्टसाधनताज्ञानं कृतिसाध्यताज्ञानादिकं च गुरोः
स्तत्रैव बोधयिषेति तज्ज्ञानजन्यजिज्ञासाधीनत्वं निरूपणायामिपंचम्यर्थः हेत्वाभासानामिति परणीयं तथा च हेत्वाभासानिष्ठं यत्तादृशप्रयोजकत्वं तज्ज्ञा
नजन्यजिज्ञासाधीनत्वं तादृशनिरूपणोऽस्त एवं हेत्वाभासानां तत्वनिर्णयादिजनकज्ञानविषयत्वेति स्थाने तुल्यवित्तिवेद्यतया हेतुविषयकज्ञानं तत्वनिर्णया
दिजनकमिति कार्यकारणभावः शिष्याणां आयतनेन ततः तेषां श्रवणे प्रवृत्तिरिति तन्मूलस्य प्रयोजनप्रदर्शनपरत्वमप्यव्याहतमेव। विजयः परोत्कर्षः
इदं अहंकारश्चाहमुत्कृष्ट इति ज्ञानं तत्सवधनं तदनुकूलव्यापारः यद्वायमुत्कृष्ट इति मध्यस्थज्ञानानुकूलव्यापारो विजयः सुखविशेषो विजयः इत्येके
ननु तत्कार्यकारित्वादिदिदधिति त्रिभासंगतिः प्रमितत्वादि निश्चयस्य संदेहत्वकार्यत्वादिसत्त्वात् आह सपरीति ननु तत्त्वनिर्णयादिप्रयोजकत्वस्य सद्धे
तुज्ञाने हेत्वाभासज्ञाने एव च सत्वेन सद्धेतुनिरूपितहेत्वाभासनिष्ठत्वं कथमत आह प्रयोजकत्वं चेति एवं चोक्त ज्ञानस्य प्रयोजकत्वेन त्रिविषयतम

(अयमनुकृष्ट इति पा०) ६ (यद्यपि इदं पुनरुक्तं पूर्वं फलप्रदर्शनं तथापि संगति प्रदर्शनमिति भेदः) ६ (हेत्वाभास) ५

अवच्छेदकयोः सहस्य हेत्वोः तथात्वमेक्षत मेवेति भावः कार्यंतत्वनिर्णयादि स्वस्य हेत्वाभासस्य तथात्वं प्रयोजकत्वं प्रमितत्वं स्वनिष्ठप्रमाघटकत्वं प्रमानुमितौ सल्लिंगकपरा
मर्शहेतुत्वामभिसंधायोक्तं व्याप्तीति। अप्रामाण्येति पर्वतो वन्ह्यभावव्याप्यपाषाणमयत्ववानिति परामर्शः ततो संनिकर्षविशेषेण पाषाणमयत्वं वन्ह्यभावव्याप्यमिवास्मिन्निति दोषज्ञानं ततस्तत्का
लीनतदनुव्यवसायेन व्यभिचारादिविशेष्यकव्याप्तिप्रकारकपरामर्शो वानिसाकारेण व्यभिचारादिविशेष्यकत्वे सति व्याप्तिप्रकारकत्वरूपमप्रामाण्यं विषयीक्रियते एवं पर्वतस्य हृदत्वा
हृदत्ववानिसाकारकपरामर्शो हृदत्वाद्वारसिद्धत्वग्रहे ततस्तत्कालीनतदनुव्यवसायेन हृदत्वाभाववति तादृशहृदत्वं परामृष्टमिति साकारेण हृदत्वाभाववद्विशेष्यकत्वे सति हृदत्वप्र
कारकत्वरूपमप्रामाण्यं विषयीक्रियते इति दोषज्ञानस्याविरोधिकोटिव्याप्यवत्ताज्ञानेऽप्रामाण्यग्राहकत्वं अथवा प्रथमतो धूमाभाववद्वृत्तित्वविशिष्टवह्निमान्वह्निरिति दोषप्र
कारकज्ञानं ततो दोषविशेषाद्धूमव्याप्यवह्निमान् हृदः धूमाभावव्याप्यजलत्ववांश्चेति समूहालंबनं तृतीयक्षणे धूमनिरूपितव्याप्यभाववति वह्नौ धूमव्याप्तिप्रकारकमिदं ज्ञान
मिति वन्हौऽप्रामाण्यग्रहः ततः अप्रामाण्यज्ञानाभावविशिष्टविरोधिकोटिव्याप्यवत्ताज्ञानरूपप्रतिबंधकापसरणात् हृदो धूमाभाववानिति प्रमितकोटिनिश्चयो भवति
एवं प्रथमलक्षणे धूमसामानाधिकरण्याभावविशिष्टजलत्ववज्जलत्वमिति विरोध[illegible]ग्रहः अनंतरं दोषविशेषेण धूमव्याप्यजलत्ववान् धूमाभावव्याप्यहृदत्ववांश्चेति स
मूहालंबनं तृतीयक्षणे धूमसामानाधिकरण्याभाववति जलत्वे धूमसामानाधिकरण्यप्रकारकमिति विरोधिव्याप्यवत्ताज्ञानेऽप्रामाण्यग्रहः ततः स्वकारणवशात् हृदो धूमाभा
ववानिति प्रमितकोटिनिश्चयः एवमसिद्धावपि बाधस्थले तु प्रथमतः वह्निमत्सर्वत्ववज्जलत्वमिति बाधज्ञानं अनंतरं पर्वते वह्निमत्वेन हेतुतावन्ह्यभावव्याप्याभावोऽनुमेयः
अनंतरं च दोषविशेषादिना वह्निव्याप्यधूमवान् वन्ह्यभावव्याप्यजलत्ववांश्चेति समूहालंबनं अनंतरं च हृदज्ञानं वन्ह्यभावव्याप्याभाववति पर्वते वन्ह्यभावव्याप्यप्रकारकं इदमप्रा
माण्यज्ञानं ततः पर्वतो वह्निमानिति प्रमितकोटिनिश्चयः एवं वह्निव्याप्यधूमवत्सर्वत्ववज्जलत्वमिति सत्प्रतिपक्ष[illegible]ग्रहः ततः पर्वते वह्निव्याप्यवत्तेन हेतुना वन्ह्यभावव्याप्याभावोऽनुमेयः
ततो दोषविशेषेण वह्निव्याप्यधूमवान् वन्ह्यभावव्याप्यजलत्ववांश्च पर्वत इति समूहालंबनं ततोऽप्रामाण्यग्रहः ततः प्रमितकोटिनिश्चयः असंकीर्णबाधस्थले तु प्रथमतः उस्प

५ कांचनमयभिन्नो धूमः पर्वतो वेति ज्ञानं तदोषमेतां वह्निव्याप्यकांचनमयधूमवान्पर्वत इति ज्ञानं तत्र कांचनमयधूमवान् वह्निव्याप्यालोकवानिति च ज्ञानं वह्निव्याप्यधूमवान्कांचनमयः पर्वतः वह्निव्याप्यालोकवांश्च
मयधूमवान्पर्वत इति ज्ञानं कांचनमयधूमवान्कांचनमयधूमवान्पर्वतो वह्निमानिति प्रमितकोटिनिश्चयः एवं च वह्निर्वह्निमानिति ज्ञानोत्तरं निर्वह्निर्वह्निव्याप्यधूमवानिति परामर्शे उत्कटी स्यात् अप्रामाण्यग्रहो जायते
नित्यकालावच्छिन्नो घटो गंधाभाववानिति बाधग्रहः अनंतरं कथंचिदुत्पत्तिकालावच्छिन्नो घटो गंधवानिति ज्ञानं तद्वितीयक्षणे तत्राप्रामाण्यग्रहो भवतीति तत्क्षण एव च गंधाभावव्याप्य
गंधप्रागभाववानुत्पत्तिकालावच्छिन्नघट इति परामर्शः ततश्च उत्पत्तिकालावच्छिन्नो घटो गंधाभाववानिति प्रमितकोटिनिश्चयो भवतीति बाधादर्शनस्य विरोधिकोटिमत्ताज्ञाने
अप्रामाण्यग्राहकत्वमपि सादृशी सारोपज्ञानस्योपयोगित्वमिति बहुतरं सूक्ष्मं धिया तत्तन्निर्णयादौ सुतरां तत्तदस्य प्रमितकोटिपरत्वे गौणतापत्तिरिति सतर्कआह अथवेति । तत्रेति सद्धेतुप
रामर्शकालीनस्थापनानुव्यवसाये तेन साध्यव्याप्यवति साध्यावगाहित्वेन लिंगेन साध्यवति साध्यावगाहित्वमनुमीयते व्याप्यवति व्यापकप्रकारकत्वे व्यापकवति व्यापकप्रकारक
त्वनियमात् यद्यपि धूमवति वह्निप्रकारकत्वं यत्र तत्र वह्निमति वह्निप्रकारकत्वमिति सेवनियमः तद्व्याप्यप्रयोजकत्वे ऽसंभवाभिरासाय सद्धेतुत्वज्ञानानुसरणं । वस्तुतस्तु सल्लिंगपराम
र्शजन्यानुमितिः प्रमैवेति प्राचीनसिद्धांतोऽनेन सद्धेतुत्वज्ञानं चेत्तदुत्तरं सल्लिंगपरामर्शजन्यत्वज्ञानं जायते ततस्तादृशानुमितौ प्रमात्वज्ञानं जायत इति साध्यवत्ता
ज्ञाने प्रमात्वप्रयोजकं यत्र सल्लिंगपरामर्शजन्यत्वज्ञानं तदनुकूलसद्धेतुज्ञापकहेतोर्व्याप्त्यादिविशिष्टत्वरूपसद्धेतुत्वज्ञानं विषयाविषयाततदनुकूल्येन सद्धेतोः साध्यवत्ताज्ञानप्रमात्व
निश्चयप्रयोजकत्वं बोध्यं एवं पक्षः साध्यवानिति साकारकसाध्यवत्ताज्ञानोत्तरं पक्षः साध्याभावव्याप्यहेतुमान्पक्ष इति ज्ञानं तद्विषयहेतौ साध्याभावव्यभिचारित्वज्ञानं विरोधक
विधयावत्साभावव्यभिचारविशिष्टहेतुमद्वृत्तिव्याप्यताकत्वरूपहेतुज्ञानसंपादकं अन्यथा दुष्टत्वग्रहणात् साध्याभावव्याप्तिविशिष्टहेतुमद्वृत्तिव्याप्यताकत्वरूपसाध्याभाववद्वृत्ति
व्याप्यताकत्वरूपाप्रामाण्यसाधकलिंगाभावापत्तेः तदभावव्याप्यवति तत्प्रकारकत्वस्य तदभाववति तत्प्रकारकत्वव्याप्यस्य निरुक्तज्ञानकालीनस्थापनानुव्यवसायेन ग्रहणे
संभवादेवं च विषयाविषयाततदनुकूल्येन हेत्वाभासानां साध्यवत्ताज्ञाने साध्यवद्विशेष्यकत्वरूपप्रमात्वनिश्चयप्रमात्वप्रयोजकत्वं यद्वा स्थापनाकालीनोक्तग्रहानुव्यवसा
येन दुष्टत्वग्रहकाले गृहीतं यद्वह्न्यभावव्यभिचारविशिष्टहेतुमद्वृत्तिव्याप्यताकत्वविशिष्टवह्निप्रकारकत्वं तद्वह्न्यभाववत्विशेष्यताकत्वविशिष्टवह्निप्रकारकत्वव्यापकीभूताभाव
प्रतियोगि इति तेन हेतुना साध्यवति साध्यप्रकारकत्वरूपं प्रामाण्यमनुमीयते एतदेवाभिसंधाय वह्नित्वाभाववति वह्नित्वप्रकारकत्वव्यापकेन सहसमर्थविशेष्यकवह्नित्वे
प्रकारकत्वाभावेन निरुक्तेन व्यापकमपि वह्निमद्वृत्ति वह्नित्वप्रकारकत्वमनुवर्तत इति प्रसक्तमनुकूलं महापर्वतो वह्निव्याप्यधूमवानिति परामर्शाद्वह्न्यनुमितिः ततोऽन्यसमावव्या
कपिसंयोगव्याप्यपिपीलिकासंयोगवान्मूलावच्छिन्नो वृक्षः इत्यादिपरामर्शाज्जायमानायां मूलावच्छिन्नो वृक्षः कपिसंयोगीत्यनुमितौ भ्रमत्वासिद्धेस्तस्य प्राचीनानामसंगतिरिति भावः तथा
पि सल्लिंगे व्याप्यवृत्तिभिन्नत्वविशेषणान्न दोष इति भाति ५

१ ह्रदो वह्निमान् इत्यनुमितिः ततः वह्न्यभाववान् इत्यनुमिताव् अप्रामाण्यज्ञानं ततः पूर्वानुमितौ प्रामाण्यघटकविरोध्यताश्रयविरोध्यकत्वसाधकस्य तादृशविरोध्यतावच्छेदकावच्छिन्नत्वरूपलिंगस्योपस्थि-
प्यह्रदत्ववानिति परामर्शाद् वह्न्यभावानुमितिः तत्र ह्रदत्वरूपहेतावदुष्टत्वग्रहे सति वह्न्यभावानुमितौ सल्लिंगपरामर्शजन्यत्वज्ञानं तद्घटितत्वे तत्र प्रमात्वनिश्चयः तदधीनं पूर्वस्या-
नुमिताव् अप्रामाण्यज्ञानं तत्र प्रमात्वाभावनिश्चय इति तत्र प्रमात्वनिश्चयो न जायते तत्र स्वरूपासिद्धित्वरूपदुष्टत्वग्रहे तु वह्न्यभावानुमितौ न सल्लिंगपरामर्शजन्यत्वज्ञानं तदसत्वे च
तत्र प्रमात्वज्ञानाभावः तस्मिन् पूर्वस्मिन्नेव वह्न्यनुमितौ अप्रमात्वज्ञानानुत्पत्तिः तत्सत्वे च न प्रमात्वाभावनिश्चयः तत्सत्वे प्रतिबंधकनिष्ठतादृशानुमितौ प्रमात्वनिश्चयो जायते
तथा च प्रमात्वाभावनिश्चयाभावरूपप्रतिबंधकाभावसंपादनद्वारा साध्यवत्ताज्ञाने प्रमात्वनिर्णयसंपादकत्वम् आभासत्वज्ञानस्येति तथा चोक्तविपरीतकोटिसाधकहेता-
वदुष्टत्वग्रहे जाते दुष्टविषयकपरामर्शजन्यत्वेन हेतुना विपरीतकोटौ प्रमात्वनिश्चयो जायते ततश्च प्रमात्मकज्ञानीयप्रकारतानिरूपितविशेष्यतासमानाधिकरण-
विशेष्यतानिरूपितप्रकृतसाध्यप्रकारताकत्वेन हेतुना साध्यवत्ताज्ञाने तदितरत्वप्रकारकत्वाभावरूपप्रामाण्याभावप्रकारको ग्रहो भवेत् तु तत्र दुष्टत्वग्रहे जाते तु विप-
रीतकोटिज्ञानधर्मिकप्रमात्वविधेयकानुमितिसंपादकीयस्तादृशपरामर्शजन्यत्वरूपो हेतुः स एव न संभवति अतो विपरीतकोटौ प्रमात्वनिश्चयो न जायते ततत-
श्च प्रकृतसाध्यवत्ताज्ञाने प्रमात्वाभावनिश्चयो नैव जायते तत्साधकस्य प्रमात्मकज्ञानीयप्रकारतेत्यादिघटकहेतोरसत्वात् किन्तु प्रकृतानुमापकहेतौ व्याप्त्यादि
विशिष्टत्वरूपसद्धेतुत्वज्ञानाद् उक्तरीत्या साध्यवत्ताज्ञाने प्रमात्वनिश्चयो जायत इति जनयेव रीत्या सर्वेषां दुष्टत्वग्रहाणाम् उपयोगित्वं बोध्यम् । मूले दोषेति दुष्ट-
हेतुनिरूपणस्यैव प्राप्तिज्ञातत्वेन तल्लक्षणस्यैवाकांक्षितत्वात् अतिव्याप्तिरिति सर्वत्र लक्षणसत्वस्य हेतुदोषो भेयसमूलत्वेन मादायसत्वात् न च दोषाणां कथ-
मलक्ष्यता दुष्टत्वात् इति वाच्यं पर्वतपक्षकवह्निसाध्यकानुमाने धूमस्यापि द्रव्यत्वादिना दुष्टत्वाद् स्वस्य धर्मावच्छिन्ने हेतुक प्रकृतानुमितिविरोधियथार्थ-
ज्ञानविषयत्वं तस्य तेन रूपेण दुष्टत्वमिति वाच्यम् एवं वह्न्यभाववद्ह्रदे न धूमत्वादिना दुष्टत्वमिति सति व्याप्तिरिसर्वथा अवच्छेदकेति न च दोषैकदेशे एवमप्यतिव्याप्तिरेव
अज्ञानातिरिक्तावच्छिन्नत्वरूपावच्छेदकत्वनिवेशात् विशेषणं तत्र भवेन यथार्थज्ञानविषयता या प्रकृतत्वाविषयावच्छेदकत्वं च पर्वतो निर्वह्निरिति भ्रममादाय दोषवारणाय यथार्थ

मितिन संभवति भ्रमसाधारणविषयितायाएव निवेशे असंभवापत्तेस्तथाच नाविषयतानिवेशे प्रतिबंधकतानतिरिक्तवृत्तिविषयतापर्याप्त्यधिकरणाप्रसिद्धेर्यथार्थ
पदवैयर्थ्यापत्तादिति वाच्यं साध्यादेरपि दोषत्वापत्तिरित्यादिना तद्दोषस्य वाच्यत्वात्। ह्रदो वह्निमान् द्रव्यत्वात् ह्रदत्वाद्वा घटत्वमनित्यं घटत्वादित्यादौ हेतुविषयिताया
अप्यवच्छेदकत्वात्तत्रायमाशय इति। ननु वह्निमान्धूमादित्यादौ हेतुविषयताया बाधज्ञानप्रतिबंधकतायामनवच्छेदकत्वेप्यनुमितिपदस्याग्रे समारूढत्वेनानुमितिप
रत्वस्य विवक्षणीयतया स्वरूपासिद्धिज्ञानप्रतिबंधकतामादाय तत्र लक्षणसमन्वयः एवं ह्रदो वह्निमान् द्रव्यत्वादित्यादौ व्यभिचारज्ञाननिष्ठप्रतिबंधकतायां हे
तुविषयतामादाय तत्रापि लक्षणसमन्वयोऽस्त्येवेति चेन्न बाधादिति पदस्यासंकीर्णबाधादिपरत्वे नोत्पत्तिकालीनो घटो गंधवान् पृथिवीत्वादित्यादावसंकीर्णबाध ६
स्थले हेतुविषयतायाः कथमप्यनुमितिप्रतिबंधकतायामवच्छेदकत्वं नचैवं क्वचिदप्यसंकीर्णबाधितस्थले हेतुविषयताया अनवच्छेदकत्वेन प्रायसंगतत्वस्य संगतमिति वाच्यं
उत्पत्तिकालावच्छिन्नघटो गंधवान् घटत्वादित्यादौ हेतुविषयतायास्तादृशप्रतिबंधकतावच्छेदकत्वेन तत्संगतेः न चात्रापि गंधाभावव्याप्यव[illegible]ति[illegible]हाभावदशायां गंधा २
भावव्याप्यपृथिवीत्ववत्तापरामर्शेणानुमितिर्बंधाभाव्याप्तिरिति वाच्यं तादृशाभावविशिष्टबाधज्ञानस्य प्रतिबंधकत्वेपि तथाविधतदभावव्याप्यवत्ताज्ञानादेः प्रति
बंधकत्वानुपगमात् न च गंधाभावव्याप्यपृथिवीत्वविशिष्टोत्पत्तिकालाव[illegible]च्छिन्नघटरूपसत्प्रतिपक्षज्ञाननिष्ठप्रतिबंधकतायां हेतुविषयताया अवच्छेदकत्वो
नापत्तिः पक्षतावच्छेदकीभूतोत्पत्तिकालावच्छेदेन गंधवत्ताज्ञानप्रति तत्कालावच्छेदेन गंधाभाववत्ताज्ञानस्येव उत्पत्तिकालावच्छेदेन तादृशपृथिवीत्ववत्ताज्ञानस्यापि प्रतिबंधकत्वादिति वाच्यम्
तथाविधव्याप्यत्वनिष्ठपृथिवीत्वनिरूपसंबंधरूपावच्छेदकतावगाहित्वेन तज्ज्ञानस्यायथार्थत्वेन हेतुविषयताया यथार्थज्ञाननिष्ठप्रतिबंधकतानवच्छेदकत्वेनातिव्याप्तेरुक्तवारणात्।
तथाच दोषलक्षणस्यापि उक्तत्वेन संकीर्णबाधितादौ दुष्टत्वसंभवेप्यसंकीर्णबाधितादावव्याप्तिरित्यर्थः। अथ मूलावच्छिन्नो वृक्षः कपिसंयोगवान् एतद्वृक्षत्वादित्यादावसंकी

प्रति ५

=उभयच्छेदकत्वयोर्नत्तु नो भेदादिति समाधानान्तरानुसारेणाह= ५

र्णव्याप्यत्वोपपादनावसरे एतद्वृक्षत्वस्य तत्समवायस्य वा मूलानवच्छेद्यतया मूलावच्छेद्यसमवायसंबंधावच्छिन्नैतद्वृक्षत्वाभाववत्त्वस्य एतद्वृक्षत्वे मूलानवच्छेद्यत्वस्य वा स्व
रूपासिद्धिरूपत्वसंभवात् कथमसंकीर्णव्याप्यत्वमित्याशंकां निराकर्तुं व्याप्यत्वं तेरप्येतद्वृक्षत्वादेर्मूलावच्छेद्यवच्छेद्यत्वे बाधगंधोऽपी कारिष्यते दीधितिकृता तावं चोत्पत्ति
कालावच्छिन्नो घटो गंधवान् पृथिवीत्वादित्यादावपि तत्कालावच्छेदेन पृथिवीत्वपरामर्शे विषयो व्याप्यत्वं पृथिवीत्वेउत्पत्तिकालावच्छिन्नत्वस्य बाधात् उत्पत्तिका
लानवच्छिन्नपृथिवीत्वस्य यथार्थस्वरूपासिद्धिरूपत्वं अयथार्थज्ञानविषयत्वात्तथैव तत एव न तादृशसत्प्रतिपक्षस्य विषयकज्ञानस्य यथार्थत्वहानिरिति नाव्याप्तिः न चैवं
व्याप्यत्वे तेनावच्छेदकत्वमिति भवादृविरोधः व्याप्यत्वं तेः सर्वदेशकालावच्छिन्नत्वेन यत्किंचिद्देशकालमात्रावच्छिन्नत्वेनास्तीत्येतत्स्वपर्थीत् अर्थैर्वा मास्तु व्याप्यत्वं तेरवच्छिन्न
त्तिकत्वं दीधितिकृतो व्याप्यत्वे तेर्मूलावच्छिन्नत्वकथनं मतान्तरमाश्रित्य न तु स्वमते वं तु देशकालानन्तर्याप्यसंकीर्णबाधत्वेनोव्याप्तिः उत्पत्तिकालीनो घटो गंधाभाव
व्याप्यपृथिवीत्वगुणो भयाभाववानित्यसत्व्याप्यत्वं तत्संसत्प्रतिपक्षविषयकज्ञानस्य यथार्थत्वेन तादृशप्रतिबंधकतावच्छेदकपृथिवीत्वविषयितासत्वात् न च पृथिवीत्वगुण
भयाभावप्रतियोगितावच्छेदकं गंधवत्त्वमेव तथा च पृथिवीत्वरूपहेतुविषयता या ज्ञानावच्छेदकत्वादिति वाच्यं जलमाधवच्छेदेन पृथिवीत्वगुणो नयवति परमाणौ
गंधो नास्तीति प्रतीतेर्गंधत्वस्य तादृशोभयाभावप्रतियोगितानवच्छेदकत्वादिति चेन्न अनुमितिपदस्य न समूहालंबनानुमितिपरत्वमिति यथाश्रुतार्थाभिप्रायेण रूपदोष
क्तिमान् धूमादित्यादावेव व्याप्त्यभिधानात् ह्रदो धूमाभाववान् इति ज्ञानस्य च तानुमित्सप्रतिबंधकत्वेन हेतुविषयता यास्तत्रानवच्छेदकत्वात् यत्तु सत्प्रतिपक्षघटकीभूतं
व्याप्यत्वं तदभाववद्वृत्तित्वरूपं न तु व्यापकसामानाधिकरण्यरूपं गौरवात् तादृशव्याप्यत्वावच्छिन्नविषयकत्वेनैव प्रतिबंधकत्वं न तु प्रतिबंधकतावच्छेदककोटौ हेतु
तावच्छेदकावच्छिन्नविषयतापि निवेश्यते तथा चानुमितिपदस्य समूहालंबनानुमितिपरत्वेऽप्यसंकीर्णबाधस्थलेऽव्याप्तिर्न दुःस्थैव तथा विधपृथिवीत्वगुणोभयाभाववत्ताज्ञान
निष्ठप्रतिबंधकतायाहेतुविषयतानवच्छिन्नत्वादिति तन्तु च्छ स सत्प्रतिपक्षरूपदोषे व्यापकसामानाधिकरण्यरूपव्याप्तिर्मानाभावात् विशेषतं उत्पत्तिकालावच्छिन्नघटो गंधवान्

७

गंधव्याप्यपृथिवीत्ववांश्चेति समूहालंबनानुमितिं प्रति तु गंधाभावनिरूपितव्यापकसामानाधिकरण्यरूपव्याप्तिविशिष्टपृथिवीत्वगुणोभयाभाववत्ताज्ञानस्य तदभावव्याप्यवत्ताज्ञानतया प्रतिबंधक
तया: सकलसंमतत्वात् तदवच्छेदकहेतुविषयतासंभवात् यद्यपि ह्रदो वह्निमान् धूमादित्यादावपि घटाभावो वह्न्यभावव्याप्यः घटाभाववान् ह्रद इति ज्ञाने विशिष्टज्ञाननिष्ठप्रतिबंधकतावच्छेदकावि
षयताया: उदासीनव्याप्त्यादिसाधारण्यादतिव्याप्तिवारणाय प्रतिबंधकतायां ज्ञानवैशिष्ट्यज्ञानावच्छिन्नत्वं देयं तथा चोक्तरूपेण तथाविधव्याप्तिविशिष्टतदुभयाभाववत्ताज्ञानप्रतिबंधकताव्युदासा
द्व्याप्तिसंगतिरिति तदपि न मानवैशिष्ट्यज्ञानावच्छिन्नत्वस्यैव प्रतिबंधकतायां किंचिद्विशिष्टविषयिताप्रयोजकत्वस्यैव निवेशे पतयोदासीनपदार्थमादाय ने: बाधितहेतौ लक्षणासंगतेश्च सत्त्वात् यद्वि
उत्पत्तिकालावच्छिन्नघटो रूपवान् पृथिवीत्वादित्यादौ पृथिवीत्वगुणोभयाभावस्येव रूपाभावव्याप्यत्वे जलपरमाणोरूपादेः सत्त्वादिति तेतु विषयतापानवच्छेदकत्वादव्याप्तिरिति तदपि न चारु
अ६ तथाविधपृथिवीत्वजलतेजोन्यतमत्वगुणोभयाभावादेः पृथिव्यन्यत्वगुणोभयाभावादेश्च रूपाभावव्याप्यत्वेन यथार्थज्ञाननिष्ठप्रतिबंधकतावच्छेदकपृथिवीत्वविषयतामादाय लक्षणसमन्वय इति
अनुमितिपदस्य समूहालंबनानुमितिपरत्वे साध्यपक्षपरिष्कारप्रकारोऽप्यापात् बाधादिसादिना गंधवदुत्पत्तिकालीनघटवदः पक्षतासाध्यतासाधनतावच्छेदकत्वे पक्षत्वे च आश्रयासिद्ध्या
दिपरिग्रहः कांचनमयपर्वतो वह्निमानित्यादौ कांचनमयत्वाभाववत्तस्य धूमादिरूपहेतुघटितत्वेऽपि कांचनमयत्वाभावव्याप्यत्वस्य सर्वतः केवलहेतुघटितत्वसंभवसेव कांचनमयवह्न्यादेः सा
ध्यत्वे कांचनमयत्वाभावव्याप्यधूमवद्वह्न्यादेरप्रसिद्धत्वापि कांचनमयाभाववद्वृत्तिधूमादेरेव हेतुघटितत्वे धनमयवह्न्यादेः साध्ये तु साध्याप्रसिद्धिसदघटितेन अन्यविधदोषस्यैवासत्वात् तद
त्तिनसंग्राहकमप्यादिपदम् आप्तिश्चेति चकारेणोपात्तव्याप्तिसमुच्चायकः यथाश्रुतमिति श्रुतं निरूढतरलक्षणानधीनार्थप्रतिपत्तिपरः शाब्दस्तमनतिक्रम्य तदधीनमिति यावत् ततो द्रू
प्रमाविषयत्वलक्षणां विनैवेति फलितार्थः यत्त्वनुमितिप्रतिबंधकप्रकारकयथार्थज्ञानविषयत्वविवक्षां विनैवेति तन्न। केचित्तु प्रतीयतादर्थविवक्षामपेक्ष्य स्वयं यथाश्रुतत्वोक्तेरसंगतेः इदंपद
मेकमेव लक्षणं बोध्यमेतत् सन्निरूढार्थकत्वात् तथा सत्युत्तरयोर्द्वयोर्लक्षणतापत्त्याऽदोषतादवस्थ्यमिति समीपतरार्थकतामाहैतदिति एवं चैतल्लक्षणमिति अन्वयः एतत्सदोषस्यैकलक्षणत्वो
भावात् ततोऽप्रतीकमेव लक्षणमिति ... लक्षणत्रयमपीति। तल्लक्षणमपीति तल्लक्षणवाक्येऽपि दुष्टहेतुप्रतिपत्त्यनुकूलव्यापारत्वसत्त्वात् तच्चेत्यादिमूले सव्यभिचारादिपदे भावप्रधा
ननिर्देशात् नासंगतिरित्यत आह एवं चेति तथा च तेनैत्यादिग्रंथस्य दोषविभागपरत्वे विरुद्धस्याभिचार्यायां नित्युक्तेरितित्वेनेहेतूनां पञ्चत्वकथनासंगतेरित्यतो ... तोराद्दोषरूपो
पाधिभेदाद्धेतूनां भेद इत्यर्थकस्योपाध्येरसंकरादिति समाधानग्रंथस्याप्यसंगतिरिति भावः व्याकृतिरूपविभागफलोऽनुपपत्तिसंगतिमाशंक्य विभिन्नव्यवहाररूपविभागफलमुक्तमि

ि.

७

स्य

अत्र दुष्टप्रतिपत्त्यनुकूलव्यापारो दुष्टनिरूपणं तच्च दोषदुष्टोभयलक्षणकथनात्मकं तत्र मूले दुष्टलक्षणेन दूष्यतदृत्तिन्यूनतेति तत्फक्किकारेणानादृतानामे▮ विषयो यत्रेति व्यधिकरणाद्बहुव्रीहि
रप्याश्रितत्वान्निराकरणायाह स्फुटमिति स्फुटत्वं तद्विषयकजिज्ञासानधीनप्रतिपत्तिविषयत्वं तत्राकृतित्वज्ञानस्यैव तदनाशानोपयोगितयानवबोधकगुरुवाक्यं विनापि नदनारूपलक्षणवाक्य
ज्ञानसंभवान्नत्वाकांक्षापेक्षा नापि शाब्दबोधे पर्यवसायिमुख्यसंगतापेक्षेति केचित्तु एतद्वाक्यं दोषलक्षणं ज्ञापयित्वा दुष्टलक्षणं ज्ञापयतीति चेद्यैव धूमवन्तमभ्युपपरं धूमोस्तीति वाक्यवदाकांतस्फूर्णं
धिनैवानुमानादिना दुष्टलक्षणलाभ इति भावः यद्वा मूले तत्र लक्षणादिना निरूपणाये दुष्टहेत्वाभासत्वे पदार्थदोषत्वे घटेकत्वरूपसंसम्बन्धार्थान्वयानेकान्तमित्याहुः नोक्तानुपप
लिरिति दोषलक्षणस्यापि दुष्टज्ञानानुकूलव्यापाररूपदुष्टनिरूपणतयाना प्रतिज्ञानं चेति भावः दुष्टलक्षणेति अनुमितिप्रतिबंधकप्रमाविषयत्वे तु तावच्छेदकत्वरूप
पारिभाषिकदुष्टलक्षणेनेत्यर्थः तथा सत्युपधेयसंकरेपीति दूरग्रंथसंवादकथनासंगतेः नचेत्यादिसमीपग्रंथसंवादस्यैवौचित्यात् किंतु यौगिकदुष्टेत्यर्थः तथोच पारि
भाषिकलक्षणकरणेपि न ते चेत्यादिविभागग्रंथस्यासंगतिः किंतु उपधेयसंकरेपीत्यादिरेवलस्य दोषास्मारकत्वेन विरुद्धसव्यभिचारयोरभेदानुपस्थापनादि
निएलेन समीपग्रंथसंवादसंभवे दूरग्रंथसंवादकथनमनुचितं नमिसपाद्स्तं यत्तु नराभिप्रायेणान्यस्य दोषलक्षणाभिप्रायेणान्यार्थः सतिता सर्वे सर्वनाम्नां व्य
वहिनपरामर्शीकृतत्वात् एतद्रूपेण दोषासांकर्यकथनस्य नादराभिप्रायनियतत्वादिति तन्न दुष्टविभागव्याघातात् टीकाया असंगत्यापत्तेः न च नुमितिप
दस्यार्थकरणमनुचितं व्याप्यव्याप्यनुमितिमादाय सर्वत्र लक्षणसंगनेरत्र आहातिप्रसंगाद्विति ह्रदो वह्निमानित्यनुमितिनिष्ठानुमितित्वसमानाधिकरणाग्र
तिबध्यतानिरूपितप्रतिबंधकतानाक्रियन्तरूढो वह्न्यभाववानिति यथार्थज्ञानं तद्विषयीभूतवह्न्यभाववध्रदादेः पर्वतो वह्निमान् धूमादित्यादौ दोषता
प्रसंगादित्यर्थः हेतुकृतिरग्रीति वह्न्यभाववध्रदवारणाय प्रकृतपक्षनिवेशः तत्रैव जलत्वाभाववे सर्वतवारणाय प्रकृतसाध्यनिवेशः प्रकृतहेतुत्वेसु
पादानं चाग्रिमनादराज्यत्र नत्वाभावार्थं अन्यथा प्रमेयादिहेतुकानुमितिमादाय वह्निव्याप्यप्रमेयवत्त्वापरामर्शविरोधिनी वह्निव्यभिचारिप्रमेयादौ पर्व
लपसकवह्निसाध्यकधूमहेतावतिव्याप्ति[illegible]स्यातिरूनं च पर्वतो वह्निमान् धूमादिसाधिकरणे वह्निव्यापकीभूताभावप्रतियोगित्वेऽज्ञानिव्याप्तिः नस्य

५५

८

अजहेतुकत्वनाद्दरानुमितिप्रतिबंधकयथार्थज्ञानविषयत्वादित्यत्रापि हेतुकांतोपादानमिति वाच्यं धूमलिंगकत्वाद्दरानुमितिं प्रत्यपि जलवत्ताज्ञानस्य कारणे
नज्ञानस्य प्रतिबंधकत्वेन तदुपादानस्याकिंचित्करत्वात् अजहत्स्वार्थेति जहत्स्वार्थमिति जहत्स्वः जहत्स्वोऽर्थो यस्याः साजहत्स्वार्था ति भिन्नाअजहत्स्वार्थेतिवि
ग्रहः गंगायांघोषइत्यादौ स्वंगंगापदं तीररूपमर्थं जहत्तो जहत्स्वस्तीररूपोर्थः सएवार्थोजहत्स्वार्थलक्षणासाचप्रकृतेगंगाप्रवाहनिरूपितसंयोगसंबंधः संबं
धित्वेनार्थस्वज्ञानज्ञाप्यत्वंबोध्यंपरे तु गर्भबहुव्रीहेर्विग्रहघटकस्य स्वपदस्य लक्ष्यपरत्वाद्दतोविषयत्वाभावार्थकत्वाच्छतुः प्रयोजकत्वार्थकत्वाच्छकस्यार्थरूपा
न्यपदार्थविषयकत्वप्रयोजिकेतिविग्रहार्थविपरीतः स्वप्रयुक्ताभावप्रतियोगिविषयताश्रयोर्थः ततोगर्भबहुव्रीहेस्ताद्दराविषयताश्रयीभूतार्थस्या
र्थसंबंधित्वेनलक्षणाबोधः नञ्समासेचस्वप्रयुक्तविषयताश्रयत्वस्यार्थसंबंधित्वेन तद्बोधः संबंधोघटकत्वं वाक्यार्थस्यविशेष्यतया प्रवेशावतीअज
हत्स्वार्थेतिलक्षणं चेत्याहुः पर्वतोन्हदोवावन्हिमानित्याद्यनुमितिंप्रतिवन्हिव्याप्यद्रव्यवत्तापरामर्शस्यापि कारणतयावन्हिव्यभिचारिद्रव्यस्यवन्हिव्याप्य
घटवत्तापरामर्शस्यापि कारणतयावन्हिव्यभिचारिघटादेश्चताद्दरानुमितिनिष्ठकार्यतानिरूपकसंबंधीभूतताद्दरापरामर्शप्रतिबंध्यकीभूतपदा
र्थज्ञानविषयित्वात्सत्वात् अतिव्याप्तिरतः प्रकृतहेतुतावच्छेदकावच्छिन्नहेतुकेति तथाच धूमपरामर्शलिंगकानुमितिप्रयोगत्वं धूमपरामर्शस्यैवनप्र्या
दिपरामर्शस्येतिनदोषः तत्साक्षात्कारजनकसाक्षात्कारेनितत्साक्षात्कारोअनुमितिनिष्ठकार्यतासाक्षात्कारः अनुमितिः परामर्शरूपेति साक्षात्का
रेऽनुमितिसाक्षात्कारः परासाक्षात्कारस्य हेतुः किंचित्प्रतियोगिकं किंचिदनुयोगिकपदार्थसाक्षात्कारेतदुभयसाक्षात्कारकारणत्वस्यस्व
र्वसिद्धत्वेन संयोगादिवत्कार्यतायाअपितथात्वात्तत्साक्षात्कारेपरामर्शानुमित्युभयसाक्षात्कारस्य हेतुत्वात् ।। संबंधिद्वयनिरूप्यपदार्थप्रत्यक्षं

प्रतिसंबन्धिद्वयप्रसक्तस्य हेतुत्वमितिमिति सामान्यतएवोक्तं । इदानीं [illegible] तथापि अधिकरणत्वाधेयत्वसंयोगादिप्रसक्तत्वादिवत् विशिष्यैव कार्यतासाक्षात्कारत्वं कार्यतावच्छेदकं न
तु संबन्धसाक्षात्कारत्वं समवायसाक्षात्कारे व्यभिचारात् । ननु परामर्शानुमितिसाक्षात्कारयोः कथं कार्यतासाक्षात्कारजनकत्वं संभवेत् क्रमेणजायमानपरामर्शानुमित्योरेकदाक्रमे
णवासाक्षात्कारासंभवात् अनुमितिद्वितीयक्षणे परामर्शरूपविषयस्यैवासत्वादनुमित्युपरागेण कार्यतासाक्षात्कारसमयेऽनुमितेरपि नाशादिति चेत् अपेक्षाबुध्यात्मकयोः परामर्शा
नुमित्योः साक्षात्कारसत्ताप्रसिद्धिः न च ज्ञानादीनां क्षणिकत्वेन कारणमयोग्यविभुविशेषगुणानां स्वोत्तरोत्पन्नविभुविशेषगुणनाश्यत्वनियमादपेक्षाबुद्धेस्तृतीयक्षणएवोत्पत्तिः
स्वीकार्येतिप्राचीनोक्तानुपपत्तिर्दुर्वारैवेति वाच्यं अनुभवानुरोधेन ज्ञानादीनां तत्क्षणस्थायित्वस्यानाशकत्वस्वीकृत्य अपेक्षाबुद्धिद्वितीयक्षणे विशेषगुणोत्पत्तेरस्तुपगमात् अपेक्षातात्पर्ये भट्टाचा
र्यैरेवमेवोक्तत्वादित्येके मतं । घटादिरूपविषयस्य कार्यकालवृत्तितया कारणत्वनियमेऽपि ज्ञानस्थलेनायं नियमः । तस्य तत्स्वप्रत्यक्षपूर्वकालवृत्तितयैव कारणत्वस्वीकारात् तथैवानुभवात्
तथा च परामर्शतृतीयक्षणे एकदैव परामर्शानुमित्योः साक्षात्कारः । ततोऽनुमितौ कार्यतासाक्षात्कारः इति न्यायः । अपेक्षाबुध्यात्मके क्रमेण परामर्शानुमितौ ततः परामर्शत्वानुमितित्वयोर्निर्विक
ल्पकं ततस्तयोः सविकल्पकं सविकल्पकसत्तासमये परामर्शस्य विनष्टत्वेऽपि तत्पूर्वक्षणे सत्वात् एवं कार्यत्वस्यापि संबन्धवर्तमाने च गृह्यते चक्षुरादिनेसार्दो साक्षात्कारा अव्यवहितपूर्वक्षणे
संबद्धमित्यर्थ इति तद्विशेष्यरूपं मतं । वस्तुतस्तु परामर्शस्यानुमितिद्वितीयक्षणेऽपि साक्षात्कारसंभवात् तत एव कार्यतासाक्षात्कार इति न दोषः । ननु एतादृशविषयत्वात्मक
निरूपकत्वमनुमितिविशेषे एव परामर्शविशेषएवेव न सर्वत्रेति कथमुक्तरूपेण सकलपरामर्शादीनां लाभ इति चेन्न । तादृशकार्यतासाक्षात्कारत्वावच्छिन्नजन्यतानिरूपितजनकतावच्छे
दकविषयतानिरूपकतावच्छेदकरूपावच्छिन्नत्वेनात्सप्याति तादृशं च रूपमनुमितित्वपरामर्शत्वरूपमिति निखिलसंग्रहात् निखिलसंग्रहस्यैव प्रयोजनत्वेन शंकाया एवासंगतेश्च अत्र पर्वतोवन्हि
नुमितिः परामर्शकार्या इत्येव शाब्दबुद्धिर्बाध्याभावकार्येतियोग्यताज्ञानकार्येतिवा साक्षात्कारमादाय शाब्दबुद्धित्वरूपेमादाय तत्प्रतिबंधकप्रमाविषयेवन्ह्यभाववद्ध्रदेऽतिव्याप्तिरतो
जन्यतावच्छेदकनिवेशः पर्वतेवन्ह्यनुमितौ कार्यतानुमितिं प्रतितत्वा अव्यवन्हिविशिष्टह्रदशाब्दबुद्धित्वरूपलिंगपरामर्शस्य हेतुतया न ताविषयशाब्दबुद्धिमादाय बाधेऽतिव्याप्तिरतः

तादृशरूप२

(18)

१८ ६(एतद्दोषस्य प्रकृतलक्षणक्षतिकरत्वाभावेनोद्घाटनानर्हत्वात् भूतले घटः तद्घटो रूपवानिति ज्ञानयोरेकैकविशिष्टविषयकयोः संग्रहात्—)६

साक्षात्कारत्वनिवेशः जनकतायां साक्षात्कारनिष्ठत्वेन निवेश्यं प्रयोजनाभावात् अनुमितिशाब्दबुध्योः समूहालंबनसाक्षात्कारमादाय तद्दोषवारणाय जनकतावच्छेदकत्वोपादानं शाब्दबुद्ध्यनुमितित्वव्यापकसाक्षात्कारसाधारणजनकतावच्छेदिकामनुमितित्वावच्छिन्नविशेष्यितामादाय तद्दोष इति निरूपकतावच्छेदकरूपानुधावनं कार्यत्वं चाखंडोपाधिरनेन तस्यां तादृशपदार्थघटितत्वे विना साक्षात्कारानुपपत्तिः यत्तु अनुमितिः परामर्शकार्ये सलौकिकसाक्षात्कारे विशेषणतावच्छेदकप्रकारकनिर्णयमुद्रया विशेष्यतावच्छेदकप्रकारकनिर्णयमुद्रया च परामर्शत्वानुमितित्वनिर्णयापेक्षेति तन्न उक्तरीत्या कार्यतावच्छेदकप्रवेशस्यावश्यकतया यादृशविशिष्टवैशिष्ट्यबुद्धित्वं विशेषणज्ञानकार्यतावच्छेदकं तेनान्यस्यैव तस्य विशेष्यतावच्छेदकप्रकारकनिर्णयकार्यतावच्छेदकतया तदुपादाने ऽपरासंग्रहापातात् जगदीशस्तु भयसाधारणविषयतावच्छेदकविशिष्टविषयकनिर्णयत्वं जन्यतावच्छेदकमाहेति तन्मतेपि प्रकृते नैगतिरिति यथ्यनुमितिनिष्ठसाधर्म्यकरणं व्यर्थं समूहालंबनानुमितिमादाय सर्वत्र लक्षणासंगतेः अन्यत्र तादृशानुमितिमादायातिव्याप्तेरवतारकत्वसंगतेः न चापि प्रथमं समूहालंबनास्फूर्तौ तथात्वमिति ध्येयं। अनुमितिनिष्ठकार्यतेत्यादिकस्य परिष्कारबीजमाह। अत्रेति। ननु तादृशानुमितित्वव्यापककार्यतानिवेशाद्वह्निव्याप्यधूमवान्पर्वत इत्यादिपरामर्शकार्यतामादाय न दोषः अथ प्रामाण्यज्ञानानास्कंदिततल्लिंगकपरामर्शविशिष्टानुमितिं प्रत्येव प्रामाण्यज्ञानाभावविशिष्टतल्लिंगकपरामर्शत्वेन हेतुतया अप्रामाण्यज्ञानानास्कंदिततद्धेतुकपरामर्शस्थलीयतत्सपक्षकतत्साध्यकानुमितौ व्यापकताभंगादसंभव इति चेत् अप्रामाण्यज्ञानानास्कंदितत्वघटिततद्धेतुकत्वस्यैव व्याप्यतावच्छेदककोटौ निवेश्यत्वात् न च केवलतद्धेतुकत्वघटिततादृशानुमितित्वव्याप्यकार्यतानिवेशः संभवति। यद्यपि अनुमितिसाधारणतादृशधूमपरामर्शविशिष्टत्वावच्छिन्नकार्यतायास्तादृशानुमितिमात्रवृत्तित्वासिद्धेः यादृशव्यभिचारिण्यप्रामाण्यज्ञानास्कंदितएव परामर्शस्तादृशस्थलीयव्यभिचारेऽतिव्याप्तिरिति तु न शंक्यं तादृशस्थले मानाभावात्तत्र रूतेति। तथाविधग्रहत्वव्यापकप्रतिबध्यतेति। तादृशकार्यतासाक्षात्कारत्वावच्छिन्नकार्यतानिरूपितकारणतावच्छेदकविषयिताव्यापकप्रतिबध्यतेत्यर्थः एतेन तादृशसाक्षात्कारमात्रविषयत्वव्यापकत्वनिवेशे तादृशसाक्षात्कारविषयतायाः व्याप्यासिध्यादिस्थलीयानुमितिपरामर्शविषये पर्वतादावपि सत्वेन तत्राश्रयासिद्धिज्ञाननिरूपितप्रतिबध्यतायास्तद्व्यापकत्वाभावे

१८

अनुमितेनोतदंशे साक्षात्कारे वा ३

नाश्रयासिद्ध्याद्यवसंभवो दुर्वारः तादृशसाक्षात्कारविषयग्रहत्वव्यापकत्वनिवेशेन तद्धारणेपि मणिमयज्ञानं कांचनमयज्ञानवदित्यादौ तादृशानुमितिसाक्षात्कारविषयत्व
स्य मणिमयकांचनमयज्ञानादौ सत्वेन तादृशाश्रयासिद्धिप्रतिबध्यतायाः तद्व्यापकत्वाभावेन तत्र लक्षणागमनासंभवात् एवं कांचनमयः पर्वतः कांचनमयवह्निमानित्यादौ यत्र कांचे
३ त नमयपर्वतत्वेन पर्वतज्ञानं विशेष्यतया कांचनमयवह्नित्वेन वह्निज्ञानं प्रकारतया भातं तत्र तादृशानुमित्यादिविषयेपि तादृशसाक्षात्कारविषयग्रहत्वसत्वेन निरुक्तप्रतिबध्य
त्वासत्वेन व्यापकताभंगः एवं यदि यत्र पक्षतावच्छेदकादिरूपेण ज्ञानविषयिणी भ्रमानुमितिर्न कस्यापि जाता तादृशस्थले विशेषणवत्लक्षणासमन्वयः परोक्षांशत्वदस्तु
च्यते तद्दुभयविरोधिपक्षाश्रसिद्ध्यादावच्छेदकावच्छेदेन विधेयान्वयानुपपत्तिः एवं वह्निव्याप्यधूमवत्पर्वतत्वं घटवद्भूतलं च जानामीत्यादिरूपकार्यतासाक्षात्कारजनकतया तद्विष
यकग्रहत्वस्य घटवद्भूतलादिग्रहसाधारणतया घटाभाववद्भूतलादावतिव्याप्तिरिति प्रत्युक्तं विषयतासंबंधेन तादृशकारणतावच्छेदिकायाः विषयतायाः अनुमितिपरामर्श
योरेवसत्वात् मणिमयं ज्ञानमित्यादौ मणिमयज्ञाननिष्ठविषयितायाः जनकतावच्छेदकत्वाभावात् मणिमयघटज्ञानत्वादिपक्षतायां ज्ञाननिष्ठघटादिनिष्ठविषयितायाः अवच्छे
दकतासंबंधेन अवच्छेदकत्वेपि विषयतासंबंधावच्छिन्नतदभावान्न दोषः मृण्मयघटवद्भूतलज्ञानत्वादिना पक्षतायां घटाभाववद्भूतलरूपाश्रयासिद्धौ लक्षणासमन्वय इष्टः
अत्रेदमवधेयं तादृशकार्यताविषयकसाक्षात्कारत्वावच्छिन्नजनकतावच्छेदकविषयितावच्छिन्नप्रतिबध्यतेव अवश्या तथासति बाधादौ व्यभिचारादौ चाव्याप्त्यभावात् न च ह
दो जलवान्वह्निमानित्यादौ घटवत्त्विरहे घटवज्जिजलवान्वह्निमानित्यादौ घटवत्त्विरहे घटवज्जिजलेनास्ति व्याप्तेः तथापि धूमवह्निं चिद्विषयितासामान्यावच्छिन्नत्वनि
वेशात् इति। अथ स्वावच्छेदकत्वस्वनिरूपितकारणतावच्छेदकत्वान्यतरसंबंधेन प्रकृतपक्षसाध्यलिंगकानुमितित्वावच्छिन्नकार्यत्वोपलक्षितं यद्विषयि
त्वं तदवच्छिन्नप्रतिबध्यतेति क्रमेण निवेशान्नाव्याप्त्यतिव्याप्ती उपलक्षणतया कार्यतायाः निवेशात् अप्रतिबध्यतानवच्छेदकत्वेप्यसंभवः अत्र केचित् वह्निव्याप्य
धूमवत्पर्वतवानयं देश इति परामर्शस्याप्यनुमितिकारणतया तत्प्रतिबंधकयथार्थज्ञानविषये पर्वताभाववद्देशे अतिव्याप्तिः न च हेतुतावच्छेदकसंबंधावच्छिन्नाधेय

ता संबंधानवच्छिन्नप्रभृत्प्रकारितान्यत्वमात्रं वा विषयितायां निवेश्यं तथा चिताद्दशपर्वते घट इति ज्ञानमादाय न दोषात् । पक्षमुख्यविशेष्यकत्वपरामर्शे इति पक्षेऽपि
धूमव्यापकवह्निमद्भूमि काञ्चनमयधूमवान्पर्वत इति ज्ञानविरोधिनि काञ्चनमयत्वाभाववद्भूमे ।। तिव्याप्तिरिति । न च स्वावच्छेदकतावच्छेदकत्व स्वनिरूपितकारणतावच्छेदकतावच्छे
दकत्वान्यतरसंबंधेन कार्यताविशिष्टरूपविशिष्टविषयितावच्छिन्नप्रतिबध्यतानिवेशो युज्यते । यतोऽभिधेयत्वालघटितरूपमेव कार्यतावच्छेदकतावच्छेदकं प्रतिबध्यतावच्छेदक
तावच्छेदकं तु विषयितात्वघटितमिति तद्दसत्त्वं स्वावच्छेदकविषयितावच्छिन्नत्व स्वनिरूपितकारणतावच्छेदकतावच्छेदकरूपविशिष्टविषयितावच्छिन्नत्वान्यतरसंबंधेन का
र्यताविशिष्टप्रतिबध्यतोपादेया धूमव्यापकवह्निसमानाधिकरणकाञ्चनमयधूमवान्पर्वतः वह्निव्याप्यधूमवान्पर्वतो घटवानित्यादौ काञ्चनमयत्वावच्छिन्नधूमवि
रोध्यतात्वघटावच्छिन्नपर्वतविरोध्यतात्वं च न जनकतावच्छेदकघटकमित्यदोषः हेतुविषयितानिरूपितन व्यभिचाराद्यप्रकारितात्वं जनकताप्रतिबध्यतावच्छेदकता
वच्छेदकं इति नाव्याप्तिः काञ्चनमयपर्वतकालीनपर्वतादेः पक्षत्वेऽदृश्यतावच्छेदकताघटितस्यैव जनकतावच्छेदकतावच्छेदकत्वेऽपि प्रथमसंबंधवत्त्वादेव नाव्याप्तिः स्वविष
यकत्वान प्रतिबध्यतानवच्छेदकविषयितान्योन्य: अहस्तदीयत्वं वा विषयितायां निवेश्यं तथा विधविषयितान्यविषयितानवच्छिन्नाया प्रतिबध्यतोपादेयाम हावार्यम
ते विषयितयोर्नाभेदः किंत्वेकत्वघटावच्छेदकभावद्दसदोषो वेति वस्तुतस्तु परामर्शाव्यवहितोत्तरत्वस्य कार्यतावच्छेदकत्वेऽपक्षादिविषयिताया: कार्यतावच्छेदककोटौ प्रयोज
नाभावेनानिवेशात्तदवच्छिन्नकार्यताया अप्रसिध्याऽसंभवः एतेन प्रकृतानुमितित्वावच्छिन्नकार्यतासाक्षात्कारत्वावच्छिन्नजन्यतानिरूपितजनकतावच्छेदकविषयितानिरू
पकतावच्छेदकधर्मवत्त्वमर्थः स च धर्मः प्रकृतपक्षसाध्यकानुमितित्वं तादृशप्रकृतपरामर्शत्वं च एवं च तादृशधर्मघटकविषयितावच्छिन्नाया स्तादृशाया किं चिद्ध
र्मव्यापिकाया प्रतिबध्यताया: निवेशेनानाप्रदोष इदस्यपास्तं एवं प्रकृतपरामर्शजन्यतावच्छेदककोटिप्रविष्टविषयितावच्छिन्नप्रतिबध्यतानिवेशेनैवोपपत्तौ समूहालंब

संभवात्

नानुमितिस्तु व्याप्यत्वं यत्र वह्निव्याप्यधूमवद्धूमादिपरामर्शविशिष्टह्रदपक्षकवह्निसाध्यकानुमितित्वस्यैव तादृशपरामर्शजन्यतावच्छेदकतया साध्यवत्पक्षस्यैव साध्यव्याप्य
हेतुमत्पक्षस्यापि विषयिताया अपि जन्यतावच्छेदकतया सर्वत्राविलक्षणसमन्वेयोऽन्न चाथवाऽऽहितोत्तरत्वसंबंधेन परामर्शवत्त्वस्यासंतानजन्यसंयोगादिसाधारण्यादनुमितित्वे
निवेशगौरवरूपकत्वेऽपि विषयविषयिभावितानिवेशप्रयोजनाभावप्रवृत्तिर्वा व्यंपक्षतामपेक्ष्य परामर्शस्य विशेषसामग्रीत्वरक्षणाय विषयनिवेशस्यावश्यकत्वादिति चेत् परासंभवा
चार्यमते परामर्शस्य विशेषसामग्रीताभावेन विशेषणनिवेशस्याप्युद्भवात् पक्षसाध्यकत्वे एकेनैव लिंगेनानुमितिः तत्र प्रयोजनाभावेन परामर्शाव्यवहितोत्तरत्व
स्यापि कार्यतावच्छेदककोटौ न निवेशो न व्यभिचारापत्तिः प्रत्यक्षासिध्याहार्येवेति काञ्चनमयः पर्वतो वह्निमानिति साध्ये काञ्चनमयत्वाभावे स्वर्वतप्रभ काञ्चनमयत्ववत्प
र्वतोद्देश्यकानुमितौ काञ्चनमयत्वस्य सर्वतविशेष्यकपरामर्शो च विधेयितेन प्रकृतानुमितिनिष्ठकार्यतानिरूपकसंबंधिग्रहत्वमापकप्रतिबध्यतानिरूपितप्रतिबंधकता
शालितया तद्विषयेऽलक्षणासमन्वयरूपस्यार्थः न च व्याप्तिज्ञानेऽपि तादृशकार्यतानिरूपकसंबंधिग्रहत्वसत्त्वेन तत्र प्रतिबध्यताविरहात् कथमेतदिति वाच्यं । एतन्मते
व्याप्तिज्ञानादेरनुमितिस्वरूपायोग्यत्वात् अत्रेदं बोध्यं प्रकृतानुमितिनिष्ठकार्यतानिरूपकसंबंधिग्रहत्वं व्यापकत्वेन प्रवेश्यते किंतु प्रकृतपरामर्शाव्यवहितोत्तरक्षणोत्पत्तिकत्वे
विशिष्टानुमितित्वावच्छिन्नकार्यतासाक्षात्कारत्वावच्छिन्नजन्यतानिरूपितजनकतावच्छेदकविषयताविशिष्टग्रहत्वव्यापकत्वमेव एवं चात्रे साध्याभास एव नावकाश इति पर्वतो व
ह्निमान् ह्रदश्च तप्त इति समूहालंबनानुमितिनिष्ठवह्निविशिष्टह्रदनुमितित्वावच्छिन्नकार्यतायाः प्रकृतपरामर्शाव्यवहितोत्तरानुमितित्वावच्छिन्नत्वात् अत्र काञ्चनमयः पर्व
तो वह्निमान् ह्रदश्च तप्त इति समूहालंबनमादाय व्यापकप्रतिबध्यताप्रसिद्धेः पक्षासिध्याहार्यव्याप्तिवारणाय कार्यतायां निष्ठत्वं तद्विशेषप्रकृतपरामर्श[illegible]व्यवहि
तोत्तरानुमितित्वावच्छिन्नत्वेनिवेशः ; ह्रदो वह्निमानित्यत्रापि समूहालंबनात्मकसाक्षात्कारनिष्ठजन्यतानिरूपितजनकतावच्छेदकविषयिताप्रसक्तत्वेन व्यापकत्वमग्रे
इति तादृशसाक्षात्कारत्वावच्छिन्नत्वं जन्यतायामनुपात्तं तथापि जन्यतानिरूपितजनकताश्रयनिरूपितविषयताविशिष्टग्रहत्वे व्यापकत्वोत्तरीकारणीभूतसमूहालंबनसा

(काञ्चनमयपर्वतज्ञानं जनत[illegible]मनमणिज्ञानवत् काञ्चनमयत्वं वत्तात्)

(अवच्छेदकताभिन्ने) (एकमात्रलिंगकघटितत्वाभिप्रायः)

क्षाकारमादाय व्यापकत्वभंगः इति तादृशजनकतावच्छेदकविषयितोपादानं तादृशप्रतिबध्यतायां निरूपकविषयताव्यापकत्वनिवेशे कांचनमयः पर्वतो वह्निमान् इत्यनुमिति
साक्षात्कारीयविषयिताया वह्निपर्वतादिव्यक्तित्वेन पक्षताप्रसिद्धिज्ञाननिरूपितप्रतिबध्यतायां व्यापकत्वभंगः स्यात् तथाविधविषयताविशिष्टग्रहत्वनिवेशः न चैवं कां
चनमयघटज्ञानेऽगुणो ज्ञानत्वादित्यादौ पक्षीभूतघटज्ञाने निरूपकविषयताविशिष्टग्रहत्वसत्त्वेन पक्षताप्रसिद्धिग्रहप्रतिबध्यतासत्त्वेन च तत्र व्यापकत्वभंगः इति तत्र पक्षताप्र
सिद्ध्यादाववव्याप्तिरिति वाच्यं निरूपकजनकतावच्छेदकमुख्यप्रकारताप्रयोजकविषयताव्यापकप्रतिबध्यताया विवक्षितत्वात् एतादृशार्थलाभायैव ज्ञानग्रहत्वनिवेशः
इति दिक् । परं तु यादृशस्थले कार्यतासाक्षात्कारेण वज्रातः तादृशस्थले तद्घटितलक्षणं यथासंभवं ग्राह्यमिति बोध्यं । ननु उक्तानुमितिपदस्यानुमितित्वनिष्ठसाधर्म्यरूपमप्र
नितिं प्रयोजनं अनुमितिप्रयोजकीभूताभावेऽस्यादेरेवसम्बन्धात् अनुमितिपदं प्रकृतानुमितिपरं प्रयोजकत्वं च कारणसाधारणं बाधव्यभिचारज्ञानाभावादेः प्रयोज
कत्वेन लक्षणसमन्वयः यथार्थज्ञाननिष्ठाया अनुमितिप्रयोजकतावच्छेदकतात एवच्छेदकविषयताश्रयत्वमर्थः न चैवं व्याप्तिमानसत्वहेतुकपरामर्शमानसे वा विशेषणा
ज्ञानघटितलौकिकप्रत्यक्षसामग्र्यभावस्य हेतुतयानुमितिप्रयोजकत्वेन ज्ञानवैशिष्ट्यानवच्छिन्नत्वप्रतियोगिताश्रयविशेषणज्ञानविषयपदार्थवति व्याप्तिरिति वाच्यं
प्रतियोगितायां सत्त्वनिवेशे च ज्ञानवैशिष्ट्यानवच्छिन्नत्वनिवेशात् सामान्यकारणीभूतविशेषणज्ञाननिवेशात् धर्मितावच्छेदकज्ञानवैशिष्ट्यावच्छिन्नाया प्रतियोगिताया घटज्ञाने
सत्त्वेन ज्ञानवैशिष्ट्यानवच्छिन्नत्वेनानुधारतादुक्तमिति । मैवं व्यभिचारज्ञानाभावद्वारोपाधिज्ञानाभावस्यापि प्रयोजकत्वेनोपाधावतिव्याप्तेः कारणतत्कारणमात्रव्यक्ति प्रयोजकत्वविरो
धेमानाभावात् केचित्तु अक्षसंयोगत्वेन तादृशसाध्यव्याप्यवत्त्वज्ञानाभावविशिष्टकपिसंयोगाभाववत्ताज्ञानस्य विरोधितया कपिसंयोगाभाववविशिष्टसविषयताया स्व
रूपसंबन्धरूपावच्छेदकत्वसत्त्वेन तादृशव्याप्तिमाहुः तन्न कारणतानिवेशोप्यनतिप्रसक्तत्वात् विवक्षान्तरेणात्र नतद्दूरेतु अज्ञापितद्विषयो द्वारता । ननु प्रकृतानुमितित

५ तथापि पत्रघाक्लित्वेन ५

वच्छेदकीभूतप्रकृतहेतुतावच्छेदकावच्छिन्नदुष्टत्वं लक्ष्यतावच्छेदकमिति यावत्। साधनाप्रसिद्धस्थले च केवलधूमत्वादिकमेव तादृशं बोध्यं तद्रूपावच्छिन्नत्वविशिष्टदुष्टस्येत्यर्थः। अत्र
यत्किंचिद्रूपावच्छिन्नपक्षकत्वानिवेशे स्वलक्ष्यतावच्छेदकपरिष्कारे ह्रदत्वावच्छिन्नपक्षकवह्नित्वावच्छिन्नसाध्यकधूमत्वावच्छिन्नहेतुकानुमितिप्रतिबन्धकीभूतवह्न्यभाववद्ध्रदादिप्रकारकप्र
याथार्थ्यज्ञानविषयधूमादौ पर्वततत्समादाय यत्किंचिद्रूपावच्छिन्नपक्षकत्वघटितलक्ष्यतावच्छेदकत्वाभावादतिव्याप्तिरतस्तद्रूपावच्छिन्नपक्षकत्वोपादानं एवमेव यत्किंचिद्रूपावच्छिन्नसाध्य
कत्वे स्यानिवेशे जलत्वावच्छिन्नसाध्यकानुमितिमादाय जलाभाववत्पर्वतादिघटितेवह्नित्वमादाय तद्रूपावच्छिन्नसाध्यकत्वघटिततादृशरूपाभावादतिव्याप्तिरतस्तद्रूपावच्छिन्नसाध्यकत्वोपा
दानं एवमेव तद्रूपावच्छिन्नहेतुकत्वानिवेशे ज्ञानमूलपर्वतत्वावच्छिन्नपक्षकवह्नित्वावच्छिन्नसाध्यकद्रव्यत्वावच्छिन्नहेतुकस्थले धूमत्वादिना दुष्टत्वाभावादतिव्याप्तिरतः तेन रूपेणेति। दुष्टप
दार्थतावच्छेदके तथा तद्धूमनिवेशः पर्वतपक्षकवह्न्यादिसाध्यकधूमादिसद्धेतुमादाय तद्धर्मं तेन रूपेणासम्बन्धदुष्टत्वस्यानिवेशः एतादृशरूपं लक्ष्यतावच्छेदकीयं स्यादिति सपक्षसाध्य

२१ ते४ प५

हेतुकानुमितिप्रतिबंधकयथार्थज्ञानविषयत्वमात्रं लक्षणमुच्यते तदानुदेववह्निमान् धूमादित्यादौ वह्न्यभाववद्ह्रदे इति व्याप्तिः तत्र तादृशहेतुतावच्छेदकवत्वरूपलक्ष्यतावच्छेदकाभावादिस
र्थः। एतल्लक्षणं यद्धि ज्ञायमानदोषप्रतिबंधकतामताभिप्रायेण तदा सद्धेतुस्थले दोषस्याप्रसक्त्या यथार्थपदवैयर्थ्यं शंकते यद्यपीति। तथापीति। यद्यपि पर्वतत्वावच्छिन्नपक्षकेऽपि
पिवाच्यं तथाप्यनुमितिविरोधिबाधादावेव तस्य व्यवहारविषयत्वे साविष्करणाय तेनोक्तं पर्वते धूमसाध्यके ह्रदो वत्तत्प्रभो बोध्यः पर्वतपदरूपकारणसत्वात् धूमसाध्यकेन वह्नित्वेने
सनयोर्निरर्थकत्वं मत्वाय यथाश्रुतं समाधानमिति अभिमानेन वानुवृत्तित्वेनेत्यस्य सार्थक्यं शंकते नचेति। ननु स्वविषयकज्ञानविषयहेतुतावच्छेदकवत्वसंबंधावच्छिन्नायोऽप्रकृतानुमितिप्र
तिबंधकनिष्ठप्रकारतातव्याप्तिज्ञानविषयत्वं दुष्टत्वव्यवहारनियामकं तथा वह्नित्वे वैशिष्ट्यमपीति तादृशविषयत्वे वह्नित्वेऽभस्य ज्ञानासंभवे बाधेनेव तद्दोषवारणाय यथार्थपदं व्यर्थमेवसा
ज्ञायः तथा सती सादि। एतन्मते ज्ञायमानव्यभिचाराभावस्य व्याप्तिज्ञानमादाय अन्यथासिद्धत्वाभावेन व्यभिचारस्य साक्षादनुमितिप्रतिबंधकत्वस्य वक्तुमशक्यत्वाऽन्यलिंगकज्ञायमा
नव्यभिचारसत्वेऽन्यलिंगकानुमितिसुससाध्यभिचार इति तल्लिंगकत्वपक्षकत्वसाध्यकानुमितित्वं प्रतिबध्यतावच्छेदकीकृत्य ज्ञायमानव्यभिचारादेः प्रतिबंधकत्वं वाच्यं। यद्यपि परामर्श
र्शत्रस्यैव तस्य प्रतिबंधकत्वे सुवचं तथापि केचित्तु कारीयग्रंथेऽनुमितिपदस्य समूहालंबनानुमितिपरतया व्याख्यानात्सत्वे वह्निभद्द्वार्येऽस्ये हेतुप्रकारकज्ञानजन्ये समि
थ्यानादेवमभिहितं। तथा च वह्निर्धूमव्यभिचारीति ज्ञानानंतरं तद्व्याप्तिः धूमव्याप्यसत्प्रलिंगकव्याप्तिज्ञानजन्यधूमानुमितौ प्रतिबध्यतायास्तादृशानुमितौ तत्त्वव्यापकत्वभंग इति व्याप्यको
टौ तल्लिंगकत्वनिवेशावश्यक इति तल्लाभो वह्नित्वेनेत्यनेन वाच्यः तथा सति तादृशविशिष्यत्वमात्रस्य ज्ञासभासादावेव बाधितत्वेन तादृशव्यवहारापत्तिर्दुर्वारैवेति तद्वारणाय यथार्थपदमावश्यप
कमितिभावः। ननु वह्नित्वेन गुंजापुंजगाहिज्ञानजन्यानुमितेर्वह्नित्वविशिष्टहेतुज्ञानाजन्यता नास्तिवेत्यत्रैवं प्रतिबध्यप्रतिबंधकभावे वह्नित्वावच्छिन्नप्रकारताशालिपरामर्शजन्यत्व प्रवेशेऽपि
लक्षणो तद्विशिष्टप्रकारकपरामर्शजन्यत्वोक्तौ न बाधकमिति चेत् कांचनमयवह्निहेतुकस्थले तदप्रसिद्धेः धूमव्याप्यद्रव्यलिंगकपरामर्शजन्यानुमितौ धूमव्यभिचारि वह्नि प्रतिबध्य
तासत्वाच्च। एवं पर्वते वह्निसाधने धूमत्वेन धूमो दुष्ट इति व्यवहारापत्तिः हेतुतावच्छेदकीभूतधूमत्वघटितसंबंधेन द्रव्यत्वेन धूमप्रकारकज्ञानजन्यतादृशानुमितिप्रतिबंधकीभूतव
ह्निव्यभिचारित्वात्मकदोषप्रमासत्वात्तद्विशिष्टविषयिताकत्वनिवेशावैयर्थ्याच्चेत्यत आह तत्प्रकारतायां वेति। नचैवमपि पर्वते धूमसाधने वह्नित्वेन वह्निर्दुष्ट इति व्यवहारानुपपत्तिः व्या
द्धेनजन्यवह्निहेतुकानुमितौ वह्नित्वावच्छिन्नधूमसाध्यकानुमितित्वसत्वेऽपि प्रतिबध्य तथा व्यापकताभंगादिति वाच्यं प्रकृते हेतुतावच्छेदकप्रकारतावच्छेदकतापर्याप्तेर्वाच्यत्वादिति

२

प॰२

व्यभिचारादेः साक्षाद्विरोधितामते तु प्रकृतपक्षांशे प्रकृतसाध्यव्याप्तिविशिष्टप्रकृतहेतुतावच्छेदकावच्छिन्नप्रकारकत्वं तद्धेतुकत्वार्थ इति बोध्यं विशेष्य इति वह्नित्वेन सस्य धूमसाध्यका
र्थकधूमपदस्य च सार्थक्यं साधनेरिति तु न सम्यक् सामर्थ्यमेव तत्सार्थक्यमभिप्रेत्याह यथेति। तथा च धूमसाधने इत्यस्य धूमसाध्यकवह्निहेतुकानुमिताविसर्थः निरूपितत्वं सामर्थ्यं दुष्टधा
तोः प्रतिबंधकमात्रमर्थः क्रमप्रसमार्थः प्रकारकज्ञानविषयत्वं तथा च धूमसाधने वह्नित्वेनायं दुष्टः स्याद्धो धूमसाध्यकवह्निहेतुकानुमितिप्रतिबंधकप्रकारकज्ञानविषयत्वं वह्नित्वोभयत्वा
भइति भावः साधनपदार्थानन्वयप्रसंगादिति एतेन साधनपदार्थानुमितेरभेदेनान्वयार्थानुमितौ नान्वयः द्वेधाभानापत्तेः साधनपदस्य सम्बन्धत्वाद्यदि च साधनं विधेयता निरूपितत्वं स
मर्थ्यः वह्नित्वावच्छिन्नहेतुकानुमितिप्रतिबंधकं दुष्टत्वात्पर्यस्तदा धूमसाधने ऽनुमितिरिति व्यवहारापत्तिरिति सूचितं। एवमपीति। यथार्थपदादानेतद्धर्मावच्छिन्ने दुष्टत्वव्यवहारे तद्धर्मावच्छिन्न
लिंगकानुमितेरेव दुष्टत्वं तत्पर्यवस्य कृतयावह्नित्वावच्छिन्नहेतुकानुमितिमादाय रासभे ताद्दृश्यव्यवहारस्य वारणात् किं यथार्थत्वेनेति तदसत् प्रकारतावच्छेदकसंबंधोयद्धर्मघटितः तद्धर्मावच्छिन्न
हेतुकानुमितेरेव तद्दुष्टकत्वमिसाध्यायेन तदुपादानात् अन्यथा यथार्थपदादानेपि द्रव्यत्वेन वह्निसाधने द्रव्यं दुष्टमिति वत् धूमो दुष्ट इति व्यवहारप्रसंगः धूमे हेतुतावच्छेदकीभूतद्रव्यत्वघटितसंबंधेन द्रव्य
त्वेन धूमप्रकारकज्ञानजन्यतादृशानुमितिप्रतिबंधकीभूतवह्निव्यभिचारादिमत्त्वात् एकदेशप्रमासत्त्वात् दुष्टपदार्थान्वयितावच्छेदकत्वोपलक्षितधर्मावच्छिन्नलिंगकानुमितेः साधनपदार्थघ
टकत्वे वह्निना धूमसाधने रासभो दुष्ट इति व्यवहारवारणाय यथार्थत्वं अर्थं एवं तद्रूपावच्छिन्नस्य दुष्टता व्यवहारस्थले तद्धर्मघटितसंबंधावच्छिन्नप्रकारताया एव भानमुचितं न स्वज्ञानविषयता स
मत्वं वेत्तु प्रकृतहेतुतावच्छेदकाघटितत्वात् संबंधाप्रवेनेति किं यथार्थत्वेनेत्यतः स्वव्यभिचारादित्वप्रमानं विरुद्धादिसाकर्याद्व्यवहारमात्रं प्रयोजनमास्तां इह तु व्याप्तिरतिव्याप्तिर्लि
ङ्गेतं निवेशयति अथवेति सद्धेतौ नर्दिधनादौ तथा च दुष्टेतरभेदस्य धूमव्याप्यत्वेन विशेषेऽनुमितिप्रतिबंधकीभूतधूमाभाववद्वृत्तिवह्निप्रकारकभ्रमविषयत्वसत्त्वादिति भावः अत्रा
यं न्यायप्रयोगः पर्वतपक्षकधूमसाध्यकवह्निहेतुकानुमितिजनकपरामर्शविषयतावच्छेदकहेतुतावच्छेदकावच्छिन्नः प्रकृतसाध्यनिरूपितव्याप्तिविशिष्टप्रकृतपक्षधर्मत्वरूपात्म स
द्धेतुत्वावच्छिन्नप्रतियोगिताकभेदवान् प्रकृतपक्षकप्रकृतसाध्यकप्रकृतहेतुकानुमितिप्रतिबंधकप्रकारकप्रमाविशेष्यत्वादिति यत्तु प्रमापदानुपादाने पर्वतनिष्ठरूपादौ व्यभिचार इत्यतः प्रमापदमिति
तित्वं न वह्निमान् धूमादित्यादौ समवायेन हेतौ व्यभिचारवारणाय हेतुतावच्छेदकसंबंधेन पक्षधर्मता यावान्यतया व्यभिचारानवकाशात् नन्वेवमपि धूमव्याप्यवन्नो व्यभिचार इति चेन्न यतो य
द्रूपावच्छिन्नानुयोगिताकेन संबंधेन सद्धेतुतावत्तितद्व्यरूपावच्छिन्नानुयोगिताकेन संबंधेन तद्वच्छिन्नभेदोप्युपपन्ने धूमव्याप्यव्यतिरिक्तत्वे तत्प्रकारतावच्छिन्नानुयोगिताकेन स

२२ बंधेन सद्धेतुत्वसत्वेपि तदवच्छिन्नभेदोवह्निसावच्छिन्नानुयोगिताकेन संबंधेन घटत एवं यद्रूपावच्छिन्नानुयोगिताकेन संबंधेन हेतुता तद्रूपावच्छिन्नानुयोगिताकेन साध्यसाधनमभिमतं ॥
अन्यथा विशेष्यत्वमात्रस्यैव तत्साधकत्वसंभवात्तादृशप्रमीयत्ववैयर्थ्यापातात् । अस्मीकं च धूमत्वावच्छिन्नानुयोगिताकसंबंधेन विशेष्यतावत्तितादृशसंबंधेन सद्धेतुभेदस्या
सत्वाद्व्यभिचारः स्यादिति तद्विशेषणस्यावश्यकत्वात् विशेष्यतायाश्च तद्वह्नित्वावच्छिन्नानुयोगिकसंबंधो न संबंधः एवं च तदिंधनरूपव्याप्यद्रव्यत्वादिना सद्धेतुत्वावच्छिन्नभे
दसत्वेपि नासंगतिः तदिंधनत्वावच्छिन्नानुयोगितासंबंधेन तथाविधज्ञानविषयतावत्तितादृशसंबंधेन साध्यसत्वेन व्यभिचारप्रसक्तेरिति । यद्रूपतथाविधहेतुतावच्छेदकेसद्धे
तुभिन्नत्वावच्छेदकत्वे साधन——विशेष्यतावच्छेदकत्वेनाभिमतं एवं तत्रेव रूपादेः पक्षत्वरूपत्वानुरोधेन साध्यव्याप्यवच्छिन्नपक्षधर्मत्वावच्छिन्नोभयभेद एव एवमपि द्रव्यत्वावच्छिन्नसो
व्यकसत्तायां विशिष्टसत्तानिष्ठसद्धेतुत्वावच्छिन्नभेदविरहेणाव्यभिचारः स्वाधिकरणावृत्तिसाध्याभावकत्वं च सद्धेतुत्वघटकमास्तिति चेत्तर्हि तत्र सत्तात्वे सद्धेतुतावच्छेदकतापर्याप्त्य
धिकरणभेदः साधनीयः तत्रापि हेतोर्याथार्थ्यप्रयोजनं संभवतीति दिक् । अथवा सद्धेतुत्वावच्छिन्नापर्याप्तविषयतापर्याप्त्याश्रयत्वं रूपपारिभाषिकभेदः अनुपसंहारित्वरूप
दोषस्यालिंगघटकत्वं वह्निमत्ताप्रकारकप्रमाविषयत्वं धूमवत्ताप्रकारकप्रमाविषयत्वाद्याः व्यतिरेकव्याप्यव्यापकभावरूपव्यधिकरणसंबंधेन वा अयसादिरूपसाध्याभावस्य ते
पसादिरूपपक्षे साधनेदृष्टव्यं । वस्तुतस्तु सद्धेतुत्वं व्याप्याव्याप्यक[illegible]नानेव यादृशपक्षसाध्यकेयावंतो दोषाः प्रसिध्यंति प्रतिबध्यानुमितिश्च तावत्सद्धेतुभेदा एव साधनी
याः तथा च कांचनमयवायुः कांचनमयगंधवान् कांचनमयस्नेहादिसाध्ये गंधव्याप्यत्वादीनामिवाबाधितत्वादेरपि सिद्धिरिति भावः । बाधि कर[णा]वृत्तिसाध्याभाव
कत्वं च सद्धेतुत्वघटकमिति चेत्तर्हि तत्र सत्ता(?) दुष्टतरत्वावच्छिन्नभेद एव वा साध्यः नन्वेवं धूमवान्प्रमेयादित्यादौ दुष्टतरप्रसिद्धिः सामान्यत एव वा दुष्टतरप्रसिद्धिः न च स्वज्ञानवि
षयप्रकृतहेतुतावच्छेदकवत्वसंबंधेन दुष्टत्वमेव साध्यं तस्यैव दुष्टतरभेदरूपत्वादिति वाच्यं तथापि धूमवान्वह्नेरित्यादौ तादृशसंबंधावच्छिन्नसाध्याभाववत्तिरस्मभादौ तादृशप्रतिबं
धकप्रकारकभ्रमविषयतासत्वेन व्यभिचारसंभवात् सद्धेतावपि सत्संगतं स्यादिति [illegible] चेत्र केचित् सद्धेतावपि स्वस्य प्रकृतहेतुभिन्नो दुष्टत्वार्थः यद्वा प्रकृतसाध्यव्यभिचारितावच्छेदकत्वो
पलक्षितधर्मवत्वसंबंधेन दुष्टत्वसाधनान्नतदसंगतिरित्याहुः वस्तुतस्तु यद्धर्मावच्छिन्नपक्षसाध्यहेतुकानुमितिप्रतिबंधकत्वनिष्ठविषयकज्ञानविषयदुष्टतावच्छेदकत्वोपलक्षितयद्धर्मवत्वे
संबंधावच्छिन्नप्रकारताकयथार्थज्ञानविषयत्वं यत्र तत्र तद्धर्मावच्छिन्नपक्षसाध्यहेतुकानुमितिप्रतिबंधकनिष्ठतद्धर्मघटितसंबंधावच्छिन्नावच्छेदकताकभेदावच्छिन्नप्रतियोगिताके २

(सद्धर्मत्वादिघटिततादृशसंबंधेनापि सद्धेतावपि दुष्टत्वसत्वेनतदभावेनापि न सिद्ध + व्यभिचारसंभवदुस्तरत्वः) स्व

भेदकृतिसामान्यमुखीमानौपयिकार्थत्वानुपादाने सर्वेषामेव साधनानां सर्वसाध्यव्यभिचारित्वं संकेतावेवेति प्रकाशनाय तथोक्तं। धूमवानग्नेर्यादिसाधने च धूमव्यभिचारि अग्नेर्यत्तुवि
शिष्टं चायोगोलकीयवह्न्यादावेव नत्वार्द्रेन्धनजवह्नौ रूपसमवायस्य वायौ सत्वेपि रूपस्यैव हेतुतावच्छेदकीभूतमेयत्वस्य सत्वेपि व्यभिचारस्याभावादिति साध्यं च नाघजन्यवह्न्यादावनुयोगि
कमेयत्वलाघवच्छेदेन दुष्टेतरभेदनिर्वाहात्। अत्र च यद्रूपावच्छिन्नविषयतासामान्ये मिसादिनोपलक्षणीभूतेन तादृशविषयतावच्छेदकत्वेन दोषतावच्छेदकस्य निवेशनीयत्वेन भ्रान्तिः
तत्र दुष्टे तत्तद्दोषावद्भ्यान्यत्वस्यैव तत्तद्दोषप्रकारकैपयार्थज्ञानविषयतया हेतुना साधनीयत्वात् वस्तुतस्तु भेदस्य व्याप्यवृत्तित्वेनोक्तसंबंधेन दुष्टत्वमेव साधनीयं सर्वथा पक्षता
वच्छेदके स्वरूपसंबंधरूपसाध्यावच्छेदकत्वसाधनमभिमतं तेन पर्वतपक्षकवह्निसाध्यक धूमत्वेन धूमपक्षीकरणे स दुष्टत्वसाधनस्य न प्रमात्वप्रसंगः तथा चोक्तेन संबंधेन तद्घा
व्ये साधनसत्वेपि कृष्णत्वादिना दुष्टत्वमस्त्येवेति। शुद्धहेतुतावच्छेदकं गुरुत्व सविशिष्टहेतुतावच्छेदकरूपव्यभिचारादेरव्यवहार्यत्वात् तद्देवसाधनीयमित्यप्याहुः अत्र च वह्निमान् द्रव्यादिति
प्रयोगः स्यात् द्रव्यत्वसामानाधिकरण्येन साध्यव्याप्तिमत्वादिति न दोषः तत्पाससति सामानाधिकरण्येन व्यभिचारस्याविरोधितया अवच्छेदकावच्छेदेनाप्रसिद्ध्या निर्दुष्टत्वं स्यादिति अवच्छेद
कावच्छेदेन व्याप्यपेक्षणात् इदं तु बोध्यं तृतीयान्तप्रकृतलिंगवाचकपदसमभिव्याहारस्थले एवानुमितेः समभिव्याहृततदुष्टपदार्थान्वयितावच्छेदकधर्मावच्छिन्नहेतुकत्वेन साध
नादिपदार्थमध्ये प्रवेशः अन्यत्र तदविशेषितानुमितित्वेनेति वह्निना धूमसाधने वह्निर्दुष्ट इत्यादौ तृतीयार्थान्वयः अन्यथा वह्नौ तदर्थतादात्म्यान्वये परं वह्निहेतुकानुमितौ न तृ
तीयान्तार्थवह्निहेतुकत्वान्वयानुपपत्तिः एतेन वह्निनेत्यत्र तृतीयाया अभेदार्थकत[illegible]पाव न्य भेदस्यापि तद्व्यवहारनियामकतयोपपत्तेर्यथार्थपदं व्यर्थमित्यत आह यथेति प्र
सुक्तं। यथान्येन यथार्थमिति प्रयोगवारणाय उद्देश्ये स्वाभेदस्याप्यन्वयस्यासुसन्नतया वह्निना धूमसाधने वह्निर्दुष्ट इति व्यवहारानुपपत्तिप्रसंगात्। एतेन तृतीयान्तस्य वह्निसा
वच्छिन्नहेतुकत्वार्थकत्वेपि यथार्थपदोपादाने वह्निना धूमसाधने रासभो दुष्ट इति व्यवहारो दुर्वारः अनुमितिसामान्यपर्यन्तानिवेशेन रासभजन्यत्वभयलिंगकानुमितेः साधनप
दार्थत्वसंभवादिति यथाश्रुतं किंचिल्लिंगकत्वे गुरुत्व सत्तृतीयान्तार्थान्वयस्यासुसन्नत्वात् न च अत्र पर्वते धूमसाधने वह्निर्दुष्ट इत्यादौ यद्धर्माभाववच्छिन्नत्वविशिष्टं वह्नित्वं तदवच्छिन्न
विषयतासामान्ये प्रकृतानुमितिप्रतिबंधकतावच्छेदकं तद्विशिष्टप्रकारकप्रमाविषयत्वप्रसंगात् तथा च पर्वते वह्निसाधने धूमो न दुष्ट इति व्यवहारानुपपत्तिः न च समभिव्या

(=तादृशप्रतिबंधकतावच्छेदकविषयतात्वादिने सर्व:=)

हारस्थले यत्र धर्मिणि यद्धत्त्वं प्रतीयते नञ्समभिव्याहारे तत्र धर्मिणि तत्संबंधावच्छिन्नतदभावबोधनियमात्तत्र समभिव्याहृतपदार्थान्वितद्रूपाद्यर्थाप्रसिध्यात्तदभाव
बोधासंभवादिति चेत्सत्वं नञ्समभिव्याहारे स्वविशेष्यतानिरूपितप्रमीयप्रकारताश्रयविशेष्यकप्रमानिरूपितत्वाभावविशिष्टतत्सक्षकतत्साध्यकतद्धेतुकानुमितिप्रतिबंधक
तावच्छेदकीभूतविषयताकाभेद: प्रतीयतेऽनन्यगतिकत्वात् विषयतात्वावच्छेदेन तादृशनिरूपितत्वाभावो बोध्य: तेन साध्याभाववत्वादिनाप्यावगाहि व्यभिचारादिभ्रमप्रमा
दाय धूमसाधने वह्निर्न दुष्ट इत्यादिव्यवहार: इत्थं चेतरभेदानुमापकमेवेदं लक्षणं व्यवहारस्तु तादृशप्रतिबंधकतावच्छेदकप्रमीयविषयताविशिष्टप्रकारकप्रमाविशेष्यत्वनिबं
धन एवेनन्वेवं वह्निना धूमसाधने रासभो न दुष्ट इति व्यवहारस्येतन्मतेपि रासभविशेष्यतानिरूपितप्रमाप्रकारताश्रयविशेष्यकप्रमानिरूपितत्वाभावविशिष्टतादृशप्रतिबंधक
क तावच्छेदकविषयताकाभेदविषयकतया स्वविशेष्यतानिरूपितप्रमाप्रकारत्वाभावविशिष्टतादृशप्रतिबंधकतावच्छेदकप्रमाविषयताकाभेदविषयतया वोपपादनीय: नन्वेवम
पि द्रव्येण वह्निसाधने धूमो दुष्ट इति व्यवहारापत्ति: द्रव्येण वह्निसाधने धूमो न दुष्ट इति व्यवहारानुपपत्तिश्च यद्धि वह्निव्यभिचारिद्रव्यवान् धूम इति ज्ञानस्य प्रमात्वादिति चेन्न
धर्मितावच्छेदकतापन्नहेतुतावच्छेदकस्यैव प्रकारतावच्छेदकसंबंधघटकत्वात् तादृशप्रतिबंधकतासमानाधिकरणप्रकारतानिरूपितसंसर्गतासामान्ये स्वविशेष्यत्वाभाव:
स्वनिरूपकप्रमानिरूपितत्व स्वावच्छेदकवृत्तित्वोभयसंबंधावच्छिन्नप्रतियोगिताको वा बोध्य: तेन द्रव्यत्वघटितेन धूमत्वघटितेन वा संबंधेन द्रव्येण वह्निसाधने धूमो दुष्ट इति भ्रमसंभवेपि
नानुपपत्तिरिति दुष्टत्वादे: प्रतिबंधकतामात्रं द्रुपधात्वर्थ: स्वविशिष्टप्रकारताकप्रमाविशेष्यतासंबंधावच्छिन्नाश्रयत्वं तत्प्रत्ययार्थ: वैशिष्ट्यं च स्वावच्छिन्नविषयताव्यापकतद
वच्छेदकताकधर्मवत्त्वसंबंधेन तदधिकरणे स्वरूपसंबंधेन वृत्तित्वरूपसामानाधिकरण्यसंबंधेन एवं च न दुष्ट इत्यत्र दृशाधिकरणसंबंधावच्छिन्नाभावप्रत्यय: अनायत्याप्र
सिद्धार्थस्य संसर्गतोपगमादिति तु न्याय: अत्रेपि तृतीयलक्षणेपि ज्ञानीयेति। न च रूपेवा ह्निमानित्यादौ जातिमद्वृत्तिवन्हेरभावादे: प्रतिबंधकत्वप्रसंग: यत: पक्षताव
च्छेदकादौ निरवच्छिन्नावच्छेदकतैव निवेश्या: जलं वह्निवत्त्वाभावादौ पक्षतावच्छेदकतावच्छेदकजलत्वे त्वादौ चात्र स्यादिति पथ्यापथ्यमूढ्या निरवच्छिन्नत्वाप्रवेशेन विष
यताया: संसर्गत्वे तदीयसंबंधद्वयानिवेशेन लाघवादाहा तादृशेति। जातित्वावच्छिन्नविषयिताघटितविषयतायाश्च न प्रतिबंधकतावच्छेदकताघटकसंबंधता, व्यविशं

मा

(ऽत्र तत्सादृश्यात्कविरोधर्मो नोपादेयमिति भावः ॥)

ज्ञानत्वेन प्रतिबंधकतावच्छेदकत्वे च लाघवमेवेतत्कल्पावतारबीजं बोध्यं तु साधारण्येन प्रतिबध्यज्ञानधर्मितावच्छेदकावच्छिन्नविशेष्यतानिरूपिततद्धर्मावच्छिन्नप्रकारताशालिज्ञा
नविशिष्टत्वान्नीया साधारण्यत्वावच्छिन्नविषयतानिरूपिततद्धर्मावच्छिन्नविषयताकत्वेन प्रतिबंधकत्वं बोध्यं प्रतिबंधकता कालिकसंबंधेन बोध्या। यद्रूपेति। यद्विषयतासामान्य
निवेशे केवलाभावविशिष्टहृदस्य हृदत्वेन तथा तद्विषयतासामान्ये निवेशस्य न प्रतिबंधकतावच्छेदकत्वमिति यद्रूपानुभावनैव स्वाभाववान् हृद इति ज्ञानीयस्वाभावप्रकारतायाः स्वरूप
संबंधरूपावच्छेदकता तत्वस्वाभावेऽतिव्याप्तिरतः सामान्यपदोपादानं। दोषलक्षणस्याप्रकृतत्वेन वह्न्याभाववज्जलादिमद् इति जलवत्प्रदादिकमादाय दुष्टत्वेनानीतिः। दोषघटितत्व
कथनं तु दोषेणाविघटितत्वप्रदर्शकमिति न तद्विरोधः। ननु समानाकारकज्ञानीयविषयताया ऐक्यात्साधारणमयो न वह्निमान् पर्वतश्च पाषाणमय इति ज्ञानीयपाषाणमयत्वविशि
ष्टपर्वतनिष्ठविषयतासामान्यस्य प्रकृतानुमितिनिष्ठप्रतिबध्यतानिरूपितप्रतिबंधकतानिरूपिते स्वरूपसंबंधरूपावच्छेदकत्वाश्रयत्वेन तद्रूपावच्छिन्नपाषाणमयपर्वतप्रकारकयथार्थ
ज्ञानविषयत्वस्य धूमे सत्वेनातिव्याप्तिरतो न्यूनानतिरिक्तत्वनिवेशः। प्रतिबंधकताया अव्याप्यवृत्तित्वे स्वीकार्ये तथा च सामान्यपदस्यार्थे न च पर्वतो न स्वाभाववानिति ज्ञानीयस्वाभावत्वावच्छिन्नप्र
कारतानिरूपितधर्मितायामसंभववारणाय प्रतिबंधकताभावाधिकरणतावच्छेदककालावच्छिन्नतद्धर्मानधिकरणत्वानिरूपकत्वस्य न्यूनानतिरिक्तत्वरूपत्वात् स्वाभावप्रकारतानिरूपितविषय
तायाः प्रतिबंधकतानतिरिक्तवृत्तित्वेनासंभवो न तु अनाहार्यप्रामाण्यज्ञानानास्कंदितनिश्चयीयविविधविषयितानिवेशात्तत्र विशिष्टस्य शुद्धादनतिरिक्तत्वात्प्रतिबंधकतानति
रिक्तवृत्तित्वं दुर्घटमिति प्रतिबंधकतायां तद्व्यापकत्वमेव निवेश्यं तच्च तादृशविशिष्टविषयताधिकरणतावच्छेदककालावच्छिन्नतद्धर्माभावप्रतियोगितानवच्छेदकत्वं तत्र तादृश
विशिष्टविषयतासामानाधिकरण्यं प्रवेशान्नासंभवो न वा पर्वतपक्षकवह्निसाध्यकधूमहेतुकानुमितिप्रतिबंधकतायास्तादृशज्ञानीयपर्वतनिरूपितत्वविशिष्टवन्ह्यभावत्वाव
च्छिन्नविषयतात्वावच्छिन्नाव्यापकत्वात् वह्न्यभावेऽतिव्याप्तिरिति चेन्न प्रतियोगितारूपप्रतिबंधकतायां व्याप्यवृत्तित्वेन पर्वते वन्ह्यभाव इति ज्ञानीयविषयतात्वावच्छिन्नप्रतिबंधक
तायाः वन्ह्यभावत्वावच्छिन्नविषयतात्वावच्छिन्नव्यापकतया वह्न्यभावे तु करी साधपाषाणमयपर्वते नातिव्याप्तिर्दुर्वारैवेति स्वरूपसंबंधरूपावच्छेदकत्वस्य न निवेशः। वन्ह्यभाव
त्वावच्छिन्नविषयताविशेष्यस्य तादृशावच्छेदकत्वान्न दोषो दुर्वार इति सामान्यपदनिवेशः। ज्ञानभेदेन विषयताभेदस्येतल्लक्षणस्य संभवतया पाषाणमयत्वविशिष्टपर्व

२८

तेनातिव्याप्तिः। अविशिष्टज्ञानीयविषयतायाः सामान्यान्तर्गतायाः अनवच्छेदकत्वात् यद्रूपावच्छिन्नविषयतायां पक्षधर्मताज्ञानाकालीनासाधारण्यविषयकज्ञानीयान्य
त्वोपाधीनां असाधारण्ये संग्रहः। संशयादिविषयताया अनवच्छेदकतया निश्चयनिरूपितत्वे विषयताविशेषणानि वेद्यं। तदभेदमते तु यद्रूपावच्छिन्नविषयताशालिज्ञानसामा
न्यं प्रतिबन्धकतावच्छेदकमित्युक्तोपाधीनामप्यपर्वतादिमुद्रासः। परं तु असाधारण्यं पक्षवृत्तित्वघटिततद्घटितत्वे तु पूर्वोक्तज्ञानान्यत्वं देयमिति दिक्॥ यद्रूपावच्छिन्नविषयि
तायां प्रतिबन्धकतावच्छेदकत्वं मुसाद्यति (?)। ह्रद इति सामान्यपदोपादानव्यवच्छेद्यं स्फुटयति सङ्केतुस्थले इति। ज्ञायमानेति। तथा च षष्ठीसमासोऽहेयः तद्धेतुतावच्छेदकेति
दोषातिव्याप्तिवारणार्थं यथार्थेति। अन्यथा पर्वतो निर्वह्निर्धूमश्चेति ज्ञाने धारणात् दोषेति। तेन नोपधेयसंकरेऽपीत्यादिग्रन्थसंगतिः। आपाद्यस्येति आपाद्यतरं दुष्टधा
त्वर्थकहेत्वाभासपदं मूले पूरणीयमित्याशयः। तत्त्वं वेति। मूले वा तत्त्वमिति योजना। निर्देशपक्षादिति। यथार्थपदवैयर्थ्याद्ध्वारतः (?)। श्रीरामः = ध ध ध ध ध
श्रीसीतारामचन्द्राभ्यां नमः। निष्प्रयोजनकत्वेति। ननु लिंगात् ज्ञानमिति मुख्यसालिंगज्ञानं दोषानुमितिः तथा चानुमितिनिष्ठयादृशविशिष्टविषयकत्वं प्रकृतानुमितिविरोधितानतिरिक्त
वृत्तित्वमिति लक्षणं स्युवं (?) तथा चाप्रामाण्यज्ञानानास्कंदितत्वमात्रं निवेश्यं न त्वनाहार्यत्वनिश्चयत्वे अपि परोक्षज्ञाने आहार्यत्वसंशयत्वयोरभावादिति चेन्न दोषविषयकानुमिस
प्रसिद्धिस्थलेऽव्याप्तेः परं तु आकांक्षायोग्यतासत्त्वेऽपि निगमनाविरहेण प्रवेशः स्यात् तावता पुनरुक्तलाघवस्यानपायादित्याहुः। ये तु कार्यनिसंकार्यत्वादिसाधारणनिसकार्यं दोषः तद
नुमितौ यो हेतुस्तस्य पक्षवृत्तित्वेऽसाधारण्यमन्यथा सव्यभिचारित्वमिति तद्विशेषां इदानीं यादृशविशिष्टविषयकत्वविवेचनात् प्राकू संगतेनेति। यस्य दस्यात्वं उक्तिवचनतात्।
दोषितो विशिष्टपदस्य लक्षणासमन्वयप्रदर्शकतया यादृशविशिष्टविषयकत्वं लक्षणघटकं तद्विवृणोति। यद्रूपेति। यद्रूपावच्छिन्नं विषयो विषयितानिरूपकं यस्येति विग्रहे
विशेषणीभूतधर्मान्तरविशिष्टेन विशेष्यस्य भाने तादृशधर्मान्तरविशेष्यत्वं अपि तावच्छेदकत्वभाननियमाद् यद्रूपावच्छिन्नतद्वृत्तिविषयताकत्वस्याभावादित्यन्यत्र विस्तरः।
अथ यद्रूपाद्येन किंधर्मविशेषतावच्छेदकमिति चेत् यदि वन्ह्यभाववद्ध्रदत्वोभयं तदेकत्र ह्रदयमिति रीत्या जायमाने वन्ह्यभाववान् ह्रद इति ज्ञानेऽपि वन्ह्यभाववद्ध्रदत्वोभयावच्छिन्नविषयि

२८

तोसत्तात्तादृशज्ञानस्य रूपप्रकारकवह्निसाध्यकानुमितिप्रतिबंधकत्वादसंभवः। यदि च समूहालंबनेविशेष्यत्वं नैकनिरूपकप्रकारताभेदेन भेदाद्दतो न दोष इत्युच्यते तदाविवच्य
भावधर्मितावच्छेदककहृदत्वप्रकारकज्ञानेविनाहृदाविषयितासत्वेन तस्याप्यसमानधर्मितावच्छेदककतया प्रकृतानुमितिप्रतिबंधकत्वात्तत्रासंभवएव। न च सामानाधिकरण्यसंबंधे
न वह्न्यभावविशिष्टहृदत्वमेव यद्रूपपदेन ग्राह्यं भवति च हृदो वह्न्यभाववानिति ज्ञाने विशिष्टवैशिष्ट्यबोधमर्यादया उद्देश्यविधेयभावमर्यादया वा उद्देश्यतावच्छेदके हृदत्वादौ वह्न्यभावादेः
सामानाधिकरण्येन भानं शाब्दबोधादावनुभवविरुद्धमतएवानुमितेः पक्षतावच्छेदकांशे साध्यसामानाधिकरण्यावगाहित्वमपि तत्र तत्रोक्तं संगच्छते इति वाच्यं। तथासति वह्न्यभावविशि
ष्टहृदत्ववानिति निर्धर्मितावच्छेदककज्ञानेविनाहृदाविषयतया असततया प्रतिबंधकतातिरिक्तवृत्तितेनासंभवापत्तेः। न च यद्रूपावच्छिन्नप्रकारितानिरूपितयद्रूपावच्छिन्नविशेष्य
त्वं प्रकृतानुमितिप्रतिबंधकतानतिरिक्तवृत्तितद्रूपावच्छिन्नविशिष्टतद्रूपावच्छिन्नेनयद्रूपावच्छिन्नेसादेरर्थस्तत्र च नोक्तदोष इति वाच्यं। घटादौ पृथिवीभेदसाध्यकनुद्धप
पृथिवीत्वव्यापकदेवान्वयतया तत्राप्याप्तेः घटः पृथिवीति प्रतिबंधकज्ञानीयपृथिवीत्वप्रकारतायानिरवच्छिन्नत्वेन यद्रूपावच्छिन्नत्वसत्वेनदुर्घटत्वात्। न च साध्यहेतुभेदेन लक्षणभेद
तत्र सत्वे लक्षणोपयोग्यप्रकारत्वेव प्रवेश्यानतु यद्रूपावच्छिन्नप्रकारताशब्देऽस्याः किंचिदृक्तरत्वादिति वाच्यं। तथा सति घटः पृथिवीभिन्नो मेयत्वादित्यादौ पृथिवीत्ववृत्तिमेयत्वरूपव्याभि
(विशेष्यता) चारव्याप्तेः॥ पृथिवीनिरूपिततादात्म्यप्रकारतानिरूपितमेयत्वत्वावच्छिन्नविशेष्यतानिरूपकत्वस्य व्याप्तिभ्रमे पक्षानुमितिसाध्यप्रतिबंधकतानसाधारण्यात् यद्रूपावच्छिन्नप्रकारता
निवेशोचित। रूपत्वोपयोगात्संग्रहात्। किंच हृदो वह्न्यभाववानित्यादौ प्रकारितानिष्ठवह्न्यभावत्वावच्छिन्नत्वं किं वह्न्यभावत्वोभयावच्छिन्नत्वं उत वह्निविशिष्टाभावत्वावच्छि
न्नत्वं नाद्यः उभयमविपूर्वोक्तदूषणप्रसक्तमिति मेवं यतो वह्निसावच्छिन्नविशिष्टाभावहृदत्वोभयमेव यद्रूपपदेन धर्तव्यं परं तु केवलधारणाय प्रकृतानुमितौ यद्धर्मावच्छिन्नारोप
द्धर्मावच्छिन्नवैशिष्ट्यावगाहित्वं निविष्टं तद्धर्मावच्छिन्नाभावत्वावच्छिन्नप्रकारता तद्धर्मावच्छिन्नाभावव्याप्यत्वावच्छिन्नप्रकारतान्यतरनिरूपिततद्धर्मावच्छिन्नविशे
ष्यताभिन्नतद्धर्मावच्छिन्नाभावत्वतद्धर्मावच्छिन्नाभावव्याप्यत्वान्यतरावच्छिन्नप्रकारतानिरूपिता याविशेष्यता तन्निरूपकत्वं निश्चयविशेषणं देयं। एकज्ञानयोस्तादृ

२५ शाविशेष्यतानिरूपकत्वेन प्रुकासाम्भासंभवः अत्रच तद्धर्मावच्छिन्नविशेष्यतापर्यंतमुपादायतं निरूपकत्वस्य ज्ञानविशेषणत्वे एकदेशेऽतिव्याप्तिरतो न गृह्यगर्भतापक्षे किंचिता
दृशाविशेष्यतानिवेशोऽसंभवदूषणतो याये ति। कदो निर्वह्निरिति वन्हयभाववन्निष्ठविशेष्यताया ह्रदत्वप्रकारतानिरूपिततादृशविशेष्यतायाश्च तादृशाविशेष्यता
भिन्नत्वेनासंभवदूषणतो भेदानुयोगिविशेष्यतायां तादृशप्रकारतानिरूपितत्वनिवेशः वन्हयभाववति ह्रदत्वज्ञाने ह्रदत्वावच्छिन्नविशेष्यतासत्वेन संग्रहप्रसंग इति भेदप्र
तियोगिकोटौ निरूपितत्वान्तोपादानं अन्यथा भागिबंधके तुल्यतया वन्हयभाववह्रदत्वोभयावच्छिन्नधर्मिकधर्मान्तरप्रकारकज्ञाने धर्मान्तरप्रकारतानिरूपितविशेष्यतायाः इदंशा
वच्छिन्नत्वेन वन्हयभावप्रकारतानिरूपितविशेष्यताकृतयातद्भिन्नविशेष्यतान्यत्वसत्वादसंभवः। नहि तादृशान्यतरप्रकारतानिरूप्यतावच्छेदकीभूततद्धर्मावच्छिन्नत्वे
विशेष्यतात्वावच्छिन्नभिन्नत्वनिवेशेन निस्तारः तादृशविशेष्यतासु यतसाधारण्यादिति चेन्न तादृशान्यतरप्रकारतानिरूप्यत्वावच्छिन्नतद्धर्मनिरूपितावच्छेदकता
घटकं यत्तद्धर्मावच्छिन्नाभावत्वव्याप्यान्यतरप्रकारतानिरूप्यत्वं तच्छिन्नविशेष्यतानिरूपकत्वं वा अंतद्धर्मनिरूपितावच्छेदकत्वावच्छेदकीभूततादृशानिरूप्यतान्यत्वमघट
कांतार्थः। वस्तुतस्तु व्यापकविषयताशून्यत्वस्यावच्छेदकत्वे यथाश्रुतमेव सम्यक्। अथैवं पर्वतो वन्हयभाववानिति साध्यप्रसिद्धेर्वन्हित्वादिसंग्रहो दुर्घट इति चेन्न।
तद्धर्मावच्छिन्नाभावत्वावच्छिन्नप्रकारताशब्देन तद्धर्मावच्छिन्नात्यन्ताभावप्रतियोगितावच्छेदकावच्छिन्नप्रकारताया अभिधानात्। भेदप्रतियोगिकोटौ तद्धर्मावच्छिन्ना
भावव्याप्यत्वावच्छिन्नप्रकारतानिवेशान्न सत्त्वमिति पक्षासंग्रहः। अथ वन्हयभाववद्रजोऽन्वादिमद्वृत्तिजलत्वप्रभृतेर्धारणाद्विशिष्टघटितत्वमनावश्यकमिति।
येन तद्व्यापकसामानाधिकरण्यस्य सत्वमिति पक्षघटकतामतेन तत्र साध्याप्रसिद्धिवारणाय भेदानुयोगिनि तद्धर्मावच्छिन्नाभावत्वमात्रावच्छिन्नप्रकारतानिवेशस्त्वेव
किंचिद्विशेषितवन्हयभावघटितवन्हयभाववद्रजोऽन्वादिमद्वृत्तिजलत्वप्रभृतेर्धारणायविशिष्टघटितत्वमप्यावश्यकं। वस्तुतस्तु वन्हयभाववत्समान २१

कालीनत्वहेतोरन्तिमानिसाद्येबाधसंग्रहार्थं भेदानुयोगिविशेष्यताया मुख्यत्वमावश्यकं एवंच बाधनिश्चयीयमहत्त्वप्रकारतानिरूपितविशेष्यताया वारणाय
भेदानुयोगिविशेष्यतायां निरूपितत्वांतमुपात्तं । किंचिदवच्छिन्नत्वंतु निवेशे तु एकत्र द्वयमिति रीत्या ज्ञानसंग्रहापत्तेः तथा च विशिष्टबुद्ध्या घटितत्वमावश्यकं अ
साधारण्ये च तद्विशिष्टवैशिष्ट्यावगाहिज्ञानमादाय भेदप्रतियोगिविशेष्यताप्रसिद्धिः अथ हेतुतावच्छेदकं पुरस्कृत्य सैवासाधारण्यज्ञानप्रतिबंधकं एवंच
साध्यव्यापकीभूताभावप्रतियोगित्वं धर्मितावच्छेदकीकृत्य हेतुतावच्छेदकविषयकतानालिंगिततादृशविशेष्यतासादृश्यासिद्धिदशायां वेति चेत् । तद्धर्मावच्छिन्नाभाव
त्वावच्छेद्यत्वावच्छिन्नत्व तद्धर्मावच्छिन्नाभावत्वावच्छिन्नव्याप्यतावच्छेद्यत्वावच्छिन्नत्वान्यतरवत्प्रतिबंधकतावच्छेदकताश्रयप्रकारतान्यतद्धर्मावच्छिन्नाभाववत्त्व
सा० ३ तद्धर्मावच्छिन्नाभावव्याप्यत्वान्यतरावच्छिन्नविषयतानिरूपकत्वमेव निश्चयविशेषणं । व्यभिचारादिरूपैकदेशे वारणाय विषयतानिरूपकत्वस्य त्यागः । अत्र व
दंतीसादिकस्येच प्रतिबंधकतावच्छेदकताघटने प्रयोजकत्वमिति बोध्यं । अथ घटः पृथिवीति ज्ञाने घटत्वादिसाध्ये स्वरूपतः पृथिवीत्वघटिते पृथिवीत्ववद्धटादाव
व्याप्तिः पृथिवीत्वघटत्वयोः स्वरूपतः एकत्र द्वयमिति रीत्या ज्ञायमानस्य पृथिवीत्वावच्छिन्ने घटत्वज्ञानस्य वा प्रतिबंधकस्य तज्ज्ञानीयपृथिवीत्वप्रकारतायाः पृथि
न वीभेदाभाववत्त्वावच्छिन्नत्वेनावारणात् न च भेदानुयोगिविशेष्यताघटकप्रकारतायां तदभाववत्त्वावच्छिन्नत्वं निवेश्यते किंतु तदभाववन्निष्ठत्वमिति न दोष इति वाच्यं घटः पृथिवीति
बोधस्य तादृशासंग्रहप्रसंगात् तत्र पृथिवीत्वस्य स्वरूपतो भानेन तादृशपृथिवीभेदाभावत्वावच्छिन्नप्रकारतानिरूपितघटत्वावच्छिन्नविशेष्यताभिन्नायास्तदभाववन्निष्ठप्रका
रतानिरूपितविशेष्यताया एवासत्त्वात् न च भेदप्रतियोगिकोटौ यद्यपि प्रकारतायां तद्धर्मावच्छिन्नाभावत्वावच्छिन्नत्वं परिहृत्य तद्धर्मावच्छिन्नाभाववन्निष्ठत्वनिवेशान्नोक्तदोष इति
वाच्यं । तथा सति घटो घटवानिति घटत्वधर्मितावच्छेदकस्य घटत्वेन पृथिवीत्वे नमस्या प्रतिबंधकस्य संग्रहप्रसंगात् अव्याप्यविषयतानिरूप्यत्वात् । अथ पृथिवी घट हं
त्वीयधालकपद्धावच्छिन्ननिरूपितविलक्षणविषयितेनैव नालीति समाधानं तर्हि अभावत्वेन रूपेणावगाहि अभाववानयं व्यभिचारवानिति ज्ञानस्यैवेतादृशविलक्षणवि

अभावत्वान्वयिमात्रे साक्षेन सभाववदभाववदात्मकत्वापेऽभावत्वेन वन्ह्यभावावच्छिन्नविशेष्यकत्वह्रदविषयेऽतिव्याप्तिरतोऽभावत्वावच्छिन्नत्वनिवेशः ॥ ५

षयिताशून्यत्वेन वारणात् । अव्यापकविषयिताशून्यत्वोपादानेप्यसंभवदोषकानुस्थिता स्यात् । वस्तुतोऽव्यापकविषयिताशून्यत्वमेवोच्छिद्येत जातिमान्वन्ह्यभाववानिति ज्ञानादेरपि वारणात्
न च यद्रूपावच्छिन्नविषयितानिरूपितविषयितानिरूपितत्वान्यद्रूपावच्छिन्नविषयितात्वविशिष्टविषयकत्वसमानाधिकरणाभावप्रतियोगितावच्छेदकमित्यादिरीत्या निवेशाद्
दोषद्वयानिवृत्तिरुक्तज्ञानवारणमिति वेतन्न एकदेशव्याप्तिवारणायनन्तद्रूपोपादानासंगतिः अव्यापकविषयिताशून्यत्वस्यैव सकलैकदेशातिव्याप्तिवारणक्षमत्वात् । अत्र व
द्गिति अयत्रावच्छेदकत्वोत्कीर्तनं व्याप्तिकेतद्धर्मावच्छिन्नाभावत्वमेव प्रतियोग्यनुयोगिप्रविष्टप्रकारतायां विशेषणघटकंऽनवच्छिन्नत्वस्य निष्फलत्वात् घटो घटवानिति ज्ञानवारणं तु
स्वाभाववत्निष्ठत्वादिविशेषणेनैव यथाश्रुताव्यापकविषयिताशून्यत्वप्रवेशमपि प्रसन्नद्रूपोपादानमिति । अथवा प्रकृतानुमितौ यद्दोषद्वगाहित्वं निविष्टं तदभावतद्व्याप्यान्यतरावच्छि
न्नतान्निष्ठविषयताभिन्न किंचिदवच्छिन्नमुख्यविशेष्यतानिरूपकत्वं निर्णयविशेषणं अत्र वन्ह्यभावं वन्ह्यभावव्याप्यं वा यत्र मितावच्छेदकीकृत्य ज्ञाने वारणाय भिन्नांतं तत्र प्रकारताया
वच्छिन्नावच्छेदकतात्वेन निवेशः तेन वन्ह्यभावप्रकारतारूपावच्छेदकताकदोषज्ञानसंग्रहः विषयतापदं विशेष्यतापरमिति केचित् एकत्र द्वयमिति रीत्या ज्ञानवारणायावच्छिन्नांतं
तत्रैवाभावत्वावच्छिन्नविशेष्यतावारणाय मुख्येति । एतत्कल्पे विशिष्टद्वयाघटितत्वमावश्यकं ननु ह्रदोऽभाववान्वन्ह्यभाववान् ह्रदश्चेति ज्ञाने ह्रदत्वधर्मितावच्छेदकीकृत्याभावव
त्तापास्तुल्यतयावन्ह्यभावह्रदत्वयोश्चावगाहिसमूहालंबने प्रतिबंधकेतद्विशेषणस्वत्वादसंभवः न च मुख्यविशेष्यताद्वयानिरूपकत्वमेवेत्यकिंचिदवच्छिन्नत्वेवेयर्थ्यात् मेवं ज्ञाने पि
एतद्विशेषणानिवेशने किंतु यद्रूपावच्छिन्नविषयितायां तदभावत्वतदभावव्याप्यत्वान्यतरावच्छिन्नधर्मितावच्छेदकतानिरूपिता किंचिद्धर्मनिष्ठधर्मितावच्छेदकत्वनिरूपितमु
ख्यविशेष्यतानिरूपितत्वविशेषणमिति तत्पृथुदासः वन्ह्यभावावच्छिन्नविशेष्यताकस्य अनिरूपकत्वात्तेन हृत्यतयावन्ह्यभावह्रदत्वोभयावगाहिनश्च निरूपितत्वात्तेन मुद्
सः एवं च पत्रेवन्ह्यभाववान् वन्ह्यभाववान् ह्रदइति ज्ञानस्यापि मुद्रासो जायते मुख्यत्वं तु स्वरूपकीर्तनमात्रं यद्रूपापर्याप्तावच्छेदकताकान्यत्वं वा तदर्थः तेन धर्मांतरावच्छिन्नाविशेष्य २८
तु मतयाह्रदत्ववन्ह्यभावोभयावगाहिज्ञानमुद्रासः प्रकृतान्यावच्छिन्नविषयिताशून्यत्वं तु नोक्तं । प्रमेयवान् प्रमेयोभाववानिति सारे यद्रूपभिन्नाप्रसिद्धेः अव्यापकविषयिताशून्य
त्वेन वावारणं वन्हिमत्सर्वतादात्म्यकवाप संग्रहः प्रागवत् । अत्र च यद्रूपावच्छिन्नत्वं यद्रूपनिष्ठावच्छेदकतानिरूपकत्वं अवच्छेदकत्वं च विषयताविशेषः न चैवमव्याप्ति मा
१ (=प्रतिबंधकतावच्छेदकीभूततदभावप्रकारतान्यतदभावप्रकारतानिरूपकत्वरूपतन्निष्ठर्व्याप्ततद्धर्मावच्छिन्नाभावत्वापेक्षत्वावच्छिन्नत्वतद्धर्मावच्छिन्नाभावत्वावच्छिन्नव्याप्यत्वावच्छिन्नत्वान्य=)
तरवदादे[illegible]वैयर्थ्यात् १=)

(54)

वन्ह्यभावं ५

७ वान् हृद इति ज्ञानेपि वन्ह्यभावावच्छिन्नविषयकत्वमक्षतं अभावस्य वन्हिविशिष्टाभावादनतिरिक्ततया तन्निष्ठावच्छेदकतानिरूपकत्वरूपावच्छिन्नत्वस्याव्याहतत्वादिति चेन्न यतो शुद्धसत्ता
त्वावच्छिन्ननिरूपिताया अपि गुणादिनिष्ठाधिकरणतायां गुणकर्मान्यत्वविशिष्टसत्तात्वावच्छिन्ननिरूपितत्वमिव केवलाभावावच्छिन्नविषयतायां वन्हिविशिष्टाभावावच्छिन्ननिरूपितत्वं नोपे
यते इत्यदोषः विषयताविशेषश्च प्रकारतारूपः अन्यथा हृदो वन्ह्यभाववानिति ज्ञाने मुख्यं प्रकारे वन्ह्यभावादौ धर्मितावच्छेदकतारूपविलक्षणविषयताया असत्वेन लक्षणस्यैवासंभव
दुक्तिकतापत्तेः अत एव घटस्साकारकज्ञानस्यापि घटत्वावच्छिन्नविषयताकत्वं सर्वजनसिद्धमुपपद्यते। अत एव च स्वव्यापकधर्मप्रकारावच्छिन्नाया पेसादिसर्वोऽप्ययाथार्थ्यनिरु
क्तौ ग्रंथकारोक्तायाः संगतिः अन्यथा शुक्ताविदं रजतमिति ज्ञानानां प्रकारीभूतरजतत्वाद्यवच्छिन्नविषयताया दुर्घटतया याथार्थ्यापत्तेरिति सर्वसमंजसमित्याहुः अन्ये तु धर्मि
तावच्छेदकीकृत्य हृदत्वज्ञानादेरेकत्रद्वयमितिरीत्या हृदत्ववन्ह्यभावोभयज्ञानादेश्च वारणाय यद्रूपावच्छिन्नविषयितायां स्वरूपसंबंधरूपावच्छेदकत्वमपि विशेषणं एकदेशान्तिव्याप्ति
निरासश्च व्यापकविषयिताशून्यत्वविशेषणेन। धर्मप्रमेयत्वविशिष्टपर्वतादेर्वारणायानोतिरिक्तवृत्तित्वनिवेशने विशिष्टद्वयाघटितत्वं वा वश्यकमित्याहुः तदपरे न क्षमन्ते तथा
सति प्रमेयत्वविशिष्टव्यभिचारादावतिव्याप्तिवारणाय दीधितिकृता विशेषणान्तरोपादानवैयर्थ्यप्रसंगः प्रमेयत्वादिघटितविशिष्टविषयतायाः स्वरूपसंबंधरूपावच्छेदकत्वविरहेणो
वानतिप्रसंगात्। किंच वन्ह्यभाववद्वृत्त्यात्मकबाधभ्रमविषयके वलवन्ह्यभाववदतिप्रसंगः वन्हित्वावच्छिन्नविषयितायाः वन्ह्यभावविषयिताव्यापकत्वविरहादिति। उत्तरं वदन्ति। प्रमे
यवन्हिर्धूमाभाववद्वृत्तिरिति ज्ञानीयधूमाभाववद्वृत्तित्ववन्हित्वोभयावच्छिन्ननिरूपिताकविषयितायाः प्रमेयत्वावच्छिन्ननिरूपकताकत्वेपि व्यभिचारविषयतानिरूपितविषयितात्वे
न प्रतिबंधकतावच्छेदकत्वाव्याप्तो दोषः प्रमेयवन्हित्ववन्ह्यभावोभयावच्छिन्ननिरूपितविषयितायाः केवलवन्ह्यभावांशे एकदेशविषयित्वाव्यापकत्वानिर्वाहात्। किंचेत्यादयो परो दोष
इति। अत्रेदं बोध्यं। यद्रूपावच्छेद्यताविशिष्टविषयतायाः स्वरूपसंबंधरूपावच्छेदकत्वनिवेशात् प्रथमदोषसंगतिः प्रमेयत्वविशिष्टव्यभिचारविषयतानिष्ठव्यभिचारत्वप्रमेयत्वोभया
वच्छेद्यतायाः व्यभिचारत्वनिरूपितावच्छेद्यतात्वेन तथात्वमक्षतमिति चेत्तर्हि ज्ञानीयवाद्विषयताविशिष्टावच्छेद्यताव्यक्तियद्रूपनिरूपितावच्छेद्यतात्वेनावच्छेदकतायाः अवच्छेदक
तावच्छेदकत्वस्य तादृशावच्छेद्यतात्वान्तर्भावेन स्वरूपसंबंधरूपावच्छेदकत्वस्यवानिवेशात्तत्संगतिः व्यभिचारत्वं प्रमेयत्वोभयनिरूपितावच्छेद्यतात्वस्य केवलव्यभिचारत्वनिरूपि

८

तावच्छेदकतात्वादन्यत्वात् नैवं धूमवान् प्रमेयाभाववद्वन्हेरित्यादेरेवमपि प्रमेयत्वस्य व्यभिचारत्वं च नास्त्वेवमेव निरूपकं किंतु तद्घटकपदार्थसमुदायः तेन तथाविधावच्छेदकत्वेऽन्यसाधारणरू
पेणावच्छेदकतासत्त्वान्नासंभव इति ॥ अथवा दोष[illegible]दाहरणामयमभिप्रायः यद्रूपावच्छिन्नविषयितात्वतः पाति विषयितासामान्यं निवेश्य मिति विशिष्टसमभिव्याहारे इति व्याप्तिर्घटिता अयमर्थः
विदेक प्रतिबंधकत्वं निवेश्य इति एवं संयोगः संयोगवानिति बाधभ्रमविषये संयोगे इति व्याप्तिः संयोगत्वेनैतस्यैव प्रकारतया संयोगत्वसंयोगोभयावच्छिन्नविषयितायास्तत्राभावादिति
द्वितीयापि दोष इति । परे तु । एकत्र द्वयमिति रीत्या हृदत्ववन्ह्यभावोभयज्ञानस्य वन्ह्यभावावच्छिन्ने हृदत्वज्ञानस्य च वारणाय यद्यद्रूपावच्छिन्नविषयितायां स्वरूपसंबंधरूपप्रतिबंधकता
वच्छेदकत्वनिवेशः तदा वन्ह्यभावादिरूपैकदेशे अतिव्याप्तिः हृदो वन्ह्यभाववानिति प्रतिबंधकत्वानीयवन्ह्यभावत्वावच्छिन्नप्रकारतायास्तथात्वात् प्रतिबंधकतामाप्यत्वाज्ज्ञानत्वयद्रूपाव
च्छिन्नविषयितायां किंचिद्धर्मनिष्ठधर्मितावच्छेदकतानिरूपितमुख्यविशेष्यतानिरूपितत्वं सम्यक् । घटाभावधर्मितावच्छेदकीव्यत्वस्तुल्यतया वन्ह्यभाववद्धृदत्वोभयज्ञानस्यतावेताप्य
व्याप्यवत्तेः किंतु यद्रूपावच्छिन्नयत्किंचिद्विषयित्वे याद्दशाद्दशधर्मावच्छिन्ननिरूपितत्वं ताद्दशाताद्दशधर्मावच्छिन्नविषयिताभावकूटवत्त्वानीयं स्वरूपसंबंधरूपावच्छेदकता
वधद्रूपावच्छिन्नविषयित्वं प्रतिबंधकताननतिरिक्तवृत्तित्वरूपवत्त्वमर्थः यद्रूपं च वन्ह्यभाववद्धृदत्वोभयमेवेति । एकत्र द्वयमित्यादिरीत्यायद्विषयित्वं वर्त्तते तत्र स्वरूपसंबंधरूपावच्छेद
४ कत्ववेदितिज्ञातुदासः वन्ह्यभावहृदत्वोभयात्मकयद्रूपावच्छिन्नविषयित्वे घटाभावविशिष्टहृदत्वावच्छिन्नानिरूपितत्वानतिप्रसंगः वन्ह्यभावादिरूपैकदेशे विनातिव्याप्तिः वन्ह्यभावविष
यित्वे वन्ह्यभावहृदत्वोभयावच्छिन्नानिरूपितत्वं वर्त्तत इति तादृशोभयावच्छिन्ननिरूपितविषयिताभाववत्त्वे केवलवन्ह्यभावादिज्ञानं तदीयविषयित्वे स्वरूपसंबंधरूपावच्छेदकत्वाभावात् ।
एवं च जातिमान् वन्ह्यभाववानिति ज्ञानवारणाय व्यापकविषयिता नूनमपि नास्ति । पाषाणमयत्वविशिष्टपर्वते ति व्याप्तिवारणाय अनतिरिक्तवृत्तित्वनिवेशः यत्तु ज्ञानभेदेन विषयिताभेदप्र
तिबंधकत्वानीयपाषाणमयत्वव सर्वत्र विषयितायाऽनतिरिक्तवृत्तित्वानव्याप्तिः यद्रूपावच्छिन्नविषयितासामान्यपर्यंतभावस्यैकत्रपवत्वेकत्र द्वयमित्यादिज्ञानीयविषयितायाः सा
मान्यांतर्गततयाऽसंभव इति स्वरूपसंबंधरूपावच्छेदकत्वनिवेश इति तत्र ज्ञानभेदेपि विषयिताभेदे स्वरूपसंबंधरूपावच्छेदकत्वविशिष्टयद्रूपावच्छिन्नविषयितासावच्छिन्नव्यापकता
याः प्रवेशेनोपपत्तेर्व्यापकत्वरूपसामान्यपदार्थानिवेशनात् तद्धेतुप्रतिबंधकताया अनतिरिक्तत्वे निपातविशिष्टविषयितासामान्यप्रतिबंधकतायाः स्वरूपसंबंधरूपावच्छेदकतावत्त्वाद
रूपवत्त्वमित्यपेक्षत्रद्वयमिति ज्ञानीयविषयितायासामान्यांतर्गतायाः स्वरूपसंबंधरूपावच्छेदकत्वाभावादसंभवगन्धस्यापि सावकाशत्वादसत् । गोत्वाभावप्रयोजकगोत्वाभावसाध्यकस्थले

२

गोत्वाभावो गोत्ववानिति भ्रमात्मकबाधज्ञानविषयितामादाय गोत्वाभावेऽतिव्याप्तेः न च गोत्वाभावत्वावच्छिन्नविषयितायाः गोत्वगोत्वाभावत्वोभयात्मकयादृशधर्मावच्छिन्नानिरूपितत्व
सत्त्वादुक्तबाधभ्रमस्य तादृशधर्मावच्छिन्ननिरूपितावत्त्वान्नातिव्याप्तिरिति वाच्यं गोत्वत्वेन सास्नाद्यवगाहिनो निरुक्तभ्रमस्याभिमतत्वात् तत्र च गोत्वगोत्वाभावत्वोभयावच्छिन्नाविषयिता
शून्यत्वसत्त्वात् एवं वन्ह्यभाववत्पक्षकवन्ह्यभावसाध्यकस्थले वन्ह्यभावो वन्हिमानिति वन्हित्वेन घटघटत्वावगाहिभ्रमविषये वन्ह्यभावे हृदो निर्वन्हिरित्यादौ वन्हित्वेन घटादिविषयकहृ
दो वन्हिमानिति ज्ञानविषयहृदादौ चातिव्याप्तिर्बोध्या एतेनाव्यापकविषयिताशून्यज्ञानवृत्ति प्रकृतानुमितिप्रतिबंधकतावच्छेदकयद्रूपावच्छिन्नविषयिताव्यापिका प्रकृतानुमितिप्रति
बंधकता तद्रूपावच्छिन्नत्वमर्थः स्वरूपसंबंधरूपावच्छेदकत्वनिवेशे प्रकृते दोषाऽतिव्याप्तिभयेन यद्रूपावच्छिन्नविषयितासामान्यं तु न प्रवेश्यं। जातिमान्वन्ह्यभाववानिति ज्ञानधारणाय यावद्रूपकवि
शेषणे नैवैकदेशातिव्याप्तेर्वारणादिति प्रत्युक्तं। यत्त्वोक्तमव्यापकविषयिताशून्यत्वेऽमविमास्तु हृदो हृदत्ववानिति ज्ञानविशिष्टस्य हृदत्ववन्ह्यभावव्याप्यमिति ज्ञानस्य प्रतिबंधकतया स्वरूपसंबं
धरूपतदवच्छेदकवन्ह्यभावादिविषयितायाः सामान्यांतर्गतायास्तदतिरिक्तवृत्तित्वाभावादिति तद्व्यसंगतमेव हृदत्वावच्छेदेन वन्हेः साधनेन सामानाधिकरण्येन वन्ह्यभावेऽव्याप्तिः हृदो जाति
मानिति ग्रहविशिष्टस्य जात्यवच्छेदेन वन्ह्यभावप्रकारकग्रहस्य प्रतिबंधकतया तदवच्छेदकर वन्ह्यभाववहृदत्वावच्छिन्नविषयितायाः स्वरूपसंबंधरूपावच्छेदिकायाः प्रतिबंधकतातिरिक्तवृत्ति
त्वादिति तद्रूपादानात् असाधारण्यविषयितानवच्छिन्नत्वं च वैशिष्ट्यावच्छिन्नत्वोभयाभाववत्प्रतिबंधकतावच्छेदकत्वं यद्रूपावच्छिन्नविषयितात्वव्यापकं यद्रूपावच्छिन्नत्वमिति स्वरूपसंबंध
रूपावच्छेदकतानिवेशापक्षमापिएकपद्घ्यमित्यादिज्ञानवारकविशेषणनिवेशमादाय परिष्कुर्वंति। केचित्तु। स्वरूपसंबंधरूपप्रतिबंधकतानवच्छेदकविषयिताशून्यत्वेन ज्ञानविशेषणीयं।
तेन वन्ह्यभाववधर्मितावच्छेदककहृदत्वेज्ञानस्य तुल्यतया वन्ह्यभाववहृदत्वोभयज्ञानस्य च वारणो न चैवं वन्ह्यभावाद्यात्मकैकदेशेऽतिव्याप्तिः उक्तविशेषणोक्त प्रतिबंधकतामात्रवृत्तितद्विष
यिताव्यापकत्वस्य प्रतिबंधकतायां सत्त्वादिति वाच्यं। अव्यापकविषयिताशून्यत्वेन वारणात्। पाषाणमयपर्वतवारणायानतिरिक्तवृत्तित्वनिवेशेऽपि तदसत् विशिष्टांतराघटितत्वनिवेशावे
यव्याप्तत्वस्य स्वधर्मितावच्छेदकत्ववारणाय धर्मितावच्छेदकप्रकारतानिरूपितविशेष्यतायाः उपगमे बाधादिज्ञानस्य प्रतिबंधकतानवच्छेदकताद्रूप्यताशालित्वेनासंभवाच्च गोत्वा
भावपक्षकेऽक्तरीत्यातिव्याप्तेश्च स्वरूपसंबंधरूपप्रतिबंधकतावच्छेदकविषयिताश्रयत्वं निश्चयविशेषणमध्याहः तत्पर्वतो द्रव्यवृत्तिवन्ह्यभाववान्वन्हेरित्यादौ द्रव्यवृत्तित्वविशिष्टवन्हि
मत्पर्वतरूपबाधाव्याप्तिः तुल्यतया द्रव्यवृत्तिवन्हिमत्पर्वतत्वोभयावगाहिज्ञानस्याव्यापकविषयिताशून्यस्याप्रतिबंधकत्वाद्धूमे साध्यव्याप्यत्वग्रहे द्रव्यवृत्तिः साध्यव्यभिचारी वन्हिश्च द्र
व्यवृत्तिरिति ज्ञानस्याविरोधित्वेनाविशिष्टतया प्रतिबंधकताविरहेऽपि तदवच्छेदकीभूतद्रव्यवृत्तित्वविशिष्टवन्हित्वावच्छिन्नविषयितासत्त्वाच्चेति दिक्। अन्ये तु। हृदांशे हृदत्वावच्छिन्ना
नुयोगिताकत्वविशिष्टविशेषणतासंबंधेन वन्ह्यभाववत्ताघटितवन्ह्यभाववद्धृदत्वमेव यद्रूपवदेव धर्मितावच्छेदकत्वं द्वयमिति रीत्या ज्ञाने च नेह हृदत्वावच्छिन्नानुयोगिताकत्वविशिष्टस्वरू

पर्वसंबंधादेः संसर्गतास्वीक्रियते अपितु हृदत्वधर्मितावच्छेदकज्ञान एवेति न कोपि दोषः परे तु । वह्नित्वावच्छिन्नधर्मितावच्छेदकतापन्नाभावत्वावच्छिन्नधर्मितावच्छेदकतापन्नहृदत्वमेव तमदूपत्रस्यार्थः
न च वह्नित्वावच्छिन्नधर्मितावच्छेदकतापन्नाभावत्वावच्छिन्नधर्मितावच्छेदकतापन्नपर्वतत्वमादाय भ्रमविषयेऽतिव्याप्तिः तादृशधर्मितापन्नं यद्वह्न्यभाववत् तत्त्वं तस्यैव यद्रूपपदेन धर्तुमशक्यत्वादिति व
दंति । प्रकारधर्मितावच्छेदकभावापन्नवह्न्यभाववद्धृदत्वयोर्न दोषतावच्छेदकत्वमिति सुधियः स्पष्टम् । अपरे तु उक्तभ्रमस्य यत्तु कारणतपरिष्कारस्यादरणीयत्वात् तद्रूपत्रस्वार्थं चिंतैव नास्तीत्या
हुरित्यिति कृतं पल्लवितेन । यत्संबंधावच्छिन्नेति । अथ यत्संबंधावच्छिन्नयन्निष्ठप्रकारताकत्वमनुमितिप्रतिबंधकतावच्छेदकं तत्संबंधेन तद्वत्त्वस्य दुष्टत्वव्यवहारनियामकत्वोपगमे धूमत्ववान्
पर्वतो वह्निमान् धूमादित्यादौ धूमादेर्दुष्टत्वानुपपत्तिः तस्य नियामकत्वसंभवः स्वरूपसंबंधेन धूमत्वाभावादेर्धूमादावभावात् । न च धूमत्वस्य पर्वतात्मकत्वप्रकारकज्ञानस्य विरोधि
त्वात् समवायसंबंधावच्छिन्नपर्वतत्वनिष्ठाभावस्य स्वरूपसंबंधेन धूमे सत्त्वात् दुष्टत्वानुपपत्तिरिति वाच्यं एवमपि रूपवान् पर्वतो वह्निमान् तद्रूपादित्यादावव्याप्तेः यदि च तत्र रूपव
न्निष्ठाधेयतायां पर्वतनिरूपितत्वाभावज्ञानस्यापि प्रतिबंधकत्वमपेक्षेत तत्र दुष्टत्वोपपत्तिः तदा पर्वतनिरूपिताधेयत्वनिरूपिताधेयत्ववान् पर्वतो वह्नि[illegible]मान् पर्वतनिरूपिताधेयत्वादित्या
दौ हेतौ दुष्टत्वानुपपत्तिः तत्र निरूपकत्वसंबंधावच्छिन्नप्रतियोगिताक तादृशपक्षतावच्छेदकाभावस्य पक्षतावच्छेदकनिष्ठनिरूपितत्वसंबंधावच्छिन्नपर्वतत्वनिष्ठाभावस्य तादृशपक्ष
तावच्छेदकनिष्ठाधेयतायां वर्तमानस्य पक्षनिरूपितत्वाभावस्य च प्रकृतहेतावसत्त्वात् । न च तत्र पक्षनिष्ठाधारतायां पक्षतावच्छेदकनिरूपितत्वाभावस्य तथात्वात् दुष्टत्वस्य हेतौ सत्त्वान्
नुपपत्तिरिति वाच्यं । तावतापि पर्वततादृशाधेयत्वान्यतरस्य पक्षतावच्छेदकत्वस्थले प्रकृतहेतौ तादृशान्यतरनिरूपितत्वाभावासत्त्वात् अनुपपत्तेर्वेन रूपत्वाभावव्याप्यः पर्वत इत्यादि
ज्ञानस्य प्रकारतापन्नपर्वतत्वनिष्ठत्वमादाय तद्रूपस्य दुष्टत्वव्यवहारसंभवात् एवं तादृशाधेयत्वनिरूपिताधेयत्वाभावव्याप्यः पर्वत इत्यादि ज्ञानप्रकारतापन्नपर्वतत्वनिष्ठत्वमादाय तत्र तत्र
दुष्टत्वबोधाने चैवंवं स्वभावव्याप्यः पर्वत इति (संस्कृतिपक्षज्ञानस्य संयोगसंबंधावच्छिन्नाधेयतासंबंधावच्छिन्नपर्वतत्वनिष्ठप्रकारताकत्वेनानुमितिप्रतिबंधकतया तेन संबंधेन प
र्वतवत्त्वस्य धूमादौ सत्त्वेन दुष्टताव्यवहारापत्तिः संभवादित्येति कृतं पक्षविशेष्यकत्वपर्यंतानुधावनं व्यर्थं) मिति वाच्यं । तावतापि प्रसिद्धबाधरूपदोषमादाय तत्र व्यवहारापत्तिः
पक्षविशेष्यकभ्रममादायैवेसणुरविनिवेशो व्यवसायवह्नरसनिन्यायेन तत्र योग्यतासंभवात् एवमेव प्रसिद्धधूमादिहेताविति प्रसिद्धपदस्वारस्यात् परं तु तादृशतादृशदुष्टस्थले पक्षता
वच्छेदकविशिष्टे पक्षनिष्ठभेदप्रतियोगित्वबुद्धेरपि पक्षतावच्छेदकवत्तानिरहविरोधितया तादृशप्रतियोगित्वस्य मादाय दुष्टत्वसंभवात् नानुपपत्तिरिति परं सीदरारीसासाध्यवान्

(: भ्रमादायैवेति पाठे भ्रमपदस्य निश्चयसामान्यपरत्वेन वक्ष्यमाणतयासंगमनं बोध्यं :)

58

त्ति२

पक्षानिष्ठभेदप्र[illegible]नियोगिनि पक्षविशेषणकभ्रममादाय दोष इत्यत्राप्यणुरपीति न्यायेन समाधानं बोध्यं अत्र पर्वतो
वह्न्यभाववान् धूमादित्यादौ पर्वतत्ववह्निरिति ज्ञानं तत्रैव धूमवत्त्वप्रकारकप्रमाविषयत्वे स्वरूपासिद्धिज्ञानं जात्य
भाववान् पर्वतो घटान्यः घटत्वादिति प्रमेयादित्यादौ जा[illegible]मत्सर्वतो ज्ञानं तत्रैव जातिशून्यघ[illegible]त्वादिति प्रमेयहेतुके
पर्वते जातिरिति ज्ञानं रूपत्ववान् पर्वतो वह्निमानित्यादौ रूपत्वे पर्वतनिष्ठाभावप्रतियोगीति ज्ञानं द्रव्यवान् पर्वतो
वह्निमान् धूमप्रागभावादित्यादौ हेतोर्द्रव्यत्वरूपाश्रयासिद्ध्यसत्वेपि द्रव्यत्वे व्याप्यधूमप्रागभावः पर्वत इ
ति ज्ञानं चा[illegible]योपपत्तिप्रकारान् प्रतिकूलाः। वस्तुतस्तु सर्वत्र तत्तदभावव्याप्यज्ञानविषयदोषवत्त्वं सुव
चो वस्तुतस्तु [illegible]यत्ववान् पर्वतो वाच्यत्ववान् [illegible]यत्वादित्यादाविव दुष्टताव्यवहारानुपपत्तिः अन्यत्रेसा
ध्याभाववद्वृत्तित्वभावादिभ्रममादाय तदुपपत्तेर्यथा हि [illegible]तत्र कल्पांगीकारे मते धूमवान्पर्वतो वह्निमान्धूमा
दित्यादौ साध्याभावभ्रमादाय दुष्टताव्यवहारः स तु पूर्वपादः स्वरूपसंबन्धावच्छिन्नवन्ह्यभावनिष्ठप्रकारताके
त्वेन [illegible]तिबंधकतापात्तेन संबन्धेन धूमादौ वन्ह्य[illegible]भावोपि मत्ता सत्वान्[illegible] वास्तवदोषस्येनत्वव्यवहारापादकत्वमिसत्वदुर्वचत्वात्।

पर

अन्यथा पक्षविशेष्यकभ्रमविषयसाध्याभावस्यासत्त्वदोषत्वेन तद्व्यवहारानापादकतया दीधितिग्रंथासंगतिः ननु तथापि धूमत्ववान् पर्वतो घटभेदवान् धूमादि
त्यादौ तादृशव्यवहारानुपपत्तिर्दुर्वारैव तत्र तादृशव्यवहारनियामकस्य घटत्वरूपसाध्याभावस्य धूमत्वाभावस्य वासत्त्वात् न च तथापि धूमत्वनिष्ठपक्षतावच्छेदकताघटक
संबंधेन पक्षवृत्तित्वाभावस्याश्रयासिद्धित्वेन तस्यैव तदुपपादकत्वमिति वाच्यं तथापि ग्रंथस्यानुपपादकत्वात् एवंरूपत्ववान् पर्वतो घटान्यः तद्रूपादित्यादौ स्वरूपसंबंधावच्छिन्नपक्षस
मवेतत्वाभाववनिष्ठप्रकारताकत्वेन स्वरूपसंबंधावच्छिन्नरूपत्वाभाववनिष्ठप्रकारताकत्वेन एवं समवायसंबंधेन साध्याभावरूपघटत्वनिष्ठप्रकारताकत्वेन प्रतिबंधकत्वेपि हेतौ तेन संबंधे
न तद्वत्त्वं नास्तीति तद्व्यवहारानुपपत्तिरिति चेन्न स्वरूपसंबंधेन हेत्वाभावभ्रमविषयहेत्वाभावमादाय तद्व्यवहारोपपादनात् न चैवं पर्वतान्यत्वप्रकारकप्रमाविशेष्यतावान् पर्वतः घटान्यः
घटवृत्तिप्रमेयादित्यादौ हेत्वभावमादायापि न दुष्टताव्यवहारोपपत्तिरिति वाच्यं पर्वतान्यत्वप्रकारकप्रमाविशेष्यत्वं पर्वतवृत्त्यभावप्रतियोगि साश्रयासिद्धिज्ञानस्य प्रतिबंधकत्वेन पर्वत
वृत्त्यभावप्रतियोगित्वस्य क्वापि यत्र घटवृत्तिप्रमेयेसत्त्वेन पर्वतो घटवृत्तिप्रमावत्त्वानिति भ्रममादाय घटघात्मक घटवृत्तिप्रमेये घटवृत्त्यभावसत्त्वेन च तदुपपादनात् एवं उक्तपक्षसाध्य
केस्वरूपतादात्म्यान्यतरसंबंधेन घटवृत्तिप्रमेयहेतौ घटस्याहेतुतया तत्र घटवृत्त्यभावस्यासत्त्वेपि पर्वतान्यत्वप्रकारकप्रमाविषयत्वाभावरूपासिद्धिमादाय पर्वतत्वात्मकघटवृत्तिप्र
मेये लक्षणं नेयं न च पर्वतभेदोपि हेतुः रूपविशिष्टतद्दोषासिद्धिमादायापि न लक्षणं नेतुं शक्यमिति वाच्यं तत्र पर्वतविशेषणकोक्ताश्रयादिज्ञानविषयपक्षमादाय तदुपपादनात्
एवमुक्तपक्षसाध्यके पर्वतभिन्नत्वेसति तादात्म्यसंबंधेन घटवृत्तिप्रमेयरूपहेतौ शुद्धघटभिन्नत्वविशिष्टप्रमेयरूपे च हेतावुभयघटभेदसाध्यके साध्यतावच्छेदकसंबंधावच्छिन्नपक्षवृत्ति
त्वस्य बाधतया मानद्रूमविषयः प्राथम्यः हेतौ स्वरूपसंबंधावच्छिन्नपक्षवृत्तित्वाभावरूपबाधोपि बोध्यः न च पर्वतान्यत्वप्रकारकप्रमाविशेष्यतावान् पर्वतो घटान्यः पर्वतान्यवृत्तिप्रमेया
दित्यादौ तादात्म्यस्वरूपान्यतरसंबंधेन हेतुतायां पर्वतनिष्ठहेतुतावच्छेदकस्वरूपतादात्म्यान्यतरसंबंधावच्छिन्नाभावप्रतियोगित्वस्य क्वापि हेतावसत्त्वेन तत्र तादृशासिद्धिमादाय दुष्टत्वव्य
वहारोनुपपन्न इति वाच्यं तत्रापि स्वरूपतादात्म्यान्यतरसंबंधावच्छिन्नप्रतियोगिताकपर्वतान्यावृत्त्यभाववत्पर्वतान्यत्वप्रकारकप्रमाविशेष्यतावान् पर्वत इति ज्ञानस्य स्वरूपसंबंधावच्छिन्नाधे
यतासंबंधेन पर्वतप्रकारताकत्वेन प्रतिबंधकतया तेन संबंधेन पर्वतवत्त्वस्य पक्षमात्रवृत्तिपदार्थस्वरूपपर्वतान्यावृत्तिप्रमेयरूपहेतौ सत्त्वेन दुष्टताव्यवहारोपपादनादित्यादि दिक् ॥ एवं च धू
मत्ववान् पर्वतो वह्निमानित्यादौ दोषप्रमामादाय महत्ताप्रबंधेन दुष्टत्वोपपादनं शिष्यबुद्धिवैशद्यार्थमेवेति तत्स्वरूपलविशेषो बोधलक्षणतया तत्स्वरूपलविशेषप्रमासत्त्वेनानापत्तिदोषप्र
माया उपादानमिति नाबोध्यम् ॥

केचित्तु रूपत्ववान् पर्वतो वह्निमान् पर्वतीयरूपादित्यादौ समवायसंबंधावच्छिन्नपर्वतावृत्तित्वमादाय न दुष्टतात्यवहारोपपत्ति
संभवात् न च पर्वतनिष्ठात्यंताभावप्रतियोगिरूपत्ववानिति ज्ञानस्य पर्वते रूपत्वप्रकारकज्ञानप्रतिबंधकत्वं तया तादृशरूपत्व
मादायैव तदुपपत्तिः प्रकारताविशेष्यतयोरभेदात् इति वाच्यं तथा सति पर्वतीयवन्ह्यभाववान् घट इति ज्ञानस्य वन्ह्यभावे
पर्वतवृत्तित्वावगाहित्वेन पर्वते वन्हिमत्ताज्ञानविरोधितया तत्प्रकारीभूतवन्ह्यभाववत्त्वमादायैव दुष्टतापत्तिसं
भवात् स्वविशेष्यकत्वं पर्वतवैयर्थ्यात् तत्सार्थक्याय प्रकारतात्वेनावच्छेदकत्वविशेषणे तु दोषतादवस्थ्यात् तस्मा
त् समवायस्य नानात्वमते नायं दोष इत्याहुः पर्वते इति पर्वतमात्रे वह्निसद्भावमभिप्रेत्येदं अन्यथा पर्वतविशेषमहा
नसान्यतरत्वहेतुः पर्वतविशेषस्य पक्षत्वे च एतेन पर्वतत्वव्यापकत्वविशिष्टस्वरूपसंबंधावच्छिन्नाधेयतासम
भावाभ्यत्व पर्वतनिष्ठप्रकारताशालिज्ञानस्यैव पर्वतो वह्निमानित्यनुमितिप्रतिबंधकत्वेन तेन संबंधेन प
शानः नतिम[illegible]सान्यतरत्वे कथं तद्व्याप्तिमिति केषांचिदाशंकनं पर्वतत्वव्यापकत्वाविशिष्टस्वरूपसंबंधस्याप्रसिद्ध्या स्वरू
पसंबंधत्वेनैव संसर्गतायुक्तीति न लाघवतत्र पर्वतत्वव्यापकत्वभानमेव च प्रसिद्धस्वरूपसंबंधावच्छिन्नाधे
यतारूपसंबंधस्यैवानियमेन निवेशात्तेन संबंधेन तद्संतत्त्राप्रसिद्धिमिति तदुपरि केषांचित्समाधानं तदभ
मप्रयुक्तमिति वेदितव्यं उक्तस्थले पर्वतविशेषस्यैव पक्षत्वेन तादृशाशंकाया एवानवतारात् यद्वा पर्वतत्वे

६ दृष्टापत्तेर्दुष्करतयाकथं ६

२०

सामानाधिकरण्येन वन्हेः साध्यत्व एव पर्वतत्वावच्छेदेन वन्ह्यभाववत्ताभ्रमप्रमादायाति व्याप्तिर्व्या । सा च न संभवति पर्वतत्वव्यापकत्वविशिष्टस्वरूपसंबंधावच्छिन्नप्रकारताकत्वेनैव पर्वतो नि
र्वन्हिरिति ज्ञानस्य प्रतिबंधकत्वात्तेन संबंधेन वन्ह्यभाववत्वस्य धूमादावसत्वात् कथं पक्षविशेष्यकभ्रमप्रमादायाति व्याप्तिरित्याशंकायाः पर्वतत्वव्यापकत्वरूपं पर्वतत्वावच्छिन्नत्वेन प्रकारतावच्छेद
कसंबंधे भासते किंतु तस्य प्रकारांशे भानं स्वीक्रियते इति शुद्धस्वरूपसंबंधस्यैव प्रकारतावच्छेदकसंबंधतया तेन संबंधेन तद्वत्वस्य हेतावक्षुण्णत्वमिति समाधानं तथा च पक्षविशेषणकभ्रमे
मेपि पर्वतत्वव्यापकत्वं वन्ह्यभाव एव भासते शुद्धस्वरूपसंबंधावच्छिन्नाधेयतासंबंधेन प्रकारतावच्छेदकेन तद्वत्वमक्षुण्णमिति तदुपपत्तिसामंजस्य । सद्धेतावति - अत्र पर्वतमहानसान्यतरत्वरूपहेता
वसद्धेतुत्वभ्रमेण कदाचिद्दुष्टताव्यवहार इष्ट इति ब्रूयादिति तत्र भ्रमव्यावर्त्यसद्धेताविति न दुष्टताव्यवहारो वास्तविकदोषातिरिक्तपदार्थमादायानिष्ट एवेत्यंगीकरणीयं अन्यथा भ्रमविषयसा
ध्याभावेत्यादिदीधितिग्रंथस्यादिपदग्राह्यासद्धेतौ दुष्टताव्यवहारापत्तिवारणासंगतेः एवं च उक्तस्थले । सद्धेतुत्वभ्रमदशायामपि वास्तविकदोषातिरिक्तपक्षादिकमादाय दुष्टताव्यवहारे सद्धेता
विसस्य सार्थक्यं न चासद्धेतौ वास्तविकदोषमादायैव तद्घटकपदार्थमादायापि दुष्टताव्यवहारः कदाचिदिष्ट इति वक्तुं शक्यते उदासीनपदार्थमादाय तत्र दुष्टताव्यवहारो निष्ट एवेति साध्याभावादी
सादिपदग्राह्योदासीनपदार्थमादायासद्धेतौ दुष्टताव्यवहारापत्तिवारकतया दीधितिग्रंथस्य नासंगतिः तथा च प्रकृतपक्षस्य दोषघटकत्वेन तमादायान्यतरत्वादिहेतावसद्धेतुत्वभ्रमदशायां
तत्र दुष्टताव्यवहार इष्ट इति वक्तुं शक्यते एवं च सद्धेतौ दोषतद्घटकमुदासीनपदार्थं वा आदाय दुष्टताव्यवहारो निष्ट एवेति तत्र भ्रमव्यावर्त्तकतया सद्धेताविसस्य सार्थक्यमस्त्येवेति वाच्यं प्रकृते वास्तवि
कदोषस्याप्रसिद्धत्वेन पक्षस्यापि तद्घटकत्वासंभवात् तमादायासद्धेतुत्वभ्रमदशायामपि दुष्टताव्यवहार इष्ट इति न तु भ्रमरूपत्वात् । न चान्यतरत्वादिरूपहेतावसद्धेतुत्वभ्रमदशायां पक्षस्याविदोषघ
हूतस्य सुवचतया [illegible] कस्यचित्तु आक्षत एव एवं च तद्भ्रमदशायां तमादाय तद्व्यवहारो दुष्ट इत्यस्य सुवचत्वात् तत्र भ्रमव्यावर्त्तकतया तस्य सार्थक्यमस्त्येवेति वाच्यं तथा सति साध्याभाववत्वेन रूपे
णउदासीनघटावगाहि प्रतिबंधकभ्रमविषयघटादिकमादाय सद्धेताविसादिपदग्राह्यस्य सद्धेतौ दुष्टताव्यवहारापत्तिवारकतया दीधितौ संभवात् भ्रमपदं निश्चयसामान्यपरमिति सादिपदं नासंगतिः
रतः दोषघटकसाध्याभावादिकमादायैवासद्धेतौ दुष्टताव्यवहारापत्तिवारको दीधितिग्रंथ इत्युपेयं एवं च पक्षस्य दोषघटकता भ्रमदशायामपि दुष्टताव्यवहारो निष्ट एवेति सद्धेतुतो व्याख्याने रकिंचि
करतया तद्वैयर्थ्यं दुरुद्धरमेवेति चेत्तर्हि असंततासहिष्णुतासूचनार्थमेनासद्धेताविसुपादानादिति । निश्चयसामान्यपरमिति । इदं तु चिंत्यते । आदिपदग्राह्यो सद्धेतुतान्तष्टस्य साध्याभावा
दीसादिपदग्राह्यस्य साध्याभाववत्वेन घटादिभ्रमात्मकप्रतिबंधकत्वान विषयस्य संभवेन भ्रमविषये सस्य यथाश्रुतार्थकरणे विरुद्धसंभावात् । न च यत्संबंधावच्छिन्नयन्निष्ठप्रकारताकत्वेन
सादिक्रमेण तेन संबंधेन तद्वत्स्यैव दुष्टताव्यवहार इति यामकत्वी त्यक्ते स्वरूपसंबंधेन घटत्वप्रकारकभ्रमस्यैव प्रतिबंधकत्वेपि तेन संबंधेन घटत्वाप्रसिद्धेर्न तमादाय दुष्टताव्यवहारापत्तिः

व

संभवतीति वाच्यं साध्याभावत्वेन घटाभावावगाहिभ्रमस्यैवोपादानादिति। केचित्तु सद्धेतुस्थले ऽसद्धेतुस्थले च साध्याभावत्वेन गगनाभावादेरपि भानसंभवात् सद्धेतौ गगनाभावरूप
प्रकारकत्वसमादाय दुष्टत्वसंभवेऽपि ईदृशकुसृष्टाद्दरोऽप्यर्थे वेति। पर्वतप्रकारकत्वमादाय तु स्वरूपसंबंधावच्छिन्नाधेयतासंबंधेन कस्यापि धूमः सत्वेन न पक्षविशेषणकभ्रमप्रमादायपदो
षप्रसक्तिरित्याहुः। भट्टाचार्यानुयायिनस्तु विषयस्सेकारः आमादिकः एवं चादिपदग्राह्यः पक्षविशेषणकभ्रमो विदाधिरूढः संमतः अत एव हेतुविशेष्यकव्यभिचारभ्रमविषयस्य संग्रहान्न
न्यूनता। एवं भ्रमपदमपि न निश्चयसामान्यपरं आदिपदेन प्रमाविषयसाध्याभावस्येव संग्रहादिति प्राहुः। विलक्षणविषयतेति। विलक्षणपदघटितो बहुपुस्तकपाठः अव्यापकविषय
ताशुन्यत्वेनास्ती समिप्रायेण तथा च जातिमान्वस्त्वभाववानिति ज्ञाने याविषयितातस्या यद्रूपपर्याप्तनिरूपकताकावच्छेद्यत्वविरहादेवादोषादिति। अयमेवेति। यथा च प्रमेयत्वविशिष्ट
दोषे नातिव्याप्तिस्तथा प्रपंचितमधस्तात् पर्याप्तीति। न च विशिष्टविषयितांतर्भावेणावच्छेदकतापर्याप्त्यनभ्युपगमे तद्विशिष्टज्ञानाकार्यप्रतिबंधानुपपत्तिः प्रतिबंधकतावच्छेदकता
पर्याप्त्यधिकरणधर्मविशिष्टवत्ताया एव कार्यानुत्पत्तिप्रयोजकत्वात् निश्चयत्वसहितविशिष्टविषयितायां तत्सहितभ्रमविषयितायां च विभिन्नपर्याप्ती स्वीकार्ये तथा च तादृशवि
शिष्टविषयितायां पर्याप्त्यभावकथनासंगतिरिति वाच्यं। पर्वतविशेष्यतानिरूपितवह्न्यभावप्रकारिताशालिनिश्चयत्वेऽवच्छेदकत्वपर्याप्तिमादाय वह्न्यभाववत्प्रसंगानुद्धारान्नि
श्चयत्वविशिष्टयद्रूपावच्छिन्नविषयितात्वं अवच्छेदकतापर्याप्त्यवच्छेदकं इति विवक्षणीयं तत्र च पक्षविशेष्यतानिरूपितत्वसहितमेव वह्न्यभावविषयितात्वं तादृशपर्याप्त्यवच्छेदकत्वमि
ति नातिव्याप्तिः। एवं च विशिष्टविषयितात्वघटितसमुदायस्यावच्छेदकतापर्याप्त्यनवच्छेदकतया ऽसंभवः पक्षान्तवच्छेदकतावच्छेदकांतर्भावेणावच्छेदकत्वं तथा च भ्रमविषयितासाधार
णारूपतद्विषयितानिश्चयत्वैतत्समुदायत्वमेकं पर्याप्त्यवच्छेदकं भ्रमविषयितासाधारणरूपविशिष्टविषयित्वादिनिष्ठसमुदायत्वमपरं तथा न तु तद्घात्वेन विशिष्टविषयितात्वविशिष्ट
विषयित्वादिनिष्ठसमुदायत्वं तथा च पर्याप्त्यनवच्छेदकरूपावच्छेदेन विशिष्टविषयितात्वसहितनिश्चयत्वेतत्पर्याप्त्यभावोऽक्षतः। अनाहार्येति जन्यतासंबंधेनेच्छावदन्यत्वम
नाहार्यत्वं स्वविषयत्वस्वसमानाधिकरण्योभयसंबंधावच्छिन्नतत्तद्धर्मप्रामाण्यज्ञानाभावकूटवत्त्वं वस्तुतस्तु दोषज्ञानस्य सर्वस्यापि भ्रमात्वेन न च प्रामाण्यज्ञानं भ्रमएवेति ईश्वर
ज्ञानावृत्तित्वेनाप्रामाण्यद्वयमनुगमय्य तद्विषयकज्ञानशून्यत्वं ईश्वरावृत्तिज्ञानशून्यत्वं तत्र अत्राप्रामाण्यं प्रामाण्यविरोधि भ्रमत्वं प्रमात्वाभावश्च समरूहात्(?) वने चावच्छेदक
वा

(63)

भमत्वा

३१ भेदेन प्रमात्वांशे सत्त्वेपि न क्षतिः रूढः पर्वतश्च वह्निमानिति समूहालंबने रूढत्वावच्छेदेन यत्प्रामाण्यं वर्त्तते तदवच्छेदकावच्छिन्नतदधिकरणतासमानाधिकरणाधिकरणताकान्य
त्वेन तयोरनुगमेन विरोधित्वनिर्वाहात् एवं च समूहालंबनात्मकमेव दोषज्ञानं विषयतासंबंधावच्छिन्नप्रामाण्यविरोधितानन्यूनमिति तद्धटाया लक्षणसमन्वयः प्रामाण्यं
वत्पदवाच्यं वह्नित्वावच्छिन्नविषयितैव ज्ञानत्वादेव्याप्यवृत्तिधर्मस्य वारणीयत्वे तु किंचिदवच्छिन्नत्वमप्यनुगमकरूपे निवेश्यमिति तत्परैरपरिशीलितः पंथाः संशयान्यत्वं च स्वसमानाधिक
रणस्वावच्छिन्नप्रतिबध्यतानिरूपितप्रतिबंधकतावच्छेदकत्वे तदुभयसंबंधेन प्रकारितावच्छिन्नप्रकारितावदन्यत्वमिति दिक् संशयादाविति [illegible] दिना आहार्यप्रामाण्यज्ञाना
स्कंदितज्ञानसंस्कारादीनां परिग्रहः न तु तत्त्वसाध्यत्वं तत्त्वमिति नन्वेतावता अप्रामाण्यज्ञानानास्कंदितनिश्चयव्यक्तित्वविशिष्टयद्रूपावच्छिन्नविषयितात्वावच्छिन्नाधिकरणता तादृशप्रतिबंधकता
नतिरिक्तव्यक्तित्वे स्वधिकरणतां निवेश्यानतिरिक्तव्यक्तित्वघटितलक्षणं सुकरमिति चेन्न सामान्यधर्मावच्छिन्नाधिकरणतीया अव्याधिकरणाभेदेन भेदाभ्युपगमे तादृशानिश्चयव्यक्तित्ववि
शिष्टवन्ह्यभावत्वावच्छिन्नविषयितात्वावच्छिन्नाधिकरणतासक्तेः प्रतिबंधकताश्रयव्यक्तित्वेन वन्ह्यभावत्वविशिष्टेऽतिव्याप्तेः तादृशाधिकरणतासामान्योक्तौ तादृशानिप्रसंगवारणेपि
सामान्यपदार्थस्य व्यापकत्वादन्यस्य दुर्वचतयाऽनतिरिक्तव्यक्तित्वे तादृशविषयितावच्छिन्नाधिकरणतात्वव्यापकत्वनिवेशमपेक्ष्य प्रतिबंधकतायां तादृशविषयिताव्यापकत्वनिवेशे
लाघवात् दुर्घटत्वादिति विशेष्यव्यक्त्योर्वैशिष्ट्यानुयोगिकाभावानुपगमात् एतेन निरुक्तज्ञानव्यक्तित्वविशिष्टयद्रूपावच्छिन्नविषयितात्वं तच्छून्यव्यक्तितानवच्छेदकमितिसपासंघघविषयादृशाविशि
ष्टविषयकत्वं प्रकृतानुमितिसत्वे तादृशविशिष्टत्वं दोषत्वमिति सुवचनतिरिक्तव्यक्तित्वादिकं व्यर्थं तथापि वन्ह्यभावे ओप्यवान्यवतद्रसाधेव [illegible] सर्वतादावतिप्रसंगात्तथानोक्तं तादृशेति आना
हार्यप्रामाण्यज्ञानानास्कंदितनिश्चये सर्थः वैयर्थ्यप्रसंगादिति संस्कारादेस्तादृशविषयितायाः सत्वेपि तादृशानिश्चयाव्यक्तित्वस्य क्षतत्वाद्यादि चेन्मूलोक्तज्ञानपदस्य तादृशार्थद्योतकत्वमुच्यते त
दप्याहाहृद इति यद्रूपावच्छिन्नविषयितासामान्ये तादृशनिश्चयाव्यक्तित्वनिवेशेन दोषैकदेशातिव्याप्तिवारणे तादृशानतिरिक्तव्यक्तित्वे यद्रूपावच्छिन्नविषयितात्वव्यापकत्वनिवेशे गौरवं बोध्यं
मस्मन्मत इति द्रव्यत्वविशिष्टसत्ताव्यापकमिति व्यवहारानुरोधेन विशिष्टाधिकरणताघटिताया एव व्यापकताया लाभादिति भावः ॐ इदं तु बोध्यं यन्मत्कारमतं सम्यगेव प्रकृतानुमितिप्रतिबं
धकतानतिरिक्तव्यक्तिमुख्यविशेष्यितानिरूपकतावच्छेदकतापर्याप्त्यधिकरणधर्मवत्वं दोषत्वमिति निष्कर्षसंभवात् एवं चाव्यापकविषयिताशून्यत्वानिवेशेन लाघवं बोध्यं नापि यद्रूपपदार्थाचं
तापत्तत्वाद्यनुगमो वा अनतिरिक्तव्यक्तित्वघटकनिश्चयहेतुमन्तानकालीनोत्पन्नत्वस्य इति नासाधारण्यासंग्रहः पर्वाद्युपादानान्नानुयुक्तोद्रुहदसावच्छिन्नेऽतिप्रसंग इति। ननु प्रकृतानुमितिप्रतिबंध

(64)

कर्त्वं यादृशविशिष्टविषयकनिश्चयात्वं तितादृशत्वमेवास्तु। व्यापकत्वाघटितवेशेन लाघवादितिचेन्न असाधारण्येऽव्याप्तेः प्रतिबंधकतावच्छेदकविषयताशून्यत्वेन निवेशे पाषाणमयवर्त्ताद्राव
तिव्याप्तिः न च पक्षधर्मताज्ञानाकालीनत्वासाधारण्यावगाहित्वोभयशून्यत्वेन यादृशविशिष्टविषयकनिश्चयो विरोधिगुणीभूतितवान्यंतथापि वह्न्यभाववज्जलादिमद्वृत्तिजलवद्ध्रदे ऽतिव्याप्तिः
मदिन्येतन्मते निरुक्तं यद्विशिष्टांतरघटितत्वं तन्निवेशनीयं दोषद्वयं तुल्यमेव तदा प्रतिहेतुव्यापकसाध्याभावे ऽव्याप्तेः पूर्वोक्तोभयाभाववत् प्रतिहेतोः पक्षधर्मताज्ञानाकालीनत्वे सत्यतिपक्षा
वगाहित्वोभयाभावस्य प्रतिहेतोः पक्षधर्मताज्ञानकालीनत्वस्य वा तद्विशेषणे च निर्वाहसंभवे विशुद्धशरीरत्वं दुर्वारमिति बोध्यं। [illegible] विरोधितेति। अविरोधितोयोर्ह्रदत्वादिरूपो धर्मः तदव
च्छिन्नपक्षके सत्यर्थः किंचिद्विशिष्टं ह्रदत्वादिविशिष्टह्रदत्वादितद्घटितस्य ह्रदो वह्निमान् ह्रदत्वादिसाधौ वन्ह्यभाववद्वृत्ति ह्रदत्वेत्वविशिष्टरूपस्य ह्रदो जासभाववानित्यादौ जातिमत्वद्रव्यत्व
विशिष्टरूपबाधादेर्दोषस्येसत्यर्थः तादृशविशिष्टविशिष्टविषयितावच्छेदकत्वं तन्निरूपकत्वं यद्धर्मेति। यद्रूपावच्छिन्नविषयितात्वं यादृशविशिष्टविषयितासमानाधिकरण्या
भावप्रतियोगितानवच्छेदकं यद्रूपावच्छिन्नविषयिताशून्यप्रतियोगिविषयतानवच्छेदकं यादृशरूपं यद्रूपावच्छिन्नविषयिताशून्यप्रतीत्यभावतितादृशविशिष्ट(विशि)ष्टविषयिताकं ज्ञानं यद्रूपं
तद्रूपावच्छिन्नविषयिताभेदकूटवती यावत्किंचिदवच्छिन्नविषयितातच्छून्यत्वमित्यर्थः यद्यपीति बीसाकरणान्नासंभवः ह्रदो वह्न्यभाववानित्याकारकनिश्चयस्यापि निरुक्तभिन्नह्रदत्व
प वन्हित्वादिनिरवच्छिन्नविषयिताशून्यत्वासंभवात् किंचिदवच्छिन्नेति यद्रूपावच्छिन्नस्य यत्स्यस्य यादृशविशिष्टघटकत्वे सुक्तो चेयद्रूपावच्छिन्नयद्विषयिताशून्यप्रतीत्यन्तितादृश
विशिष्टविषयिताकत्वमर्थस्यात् तत्र च पर्वतो निर्वह्निरित्यादौ वह्नित्वावच्छिन्नोद्देश्यवह्निमत्सर्वतरूपदोषघटकतानुपपत्तिः वह्निविशिष्टपर्वतत्वावच्छिन्नविषयितायाः वह्नित्वावच्छिन्नमहान
सीयवह्निविषयिताशून्यप्रतीतित्यन्तित्वात् तादृशयद्विषयिताशून्यत्वकूटनिवेशो वयस्यस्येसत्स्यवेयर्थ्यमिसतत्वं नोक्तं। तत्तद्रूपावच्छिन्नतत्तन्निष्ठविषयिताभिन्नेति अत्र तत्तं निष्ठे
तिकथनात् तत्तद्रूपावच्छिन्नमीयविषयितानां निराकरणेन तत्तन्निष्ठविषयिताभेदानां कतिपयानामेव कूटनिविष्टमिति लाघवमित्याशयेन तत्तन्निष्ठेत्युक्तं। तत्तद्रूपविशिष्टविषयिता
न्यत्वपर्यवसितं। वस्तुतस्तु तत्तद्रूपावच्छिन्नविषयितात्वावच्छिन्नभेदकूटनिवेशात्तद्वैयर्थ्यमेवेस्तवचेवं यद्विज्ञाभाववान् वन्ह्यभाववानितिग्राहीयायाऽभावत्वेन ह्रदत्वविषयतावारणाय
न तन्निष्ठेत्युक्तं तदा व्यापकविषयिताशून्यत्वनिवेशास्यतद्ग्राह्यस्तितवत्त्वासंगमननमिति बोध्यं। ह्रदो नासभाववानिति। यद्यपि विशिष्टघटकतावच्छेदकधर्मावच्छिन्नविष

३३

यत्तान्यत्किंचिदवच्छिन्नविषयताशून्यत्वनिवेशेऽसंभवः वह्न्यभाववत्त्वेन ह्रदत्वावगाशुद्धज्ञानावारणात् वह्न्यभाववत्त्वस्य विशिष्टघटकतानवच्छेदकत्वात् न च विशिष्टघटकतावच्छेदकता
समानाधिकरण्यात्तत्स्वजातीयावच्छेदकताकविषयितान्यत्वं विवक्षितं ह्रदत्वावच्छिन्नविषयिताया न तादृशी स्वरूपतो ह्रदत्वस्य घटकतावच्छेदकत्वादिहेतुवह्न्यभाववत्त्वेनावच्छेदकत्वादिति
वाच्यं। तथापि तस्याः प्रकारत्वविधया घटकतावच्छेदकवह्न्यभावावच्छिन्नत्वात् अन्यथा जातिमज्जातिमत्त्वरूपव्याघटकतानवच्छेदकरूपं तदवच्छिन्नविषयताया: प्रकारविधया घटक
तावच्छेदकजातिमत्त्वावच्छिन्नविषयितात्वेनैवाप्रसिद्धेरसंगत्यापत्तेः तथापि विशिष्टघटकतावच्छेदकरूपावच्छिन्नत्वभिन्नकिंचिदवच्छिन्नत्वाश्रयविषयिताशून्यत्वं विवक्षितं वह्न्यभा
वावच्छिन्नत्वे वह्न्यभावत्वविशिष्टवत्त्वं तरावच्छिन्नत्वयोर्भेदान्नासंभवः धर्मितावच्छेदकभावापन्नजातिमत्त्वावच्छिन्नविषयिताया: प्रकारविधया जातिमत्त्वावच्छिन्नविषयितारूपत्वमिव
तादृशविषयितानिष्ठजातिमत्त्वावच्छेद्यतात्वे जातिमत्त्वावच्छिन्नविषयितात्वभेदासत्त्वेनाप्रसिद्धेरुद्देश्यत्वासात्यः यद्रूपेति। यद्रूपावच्छिन्नविषयितान्यत्वस्य यद्रूपावच्छिन्नविषयिताया
मुक्तो ह्रदत्वेन ह्रदत्वधर्मितावच्छेदककवह्न्यभावज्ञानस्य ग्रासानुपपत्तिरतो ज्ञाने शून्यत्वांतनिवेशः जातिमान् जातिमानिति सप्रतिबंधकज्ञानव्याप्तिमाह। अप्रतिबंधकेति। अप्रतिबं
धकं यज्जातिमान् जातिमानिति ज्ञानं तद्विषयतावच्छेदकं यज्जातिमत्त्वादिकं जातित्वेन धर्मितावच्छेदकतया निविष्टह्रदत्वादिकमित्यर्थः तथा च जातिविशिष्टजातिमत्त्वावच्छिन्नविष
यितैवाव्यापकविषयितेति भावः नैतादृशाव्यापकविषयिताशून्यत्वनिवेशे ह्रदो वह्न्यभाववानिति ज्ञाने वह्न्यभाववद्ध्रदत्वावच्छिन्नविषयितासत्त्वेन स्वरूपतो ह्रदत्वावच्छिन्नपक्ष
कह्रदो वह्निमानित्यनुमितिप्रतिबंधकत्वेनासंभवः न हि तज्ज्ञाभावत्वावच्छिन्नविषयितात्वं वह्न्यभाववद्ध्रदविषयकत्वसमानाधिकरणाभावप्रतियोगितावच्छेदकं न वा तत्र वह्न्यभाव
वद्भावावच्छिन्नविषयित्वं अभावत्वेनाभावस्याभानात् येन तादृशबुद्धेर्विशिष्टविशिष्टविषयित्वाव्यापकविषयितावत्त्वेन व्याप्तिः स्यात्। न च यद्रूपावच्छिन्ने सत्त्वं यद्रूपनिष्ठावच्छेदक
ताकांश्च अधिकरणाप्रमनिरवच्छिन्नत्वं विशेषणं देयं तेनोक्तज्ञानीयह्रदत्वनिष्ठावच्छेदकताया: स्वव्यधिकरणेनाभावत्वेनावच्छिन्नत्वान्न व्याप्तिरिति वाच्यं। एवमपि पर्वतो द्रोणवह्न्यभा
वानित्यादिसाध्यनेव वह्निमत्पर्वतादिबाधाव्याप्तेः वह्नित्वेन वह्नित्वावगाहिन्यां पर्वतो वह्निमत्वानित्यादिबुद्धौ च वह्निमत्पर्वतत्वावच्छिन्नविषयिताया: सत्त्वात् न हि तत्र वह्नित्वावच्छिन्नविषयतावह्नि
मत्पर्वतविषयित्वाव्यापिका न वा तत्र वह्निमद्विशिष्टपर्वतत्वावच्छिन्नविषयिताताद्रूप्यमस्ति। वह्नित्वेनैव वह्नित्वस्य भानात्। येनोक्तनिवेशेन तद्बुद्धिव्याप्तिः स्यात् एवं तत्र यद्रूप

२

पदेन वह्नित्वविशिष्टपर्वतत्वयोरेव ग्राह्यतया तदुभयनिष्ठावच्छेदकतायाः अधिकरणधर्मावच्छिन्नत्वात् वह्नित्वनिष्ठावच्छेदकतावच्छेदकताया एव तथात्वात् इति प्रोक्तविशेषणेनापि
वैतत्त्वानवारणसंभवः यदि च तत्र वह्नित्वविशिष्टनिष्ठावच्छेदकताया वह्नित्वांतर्भावेण पर्याप्तिः स्यादपि तस्यां न त्रावयते स्वअधिकरणधर्मानवच्छिन्नत्वं वह्नि वह्नित्वयोरवच्छेदक
तापर्याप्तिर्वह्नित्वस्य तदधिकरणधर्मताया एव दुर्घटत्वात् स्वाधिकरणयत्किंचिद्व्यक्तित्वं वैयधिकरण्यमिति चेन्न हि उक्तदोषवारणाय दत्तस्य तत्र विशेषणं चेद मभिमतं तदा
याथार्थ्यरूपविशेषणवैयर्थ्यापत्तिः सा रिक्तस्य द्वितीयलक्षणमात्रे हेतिदीधितिकाराणामवतारणासंगतमापद्येत। भवदुक्तविशेषावच्छेदकताविशेषणमनुपादाय स्वअधिकरणप्रकारा
वच्छिन्नविशेष्यत्वानिरूपकत्वरूपयाथार्थ्यरूपमौलविशेषणेनैवोक्तबुद्धीनां वारणासंभवेन तत्सार्थक्यासंभवात् स्वोत्प्रेक्षितविशेषणमुपादाय मौलविशेषणवैयर्थ्यस्य सिद्धमन्त्रे
परिहरज्येति न्यायग्रस्तत्वात् स्वावच्छेदकतावच्छेदकसंबंधेन स्वव्यधिकरणधर्मावच्छिन्नायाया अवच्छेदकता तत्तदन्यत्वरूपभवदुक्तविशेषणस्यापि भेदकूटघटितत्वेन लाघवानवकाश-
श्चो। न चैवं संबंधावच्छिन्नयद्रूपावच्छिन्नविषयितात्वं यादृशविशिष्टविषयकत्वसमानाधिकरणाभावप्रतियोगितावच्छेदकं तत्संबंधावच्छिन्नतद्रूपावच्छिन्नविषयिताशून्यत्वमेवा
व्यापकविषयिताशून्यत्वं समवायावच्छिन्नाभावत्वावच्छिन्नविषयतादीनां वन्ह्यभाववद्ह्रदत्वावच्छिन्नविषयिताव्यापकत्वादुक्तबुद्धिमुदासः इति वाच्यं तथापि वन्ह्यभाववत्वे समवायाव
वच्छिन्नवन्ह्यभावसाधनेन वह्निमदन्यत्ववत्स्वरूपबाधाद्यापत्तेः वह्निमदन्यत्ववत् इति ज्ञाने वह्नित्वेन वह्नित्वभानात् समवायावच्छिन्नवह्नित्वावच्छिन्नविषयितायाः उक्तबाधविषयिताव्याप
कत्वाच्चेत्यादेः समावेशात् न च यद्रूपावच्छिन्नविषयितानिरूपितयद्रूपावच्छिन्नविषयितात्वेन तादृशविशिष्टविषयकत्वसमानाधिकरणाभावप्रतियोगितावच्छेदकं तत्संबंधावच्छि
न्नतद्रूपावच्छिन्नविषयितानिरूपिततद्रूपावच्छिन्नविषयिताशून्यत्वं तदर्थः अभाववान् वन्ह्यभाववानिति ज्ञाने च वन्ह्यभाववद्ह्रदत्वावच्छिन्नविषयितानिरूपिताभावत्वावच्छिन्न
विषयितायाः तादृश्याः सत्वेन तद्व्युदास इति वाच्यं एवमप्यभाववान् वन्ह्यभाववानिति ज्ञानावारणात् वन्ह्यभाववद्ह्रदत्वावच्छिन्नविषयितानिरूपिताया वन्ह्यभावप्रकारितारू
पाभावत्वावच्छिन्नविषयितायाः सत्वेन तादृशविषयताया उक्तवन्ह्यभाववद्ह्रदविषयिताव्यापकत्वाभावात् न च यद्रूपावच्छिन्ने सत्त्व यद्धर्मपर्याप्तिर्विवक्षिता वन्ह्यभावत्वावच्छिन्नप्र
कारिताया न केवलाभावत्वपर्याप्तावच्छेदकताका अपि तु वह्नि अभावत्वे तदुभयपर्याप्तावच्छेदकताकैवेति न तादृशविशिष्टविषयिताव्यापिकेति वाच्यं वन्ह्यभाववानिति ज्ञाने पि

वै २

वह्नित्वावच्छिन्नप्रकारितानिरूपिताभावत्वावच्छिन्नप्रकारितैव वह्न्यभावत्वावच्छिन्नप्रकारि[illegible]तात्वेन व्यवह्रियते तदुभयनिष्ठविषयितानिरूपकत्वात्मव्यतिरिक्ता तत्र च विषयिता
स्वीकृपेयते मानाभावात् एवं च न वह्न्यभावत्वपर्याप्तावच्छेदकताकनिरूपितदोषताद्वचस्थात्। अस्तु वा तत्र यथा तथा न तथापि वह्न्यभावत्वेन ह्रदत्वमवगाहमानायां ह्रदो वह्न्यभाववान्नत्ववह्न्यभा
वधा[illegible]निति बुद्धौ व्यापकविषयिताशून्यत्वमव्याहतमेव यदि च यत्संबन्धावच्छिन्नयद्रूपावच्छिन्नविषयितानिरूपितयद्रूपावच्छिन्नविषयिते तेसादिरीत्या [illegible] परिष्कारेण षदो
षः। समवायावच्छिन्नवह्न्यभावत्वा[illegible]वच्छिन्नविषयतानिरूपितवह्न्यभाववद्ह्रदत्वावच्छिन्नविषयिताया एव विशिष्टविषयित्वाव्यापिकायाः सत्त्वादिति विभाव्यते तत्र तथा
भावोवह्निमान् ह्रदत्यादौ वह्न्यभाववदभावरूपबाधाव्याप्तिः तत्परिहाराय वह्न्यभावत्वेनाभावत्वमवगाहमानायां वह्न्यभाववान्वह्न्यभाववानित्याकारिकायां यथोक्तवि
शेषणाक्रान्तताया अप्रतिबन्धकत्वादित्यत्रेदं समाधानं विषयितानिरूपितयद्रूपावच्छिन्नविषयितात्वं यादृशविशिष्टविषयक[illegible]त्वसमानाधिकरणाभावप्रतियोगि
तावच्छेदकं स्वभिन्नतद्रूपावच्छिन्नविषयितानिरूपितविषयितानिरूपिततद्रूपावच्छिन्नविषयितान्यत्वे च व्यापकविषयितान्यत्वं तद्वत्त्वम् अर्थः एवं चाभाववान्वह्न्य
भाववानित्यादि ज्ञाने विशिष्टविषयित्वाव्यापिकायाः वह्न्यभावत्वावच्छिन्नविषयितानिरूपितह्रदविषयितानिरूपिताभावत्वावच्छिन्नविषयितायाः [illegible] वह्न्यभा
वप्रकारिताव्यक्तिभिन्नायाः सत्त्वेन न दोषः स्वभिन्नत्वोपादानाच्च वह्न्यभावत्वावच्छिन्नविषयितानिरूपितह्रदविषयितानिरूपितस्यात्मकवह्न्यभावत्वावच्छिन्नविषयि
ताव्यक्तेर्वह्न्यभाववान्ह्रद इत्याकारकज्ञाने सत्त्वेपि न तस्या अव्यापकत्वहानिः न च स्वपदेन यद्रूपावच्छिन्नविषयितात्वावच्छिन्नस्योपादाने यत्किञ्चित्तदवच्छिन्नभेदस्य
न वह्न्यभावत्वावच्छिन्नविषयितायां संभवतीति कथं वह्न्यभाववान्वह्न्यभाववानिति ज्ञानव्यावृत्तिः यत्किञ्चित्तादृशविषयितानिवेशे च ह्रदो वह्न्यभाववानित्यादावपि ता
दृशविषयितासत्त्वादव्यापकत्वमेवासिद्धं यद्विषयिताव्यक्तिनिरूपितविषयितानिरूपिततद्विषयिताव्यक्ति[illegible]भिन्नयद्विषयितात्वमित्यादिरीत्या तत्र [illegible] व्यक्ति
त्वेन विषयितानिवेशे व्यापकविषयितान्यत्वज्ञानस्यैवाप्रसिद्धिः अभाववान्वह्न्यभाववानिति विशिष्टविषयकज्ञाने ह्रदो वह्न्यभाववानिति [illegible] नी म विषयिताया अस

६ स्वभिन्नयद्रूपावच्छिन्नविषयितानिरूपित ८

मा

त्वेन तस्या अप्यव्यापकत्वादिति वाच्यं स्वान्यत्वत्वनिरूपितविषयतानिरूपितत्वोभयसंबंधेन यद्रूपावच्छिन्नविषयिताविशिष्टयद्रूपावच्छिन्नविषयितात्वस्य तेनोक्तत्वात् स्वान्यत्वं स्व॰सुभया॰प्रति
धर्मावच्छिन्नत्वमेवेति अत्र वदंति। अभावेपक्षे संयोगेन वन्हेः साध्यत्वे स्वरूपतोऽभावत्वस्येपक्षतावच्छेदकतया स्वरूपतोऽभावत्वघटितेन स्वभाववदभावरूपबाधेऽव्याप्तिः यतः अभावधान्
वत्स्वभाववानिति अभावत्वेनाभावत्वावगाह्यप्रतिबंधकग्रहो न वार्यते। स्वभिन्नत्वस्वनिरूपितविषयितानिरूपितत्वोभयसंबंधेन यद्रूपावच्छिन्नविषयिताविशिष्टयद्रूपावच्छिन्नविषयितायाः
अभावो वत्स्वभाववानिति दोषविषयकनिश्चयेपि सांसर्गिकविषयितामादाय सत्वेनाविशिष्टविषयिताव्यापकत्वाभावादिति। अत्रेदं बोध्यं स्वभिन्नत्वं यद्रूपावच्छिन्नविषयिता॰सुभया॰प्रतियो
गित्वोभया॰ति धर्मवत्वं अभावो वत्स्वभाववानित्यादौ तदवच्छिन्नप्रकारताकत्वनिस्तादृशो धर्मः तत्राद्यो व्यापकघटकः न तु द्वितीय इति न दोषः वस्तुतस्तु। स्वनिरूपितविषयितानिरूपितत्वरूप
संबंधघटकविषयितायां सांसर्गिकविषयितान्यत्वं विशेषणं तेन तथाविधसंबंधेन वत्स्वभाववत्तावच्छिन्नविषयिताविशिष्टाभावत्वावच्छिन्नविषयितायाः विशिष्टविषयिताव्यापिकायाः अभा
वत्वान्वे स्वभाववानित्यादावेव सत्वान्नाव्याप्तिरिति। यत्तु। एतन्मते ह्रदो वन्हिमान्नवेति संशयवारणाय निश्चयत्वस्याव्यापकत्वेपि विषयिताद्वयनिवेशमते तादृशसंशयस्य वन्हित्वावच्छिन्नविष
यितानिरूपितह्रदत्वावच्छिन्नविषयितायाः वत्स्वभावविशिष्ट ह्रदत्वविशिष्टविषयिताव्यापिकायाः सत्वेनैव वारणसंभवात् मूलोक्तनिश्चयपदं व्यर्थमिति तन्न सर्वत्र तस्य प्रयोजनाभावेपि घटो
जलभिन्नत्यादिस्थलीयजलान्यघटात्मकबाधाव्याप्तिवारणार्थत्वात् अन्यथा घटो जलं न वेत्यादिसंशयस्य जलत्वजलभेदकोटिकस्य जलत्वप्रकारताया निरवच्छिन्नत्वेन यद्रूपावच्छिन्नविषयि
तात्वेन ग्रहीतुमशक्यतया निरुक्ताव्यापकविषयिताशून्यत्वस्य तत्राक्षततया तादृशेषणेनावर्तनादिति अभावे संयोगेन वन्ह्यादेः साध्यत्वेऽभावो वन्हिमान्नवेति संशयवारणमपि तत्स्व
योजनं अन्यथा वन्हित्वावच्छिन्नविषयितानिरूपितविषयिताया अव्यापकत्वाभावेनाव्याप्तेरिति न किंचिदनुपपन्नं। अत्र केचित् यद्रूपावच्छिन्नविषयितात्वं यादृशविशिष्टविषयकत्वसमा
नाधिकरणाभावप्रतियोगितावच्छेदकं तद्रूपावच्छिन्नविषयिताशून्यत्वं न निश्चयपदानुसरणं। असंभवापत्तेः प्रमेयत्वादिना वन्ह्यभावप्रकारकह्रदत्वधर्मितावच्छेदकज्ञानसाधारण्यात् स्वभाव
विशिष्टह्रदत्वावच्छिन्नविषयकत्वसमानाधिकरणाभावप्रतियोगितावच्छेदकं यद्वन्ह्यभावत्वावच्छिन्नविषयितात्वं तच्छून्यत्वस्य दोषविषयकनिश्चयेऽभावात् न च यद्रूपावच्छिन्नविषयिता
निरूपितयद्रूपावच्छिन्नविषयितानिरूपितयद्रूपावच्छिन्नविषयिताशालित्वं यादृशविशिष्टविषयकत्वं विवक्षणीयमिति वाच्यं। पर्वते वन्ह्यभावसाधने वन्हिमत्पर्वतरूपबाधाव्याप्तेः।

३८ न च साध्यादिभेदेन लक्षणभेदः स्यादेवेति वाच्यं एकोक्त्यनादरे तावदन्यतमत्वस्यैव सम्यक्त्वस्यात्येन निर्धार्यमाणत्वापत्तेः वह्निव्याप्यवत्स्वरूपसत्त्वेतिपक्षासंग्रहाच्च विषयि
तान्वयनिवेशे बाधासंग्रहात् तस्मादनुमितिप्रतिबंधकतायाश्चिल्लक्षणविषयितासंबंधेन यद्रूपावच्छिन्नव्यापकत्वं वक्ष्यमेवादरणीयं । एतेनाभाववत्त्वादिना हृदत्वावगा
हिज्ञानवारणाय यद्रूपावच्छिन्नविषयितानिरूपितयद्रूपावच्छिन्नविषयितात्वं तादृशाभिसाध्यादिक्रमेण परिष्कारो नादेय इति तन्तुच्छं ध्येयोद्दशाविशिष्टविषयकत्व
समानेस्तत्र पाद्यधिशिष्टविषयकत्वं यद्रूपावच्छिन्नविषयितानिरूपितविषयित्वं यद्रूपं चावह्निविशिष्टाभावहृदत्वोभयादिकं पूर्वोक्तं यथाश्रुतगात्ये तथा च
प्रमेयत्वेन वन्ह्यभावावगाहिज्ञाने वह्निविशिष्टाभावनिष्ठावच्छेदकताकविषयितानिरूपितभावविषयिताविरह इत्यदोषात् । अपरे तु अथ यद्रूपावच्छिन्नविषयितासमा
नाधिकरणाभावप्रतियोगितावच्छेदकं यद्रूपावच्छिन्नविषयितात्वं तद्रूपावच्छिन्नविषयिताशून्यत्वं निवेशो अभावत्वेन हृदत्वावगाह्यभाववोन्नवन्ह्यभावियानित्यादिज्ञानवारणा
मत्राव्यं अभावत्वावच्छिन्नविषयितात्वस्यैव वन्ह्यभाववद्धृदविषयकत्वे समानाधिकरणाभावप्रतियोगितानवच्छेदकत्वान्न यद्रूपपदेनाभावत्वस्य धर्तुमशक्यत्वात् वन्ह्यभावव
तद्रूपे दभावत्वस्य धर्तुमशक्यत्वेपि तद्रूपे तद्रूपावच्छिन्नविषयिताशून्यत्वस्य सत्त्वात् । न च यद्रूपावच्छिन्नविषयितानिरूपितयद्रूपावच्छिन्नविषयितात्वं तादृशं तद्रूपावच्छिन्न
विषयितानिरूपिततद्रूपावच्छिन्नविषयिताशून्यत्वं निवेश्यं तथा चाभावत्वावच्छिन्नविषयितानिरूपितवन्ह्यभाववद्धृदत्वावच्छिन्नविषयितात्वं न चेति तादृशविषयिताशू
वत्ता न्यत्वं न तत्रास्तीति वाच्यं अभावावच्छिन्नविषयितानिरूपितवन्ह्यभाववद्धृदत्वावच्छिन्नविषयिताया अपि वन्ह्यभाववद्धृदत्वे विशिष्टविषयकताव्यापकत्वाभावात् न चाभावत्वमात्रा
वच्छिन्नविषयितानिरूपितवन्ह्यभाववद्धृदत्वावच्छिन्नविषयिताया अव्यापकत्वात् न च शून्यत्वाभावान्नासंगतिरिति वाच्यं । तथापि वन्ह्यभावत्वेन हृदत्वावगाहिभ्रमवारणासं
भवात् न च भ्रमान्यत्वं विशेषणं देयमिति वाच्यं एतत्कल्पेतस्या उपादेयत्वात् न च यद्रूपावच्छिन्नविषयिताव्यापकमित्यत्र यद्रूपनिष्ठावच्छेदकत्वं यद्रूपाव्यतिरिक्तधर्मानवच्छि
न्नत्वं विशेषणं [illegible] जोतित्व प्रमेयत्वादिना हृदत्वावगाहिज्ञानस्य प्रमात्वाद्व्यापकविषयिताशून्यत्वेन वारणाद् इति [illegible] वाच्यं तथापि प्रकारीभूतवह्नित्वस्याभावत्वेन

भाव

तेनावारणात् ॥ न च हृदो ऽभाववदभाववानिति ज्ञानं वाच्यं तत्राभावत्वेन वह्नित्वावगाहितया शुद्धवह्नित्वावच्छिन्नप्रतियोगितायाः संसर्गत्वानुपगमात्तथा च तादृशविशिष्टविषय
कमिति वह्न्यभाववद्धृदो नाव्याप्तिरिति वाच्यं अभाववत्सर्वतेन वह्न्यभावसाधने वह्निमत्सर्वतेऽव्याप्तेरभिधानात् ॥ न च यादृशविषयितात्वं तादृशप्रतियोगितावच्छेदकं तादृशविषयि
तात्वावच्छिन्नाभाववत्त्वं विशेषणं देयमिति वाच्यं वह्नित्वावच्छिन्नविषयितानिरूपिताभावत्वावच्छिन्नविषयितानिरूपितहृदत्वावच्छिन्नविषयितानिरूपिताभावत्वावच्छिन्नविषयितात्वा
दिरूपस्य तादृशविषयितात्वस्यापि तादृशविशिष्टविषयित्वसमानाधिकरणाभावप्रतियोगितावच्छेदकत्वाभावादिति चेन्न तत्तद्रूपेणान्यत्वेन स्वतंत्रविशेषणस्यापि देयत्वात्
स्वाभाववन्निष्ठविशेष्यतानिरूपितस्वनिष्ठप्रकारताकत्वस्वाश्रयनिष्ठविशेष्यतानिरूपितस्वनिष्ठप्रकारतावत्त्वोभयसंबंधेन न किंचिद्धर्मवज्ज्ञानान्यत्वं देयमिति तथा च वस्तु
गतोक्तिसंभवाच्चेदेवं तु स्वविशिष्टविशेष्यतावत्त्वस्वविशिष्टविशेष्यतावत्त्वोभयसंबंधेन यत्किंचिद्धर्मवैशिष्ट्यान्यत्वं तत् एवं विशिष्टस्य स्वनिष्ठप्रकारतानिरूपि
तत्त्वस्वाश्रयवन्निष्ठोभयसंबंधेन अपरं स्वनिष्ठप्रकारतानिरूपितत्वस्वाभाववन्निष्ठत्वोभयसंबंधेनेत्याहुः परे तु विषयतावच्छेदकांशे स्वव्यधिकरणप्रकार
वच्छिन्नविषयताशून्यत्वमेवमुक्तं विषयतावच्छेदकांशे तत्त्वोपादानान्न ज्ञानपदस्य निश्चयपरत्वेऽपि यथार्थमितावच्छेदकांशे तत्त्वतोऽभावत्वेन वह्नित्वाव
स्य५ गाहिभ्रमेण वारणं स्यादित्याहुः परे तु यद्रूपावच्छिन्न यत्किंचिद्विषयितानिरूपितयद्रूपावच्छिन्नविषयितात्वे यद्रूपावच्छिन्नविषयिताचावान्तरथ
र्मावच्छिन्ननिरूपितयद्रूपावच्छिन्नविषयितात्वं यद्रूपावच्छिन्नविषयितात्वेन निरूपकतावद्यद्रूपावच्छिन्नविषयितात्वेनादृशामित्यादिक्रमेण निवेशा
न्न कोऽपि दोषः नापि स्वाभाववन्निष्ठेत्यादेरावश्यकत्वं इत्याहुः निश्चयत्वसार्थक्याय स्वाश्रयेतियत्रे विषयविशेषदोषज्ञाने पदार्थान्तरे भ्रमः तत्संग्रहाय
स्वाश्रये निष्ठेति न च यत्र दोषज्ञानं पदार्थान्तरे प्रमाभ्रमोभयात्मकं तत्संग्रह इति वाच्यं तत्रोक्तरीत्या प्रतिबंधकत्वे दोषज्ञानेन तज्ज्ञानान्यत्वनिवे
शादिति याथार्थ्यादिकमन्यदेवेति न तद्ग्रहणं यथार्थं गृहनित्याहुः वस्तुतो यथेच्छा नियमात्तद्धूमाभाववानिति भ्रमं प्रत्येवापातनः विषयिता संबंधेन यादृश

शिरि

विशिष्टव्यापकं प्रतिबंधकत्वेन तादृशत्वमेव यत्र स्वरूपतो ऽस्वरूपतो वा यादृशविशेषणघटितो यादृशविशिष्टो हेतुस्तत्र तादृशविशिष्टनिरूपितविषयिताया एव तादृशविशि-
ष्टस्यापि सर्गतास्वीक्रियते न त्वन्यनिष्ठाया इति जातिमद्धूमाभाववद्रूपविशिष्टनिरूपितविषयिताया स्वरूपतो ह्रदत्वघटितविशिष्टसंबंधताविरहेणासंभवाभावात् परंतु तादृशत्वे
मनुगतमिति एतेनाभावत्वेन ह्रदत्वावगाहित्वेन वारणाय यथार्थपदस्यार्थक्यसंभवेन दीधितिकृतां यथार्थपदघटितद्वितीयलक्षणाभासस्य विरोध इति परास्तौ अत एवानुमितित्वं प्रे-
परामर्शत्वेन च भट्टाचार्येण विशिष्टव्याप्तिप्रतिच्छिन्नस्थले स्वरूपेण विषयितामनुपादाय विषयितासंबंधेन विशिष्टविषयस्य न ज्ञानेति निवेशः कृत इति सारं। अभाववान् स्वस्याभाववानिति ता-
न वारणाय स्वसामानाधिकरण्याविशिष्टपदार्थघटकधर्मावच्छिन्नविषयितानिरूपकत्वं यावत्पर्याप्तिमेव विशेषणं तथा च यद्रूपावच्छिन्नविषयितानिवेशे ऽव्यापकविषयिताशून्यत्वनिवे-
शस्य सम्यग्भाव स्यादाहुरिति कृतं पल्लवितेन। ननु यद्रूपावच्छिन्नविषयिता प्रकृतानुमितित्वव्यापकप्रतिबध्यतानिरूपितप्रतिबंधकतानतिरिक्तवृत्ति सुतो ह्रदो वह्निमान् धूमादित्यादौ जातिमा-
न्वह्निमान् वह्निव्याप्यधूमवांश्चेत्यनुमितौ प्रतिबध्यताविरहेणासंभवो दुर्वार इति चेन्न यद्रूपावच्छिन्नविषयितात्वं प्रकृतानुमितित्वसमानाधिकरणाभावप्रतियोगितावच्छेदकं तद्रूपावच्छिन्न-
विषयिताशून्यसमूहालंबनानुमितित्वव्यापकत्वेन प्रतिबध्यताया विशेषणीयत्वात् न चैवं तथापि ह्रदो जात्यभाववानित्यादौ जातिमान् जात्यभाववान् वा जात्यभावव्याप्यवानित्यादिज्ञानवारणा-
मन्यथमेवानन्याहार्यानुमितित्वं गौरवेण तादृशानुमितिसमत्वाप्रसिद्धेर्न दोष इति वाच्यं तथापि ह्रदो जात्यभाववत्त्वा जात्यभावत्वप्रकारकभ्रमाविशेष्यत्ववान् धूमादित्यादौ जातिमान् जात्यभा-
वत्त्ववांश्च ■ व्याप्यवांश्चेत्यनुमितिवारणमशक्यमेवेति वाच्यं यद्रूपावच्छिन्नविषयितानिरूपितयद्रूपावच्छिन्नविषयितात्वं समूहालंबनानुमितिनिष्ठाभावप्रतियोगितावच्छेदकं तद्रूपाव-
च्छिन्ननिरूपिततद्रूपावच्छिन्नविषयिताशून्यप्रकृतानुमितित्वव्यापकत्वस्य निवेशनीयत्वात् अत एव ह्रदो वह्निमान् धूमादित्यादिस्थले वह्नित्वादिना ह्रदत्वावगाहि वह्निमान् वह्निमान् वह्निव्याप्यधू-
मवानित्याद्यनुमितेरपि ■ यत्संबंधावच्छिन्नयद्रूपावच्छिन्नविषयितात्वं तादृशं तत्संबंधावच्छिन्नतद्रूपावच्छिन्नविषयिताशून्यत्वस्य तादृशानुमितावसत्त्वेन तथाविधह्रदो वह्निमान् वह्निव्या-
प्यधूमवांश्चेत्यनुमितित्वव्यापकत्वस्य प्रतिबध्यतायामसत्तया न कोपि दोष इति दिक्॥ अथ तथापि जातिमान् वह्निमानित्य■नुमितिवारणाय निरवच्छिन्नविशेष्यतावच्छेदकताकत्व-
मेव निवेश्यं पंचजलवान् वह्निमानित्यादेतु जातिमद्वान् वह्निमानित्यनुमितिवारणाय निरवच्छिन्नत्वघटकत्वमिति दिगिति चेन्न एकमात्रदोषस्थले इति पंक्तिपरिमितव्याख्यानालोचनेनाह
~~[illegible]~~ कौक्तिरक्षणाय एवं सूत्री निर्भरात् अथाव्यापकविषयिताशून्यानुमितित्वनिवेशे वह्निमान् धूमादित्यादौ ह्रदो वे-
त्वेन तत्र प्रतिबध्यताविरहेणासंभवापत्ताविव वह्नित्वावच्छिन्नविषयितानिरूपित

२४ समवायेन जातिमत्त्वस्य यद्रूपपदेनोपादाने पूर्वप्रयोजनं दोषविरत्याद्याहृत एवेति २४

78

वह्निमान् पर्वतो वह्निमान् वह्निव्याप्यधूमवांश्चेत्यनुमितिकारणात् यत्राभावत्वकृदेऽतिव्याप्त्यभावेन व्यापकत्वविवक्षावैयर्थ्यम्। मैवं पर्वतो वह्निमान् वह्निविशिष्टधूमादित्यादौ सामानाधिक
रण्येन यकेः साध्यत्वे वह्न्यभाववत्सर्वतेऽतिव्याप्तिस्तथाहि पर्वतत्वव्यापकत्वविशिष्टसंयोगो हेतुतावच्छेदकसंबंधः तत्संबंधेन वह्निवैशिष्ट्यं च तथा च पर्वतो वह्निमान् वह्निव्याप्यतादृशधूमवा
न् पर्वतत्वावच्छेदेन वह्निमानित्यनुमितौ या पर्वतत्वावच्छिन्नविषयिता निरूपिता वह्नित्वावच्छिन्नविषयितानिरूपिता या पर्वतत्वावच्छिन्नसंयोगत्वरूपयद्रूपावच्छिन्नविषयिता साप्रकृतानु
मितित्वव्यापिकैव तादृशसंयोगसंबंधेन वह्निविशिष्टपर्वतत्वात्मकं यद्रूपं तत्प्रसिद्धं येन तदवच्छिन्नविषयितायाः प्रकृतानुमितित्वाव्यापकतया तत्तद्विशेषणेन तद्व्याप्तिः स्यात् एवं च
तादृशानुमितेरव्यापकविषयिताशून्यतया दर्शितबाधेऽतिव्याप्तिरिति व्यापकत्वोपादानं। एवं स्वान्यत्वस्य निरूपितविषयितानिरूपितत्वोभयसंबंधेन यद्रूपावच्छिन्नविषयि
ताविशिष्टयद्रूपावच्छिन्नविषयितात्वं इत्यादिक्रमेण व्यापकविषयिताशून्यत्वं निवेश्यते तदा पर्वतो वह्निमान् तद्धूमवान् हृदश्च वह्निमानित्यनुमितेरवारणमेव हृदत्ववह्नि
त्वावच्छिन्नविषयिताद्वयमव्यापकविषयिताविरहात् सांसर्गिकविषयितास्तीति चेत् तदाभावो वह्निमानित्यादौ अभाववान् वह्निमानित्यनुमितेरप्रतिबध्यायाः संग्रहवारणा
य तदन्यत्वप्रवेश आवश्यकः वस्तुतस्तु कश्चित्सखण्डो एकोऽनेको वा स्वरूपतो भानार्हः पक्षतावच्छेदकः क्वचित्तु तदवच्छेदकघटितत्रतादृशतादृशपक्षतावच्छेदके विलक्षणाः
ता पर्याप्त्यवृत्तिः सामनुगतास्वदं लक्षणं। एवं च जातिमान् वह्निमानित्यनुमितेः प्रकृतत्वाभावादेव वारणासंभवात् किमव्यापकविषयिताशून्यत्वेन। न चैवमाहार्यज्ञानवारणा
र्थमनुमितित्वनिवेशादुत्तिपूर्वोक्तविरोध इति वाच्यं। ज्ञानत्वानुमितित्वयोः समनियतत्वेऽपि मूलानुरोधेनानुमितित्वस्यैव निवेशादस्यात्र निर्भरः प्रयोजनं तु पर्याप्त्यर्थनिवेशमभि
प्रेत्य तत्कंचेपर्याप्तावपि प्रयोजनं। वस्तुतस्तु हृदो वह्निमान् वह्निव्याप्यधूमवांश्चेति लौकिकप्रत्यक्षस्य शंखः पीतः पीतत्वव्याप्यशंखत्ववांश्चेति दोषविशेषजन्यप्रत्यक्षस्य च
वारणमेवानुमितित्वोपादानफलं। लौकिकसंनिकर्षाघजन्यज्ञानत्वस्य सिद्धमनुमितित्वापेक्षया गुरुत्वाच्चेति निगर्वः। विशिष्टविषयितासामान्यस्येति। अथात्र
पदं व्यर्थमेव। न च यद्रूपावच्छिन्नविषयिताप्रकृतानुमितिप्रतिबंधकतानिरूपितस्वरूपसंबंधरूपावच्छेदकतावती सुक्तौ वन्ह्यभाववद्धृदघटकवन्ह्यभावेऽतिव्याप्ति

८ इदं तु प्रथमयद्रूपावच्छिन्नविषयितायां प्रत्येकं विलक्षणनिवेशाभिप्रायेण तेनाभावत्वावच्छिन्नप्रकारितानिरूपितहेतुविषयितत्वव्यापकत्वेऽपि न क्षतिः निरूपकभेदेऽपि निरूपकतावच्छेदकैक्ये विषयताया ऐक्यमिति समभिप्रायेणाय [illegible]

रितिवाच्यम् उक्तरीत्या संभववारणाय व्यापकविषयिताशून्यत्वस्यावश्यकतया वह्न्यभावत्वावच्छिन्नविषयितात्वं वह्न्यभावत्वावच्छिन्नविषयकत्वसमानाधिकरणाभावप्रतियोगि-
त्वेनावच्छेदकं तद्रूपावच्छिन्नविषयिताशून्यं वह्न्यभाववदित्याकारकं ज्ञानमेव तद्धेतु इति तद्विशिष्टवह्न्यभावत्वावच्छिन्नविषयितायाः प्रकृतानुमितिप्रतिबन्धकतानि-
रूपितस्वरूपसम्बन्धरूपावच्छेदकत्वानाश्रयत्वेन नातिव्याप्तेरनवकाश इत्थञ्चेदं सामानाधिकरण्यं बोध्यम्। एतादृशस्य सर्वस्य [illegible] देवावारणेऽपि गोत्वाभावो
गोत्वाभाववान् [illegible] इत्यादिस्थले संदिग्धो गोत्वाभावो गोत्वाभाववानिति भ्रमविषयगोत्वाभावरूपपक्षे अतिव्याप्तिः गोत्वविषयिताया अव्यापकत्वासंभवेन
गोत्ववत्त्वाभाववत्त्वाप्रसिद्ध्या घटत्वादिविषयिताया एवाव्यापकत्वेन क्रमस्य तच्छून्यत्वादिसव्यापकविषयिताशून्यत्वेन निवेशेऽपि सामान्यपदमावश्यकमिति। गोत्वं गोत्वाभावत्वे
तदुभयात्मकं यद्रूपं तदवच्छिन्नविषयिताया गोत्वाभाववद्वृत्ति गोत्वज्ञानेऽपीति न गोत्वाभावो गोत्ववानिति ज्ञानस्याव्यापकीभूतविषयिताशालित्वं भ्रमः कार्यः अत्रेदमाशङ्क्यते। अभावत्वे
न हृदत्वावगाह्यभावे अभावत्वेनाभाववानिति ज्ञानवारणाय पूर्वोक्तरीत्या यद्रूपावच्छिन्नविषयितात्वनिरूपितयद्रूपावच्छिन्नविषयितात्वं तादृशविशिष्टसमानेत्याद्युक्तम्। अव्यापकं विषयिताशू-
न्यत्वस्यैव तत्क्रियते तदा प्रकृते गोत्वाभावत्वावच्छिन्नविषयितानिरूपितगोत्वत्वावच्छिन्नविषयिताया अव्यापकत्वेन क्रमस्य तच्छून्यत्वेन संभवस्येवेति तद्विशेषणे सामान्यपदं व्यर्थमिति
अत्राहुः गोत्वाभावत्वावच्छिन्नविषयितानिरूपितगोत्वविषयितायां निरवच्छिन्नत्वेन यद्रूपावच्छिन्नविषयितेत्यनेनोपादानासंभवात् गोत्वाभावे गोभेदसाध्यकसद्धेतौ गोत्वा-
भाववारणार्थं सामान्यपदमावश्यकमिति। न च द्वितीय यद्रूपावच्छिन्नत्वं विहाय यन्निष्ठत्वनिवेशेनैवोक्तभ्रमवारणे सामान्यपदं व्यर्थं। तावन्मात्रेणैवाभावत्वेन
हृदत्वावगाह्यभाववान् वह्न्यभाववानिति भ्रमवारणं संभवति हृदत्वावच्छिन्ननिष्ठविषयितानिरूपितहृदनिष्ठविषयिताया वह्न्यभाववद्वृत्तिविषयिताव्यापकतया क्र-
मस्य तच्छून्यत्वाभावादिति वाच्यं तथा सति तद्वैयर्थ्यस्येष्टत्वात्। अथ [illegible] ज्ञानभेदेन विषयिताया भेदेऽपि विषयभेदेन तद्भेदाद्धृदस्य भावत्वावच्छिन्नविषयितानिरूपिततत्त-
अत्रेदं बोध्यम् १

१ अत्रेदं बोध्यं यदि स्वान्यत्वस्वनिरूपितविषयितानिरूपितत्वोभयसंबन्धेन यद्रूपावच्छिन्नविषयिताविशिष्टयद्रूपावच्छिन्नविषयितात्वमिति द्वितीययद्रूपद पपदं (:स्पे:) परि:
सत्यन्ते तत्र हृदत्वे [illegible] विषयिताविशिष्टविषयितात्वस्य व्यापकता [illegible] भाववान् [illegible]

ह्रदत्वावच्छिन्नविषयितानामव्यापकतयादोषनिश्चयेतन्न्यूनत्वाभावादसंभवः एवं निरूपितत्वसंबंधेन स्वाश्रयत्वनिरूपितविषयितानिरूपितत्वोभयसंबंधेन वा यद्रूपावच्छिन्न
विषयिताविशिष्टविषयितात्वं तादृशमिति फलितार्थः ह्रदत्वरूपधर्मितावच्छेदकविषयितामादायव्यापकत्वाद्भाववान्वन्ह्यभाववानितिग्रहो न वार्यते इति द्वितीयं यद्रूपं निवेश्यमिति दिक्
एवं वा। अथ यद्रूपावच्छिन्नविषयितासामान्यमित्यत्र सामान्यपदव्यर्थं ह्रदो वन्ह्यभाववानिति ज्ञानीयह्रदत्वावच्छिन्नयत्किंचिद्विषयितायाः स्वरूपसंबंधरूपावच्छेदकत्वे पि तत्सा
नस्य ह्रदत्वविशिष्टविषयकत्वसमानाधिकरणाभावप्रतियोगितावच्छेदकं यद्वन्ह्यभावत्वावच्छिन्नविषयितात्वं तद्रूपावच्छिन्नविषयिताशून्यत्वाभावादेव वारणसंभवात् ह्रदह्र
साकारकत्वानीयविषयिताश्च स्वस्वरूपसंबंधरूपावच्छेदकत्वविरहात् न चैतत्कल्पितासमदृशाव्यापकविषयिताशून्यत्वेन निविष्टं वन्ह्यभाववज्जातिमत्त्वावच्छिन्नविषयताया
अपि स्वरूपसंबंधरूपावच्छेदकत्वात् जातिमान् वन्ह्यभाववानिति ज्ञानस्य जातिमान् ह्रदह्रदत्वादिज्ञानविशिष्टस्य ह्रदे वन्ह्यनुमितिप्रतिबंधकत्वादिति वाच्यं तावतापि ह्रदत्वसामाना
धिकरण्येन वन्ह्यभावेऽव्याप्तेः तत्र जातिसामानाधिकरण्येन वन्ह्यभाववविषयितायाः स्वरूपसंबंधरूपावच्छेदकत्वाभावेन तादृशाव्यापकविषयिताशून्यत्वदलसार्थक्यात् न च सं
योगः संयोगाभाववान् द्रव्यत्वादेः संयोगः संयोगवानिति बाधभ्रमविषये संयोगेऽतिव्याप्तेः तत्र संयोगावच्छिन्नविषयितात्वस्य संयोगत्वविशिष्टविषयकत्वसमानाधिकरणाभावप्रतियोगि
तावच्छेदकत्वाभावात् उक्तभ्रमे तद्रूपावच्छिन्नविषयितायाः सत्वस्याकिंचित्करत्वादिति वाच्यं संयोगः संयोगवानिति भ्रमे संयोगावच्छिन्नविषयितात्वस्य तादृशतया तादृशविष
यिताशून्यत्वाभावादिति चेन्न गोत्वाभाववो गोत्वाभाववानित्याहार्ये गोत्वाभाववो गोत्ववानिति बाधभ्रमविषये गोत्वाभावेऽतिव्याप्तिः तत्र गोत्वाभावत्वविशिष्टविषयकत्वसमानाधिकरणा
भावप्रतियोगितावच्छेदकत्वस्य गोत्वावच्छिन्नविषयिताया असत्वात् न च यत्संसर्गावच्छिन्नयद्रूपावच्छिन्नविषयितात्वं तादृशाभावप्रतियोगितावच्छेदकं तत्संसर्गावच्छिन्नतद्रू
पावच्छिन्नविषयिताशून्यत्वार्थः गोत्वाभावत्वविशिष्टविषयित्वसमानाधिकरणाभावप्रतियोगितावच्छेदकं समवायसंसर्गावच्छिन्नगोत्वत्वावच्छिन्नविषयितात्वं गोत्वा
भावज्ञाने प्रतियोगितासंबंधेन गोत्वाभावात् तथा च तद्रूपावच्छिन्नसमवायसंबंधावच्छिन्नविषयिताशून्यत्वं गोत्वाभाववो गोत्ववानिति ज्ञाने नास्तीति नेतत्रातिव्याप्तिरिति वाच्यं
तथापि गोत्ववसमानकालीनगोत्वाभावपक्षकस्थले तादृशगोत्वाभावेऽतिव्याप्तेः जातिमज्जातिमत्त्वावच्छिन्नविशेष्यतायाः संसर्गानवच्छिन्नतया संसर्गनिवेशे जातिमान्

जातिमानिति ज्ञानकारणत्वं न च यद्रूपावच्छिन्नविषयकत्वसमानाधिकरणाभावप्रतियोगितावच्छेदकं यद्रूपावच्छिन्नसांसर्गिकविषयतानिरूपितयद्रूपावच्छिन्नविषयितात्वं तादृशरूपावच्छिन्नसांसर्गिकविषयतानिरूपिततद्रूपावच्छिन्नविषयताशून्यत्वनिवेशान्न दोषः समवायत्वावच्छिन्नसांसर्गिकविषयतानिरूपिततादृशगोत्वाभावत्वावच्छिन्नविषयितात्वस्य तथात्वानवच्छिन्नविषयिताशून्यत्वस्य तादृशज्ञानेऽसत्त्वादिति वाच्यं स्वरूपसंबंधेन यत्र गोत्वस्य गोत्वाभावे भ्रमः तत्र गोत्वाभावत्वस्यापि स्वरूपसंबंधेन भानात् स्वरूपविषयितानिरूपितगोत्वाभावत्वावच्छिन्नविषयितात्वस्य तथात्वेन स्वरूपविषयितानिरूपितगोत्वत्वावच्छिन्नविषयितात्वस्यापि च तथात्वेन गोत्वाभावो गोत्ववानिति भ्रमविषये तादृशपक्षेऽतिव्याप्तेः न च यद्रूपावच्छिन्नमुख्यविशेष्यितात्वं तादृशविशिष्टविषयकत्वसमानाधिकरणाभावप्रतियोगितावच्छेदकं तादृशमुख्यविशेष्यिताशून्यत्वविवक्षया तत्र न दोषः गोत्वाभाववत्त्वावच्छिन्नमुख्यविशेष्यितात्वस्य गोत्वाभाववानिति ज्ञाननिष्ठाभावप्रतियोगितावच्छेदकत्वात् तदवच्छिन्नविषयिताशून्यत्वस्य तत्र प्रतिबंधकीभूतज्ञानेऽसत्त्वादिति वाच्यं तथाप्यसंभवापत्तेः ह्रदे वह्न्यभाववानिति ज्ञानासंग्रहात् तत्र तादृशविशिष्टनिरूपितमुख्यविशेष्यिताशून्यत्वाभावात् नापि वह्न्यभाववद्ह्रदवानयं देश इति ज्ञानमादाय लक्षणासमन्वयः संभवति वह्न्यभाववद्ह्रदावच्छिन्नमुख्यविशेष्यितात्वस्य तादृशज्ञानतया तदवच्छिन्नमुख्यविशेष्यिताशून्यत्वस्य तत्राभावात् [illegible] यद्रूपावच्छिन्नविषयतात्वमित्यादिविशेषणमप्यसंप्रयोजनं तदभावात् सामान्यपदेनैव वारणात् यथासंनिवेशे वैयर्थ्याभावादिति। अन्ये तु स्वाभाववन्निष्ठत्वादिविशेषणस्यैव स्वकृतये चोक्तभ्रमवारणात् सामान्यपदस्य न तत्र प्रयोजनमित्याहुः अत्र यत्संबंधेन स्वाश्रयत्वसंबंधावच्छिन्नः स्वाभावो निवेश्यः अन्यथा वह्निमत्कालीनह्रदे वह्न्यभाववानिति बाधाप्राप्तेः तथा चोक्तभ्रमेऽपि सामान्यपदप्रयोजनमस्त्येवेत्याहुः। अपरे तु वह्न्यभाववान्वह्निमानित्यादौ वह्न्यभाववद्वह्न्यभावरूपबाधैकदेशे वह्न्यभावेऽतिव्याप्तिः केवलवह्न्यभावविषयत्वस्य तादृशविशिष्टविषयकत्वाव्यापकत्वाभावात् वह्न्यभावविशिष्टवह्न्यभावविषयकत्वस्याव्यापकत्वेऽपि तादृशविषयिताशून्यवह्न्यभाववत्त्वादिना पदार्थांतरावगाहिभ्रमात्मकज्ञानीयवह्न्यभावत्वावच्छिन्नविषयिताया एवावच्छेदकत्वादिति सामान्यपदमुक्तमित्याहुः। यदि च यद्रूपावच्छिन्नविषयितात्वावच्छिन्ननिरूपितयद्रूपावच्छिन्नविषयितात्वं यद्रूपविशिष्टविषयकत्वसमानाधिकरणाभावप्रतियोगितावच्छेदकं तद्रूपावच्छिन्नविषयतात्वावच्छिन्ननिरूपिततद्रूपावच्छिन्नवि

सर्गादिनिवेशे

षयतात्वावच्छिन्नाभाववन्निवेशान्न दोषः तत्र वन्ह्यभावत्वावच्छिन्नविषयितात्वावच्छिन्ननिरूपितत्वं न वन्ह्यभाववद्ध्रद इति ज्ञानीयाभावत्वावच्छिन्नविषयतायां किंतु अभाववान्नव
न्ह्यभाववानिति ज्ञान एवेत्युच्यते तदा सामान्यपदानुपादाने पि गोत्वाभावादेर्नातिव्याप्तिः तत्र गोत्वाभावत्वावच्छिन्नविषयितात्वावच्छिन्ननिरूपितगोत्वत्वावच्छिन्नविषयितात्व
स्य गोत्वाभाववान्गोत्ववानिति ज्ञानीयप्रत्यक्षविषयितायां सत्त्वात् सामान्यपदं व्यर्थमेवेति। परं तु ह्रदत्वावच्छेदेन वन्हेः साध्यत्वे वन्ह्यभावकालीनह्रदो वन्ह्यभाववानिति वु
न्ह्यभावत्वेन पटावगाहि भ्रमस्य विषये तादृशह्रदे ऽतिव्याप्तिवारणाय सामान्यपदं प्रसिद्धस्थले सार्थकं। न च तादृशह्रदत्वावच्छिन्नविषयितानिरूपितवन्ह्यभावत्ववि
षयितात्वस्य तादृशज्ञानीयतदवच्छिन्नशून्यत्वाभावान्न दोष इति वाच्यं उक्तभ्रमे वन्हित्वेन घटस्यापि भानात् यदि चैवं भविता तादृशविषयितानिरूपिताभावत्वावच्छिन्नविषयिता
त्वं तादृशं संभवतीति मन्यते तदा वन्ह्यभावकालीनाभाववद्ध्रदविशेष्यकवन्ह्यभावप्रकारकोभ्रमोपि ध्येय इत्याहुः। अन्ये तु सामान्यपदं न व्यर्थं। अन्यथा वन्हित्वं वन्हित्वाभा
ववदित्यादौ वन्हित्वं वन्हित्ववदिति बाधभ्रमविषये वन्हित्वे ऽतिव्याप्तिः यदि च तत्र वन्हित्वावच्छिन्नविषयितैवाव्यापिका तद्व्यापकत्वमुच्यते तदा वन्हिमत्कालीनवन्हिर्वन्ह्यभा
ववानित्यादौ पक्षो वन्ह्यभाववानिति ज्ञानविषये पक्षे ऽतिव्याप्तिः वन्हिमत्त्वावच्छिन्नविषयिताया अपि व्यापकत्वात् एवं कपिसंयोगाभाववान् कपिसंयोगाभाववानित्यादौ अप्य
व्यक्तिज्ञानाभावविशिष्टस्य कपिसंयोगाभाववान् कपिसंयोगवानिति ज्ञानस्य प्रतिबंधकतया कपिसंयोगाभाववद्विषयकत्वमादाय कपिसंयोगाभाववत्यतिव्याप्तेश्चेत्याहुः।
अपरे तु नन्वत्र स्वरूपसंबंधरूपावच्छेदकत्वनिवेशो वाच्यादिविषयितान्तःपातिवन्ह्यभावविषयिताया अपि स्वरूपसंबंधरूपावच्छेदकत्वाद्वन्ह्यभावादावतिव्याप्तिरतः सामान्यपदं तदर्थश्चे
व्यापकत्वे पर्यवसन्नः परं तु तन्निवेशो व्यर्थः अव्यापकविषयिताशून्यत्वविशेषणेनैवैकदेशवारणात् अथैवं संयोगे संयोगाभाववैशिष्ट्ये संयोगः संयोगवानिति बाधभ्रमविष
यपक्षे दोषतापत्तिः संयोगत्वावच्छिन्नविषयिताया व्यापकत्वात् संयोगवत्संयोगत्वावच्छिन्नविषयिताया धर्तुमनःकल्पितात् संयोगत्वेन संयोगस्य भानात् संयोगावच्छिन्नविषयिताह्र
या व्यापकाभावादिति सामान्यपदमावश्यकं। न चात्र समवायत्वावच्छिन्नविषयिताया अव्यापकत्वं रांसं संयोगत्वविशिष्टविषयितायाः संयोगत्वसंसर्गतया भासमानसमवायत्वाव
च्छिन्नविषयितानियतत्वात् यत्तु यद्रूपविशिष्टविषयिता यद्रूपावच्छिन्नविषयितात्वेन लक्षणे प्रवेश्या। संयोगत्वावच्छिन्नविषयिता च कालिकादिसंबंधेन संयोगत्वप्रकारकधीसाधार

ते

ण्येवेति समवाय [illegible] त्वावच्छिन्नविषयिताका [illegible] व्यापकत्वं संभवः। न चैवं विशेष्यतादले यद्रूपनिष्ठावच्छेदकता
पि संबंधनिवेशो नावश्यकः तथा च वह्न्यभाववद्वृत्तित्वावच्छिन्नविषयितायाः। कालिकादिसंबंधेन ताद्दृशविशेष्यत्वप्रकारकज्ञानसा
धारण्यात् असंभव इति वाच्यं वह्न्यभागविशिष्टकहृदत्वे सामानाधिकरण्यसंबंधेन वह्न्यभाववद्धृदत्वे सामानाधिकरण्यं च स्वरूप
समवायोपि विशिष्टवैशिष्ट्यबोधमर्यादया उद्देश्यतावच्छेदकविधेयसामानाधिकरण्यं तत्पाचकालिकादिना हृदत्वा
वच्छिन्नविशेष्यकवह्न्यभावप्रकारकज्ञाने [illegible] निरूपितसामानाधिकरण्यसंबंधेन वह्न्यभावहृदत्वेन [illegible] तावच्छेदकविशेष्य
तावच्छेदकतापर्याप्तिसंबंधेनैव सामानाधिकरण्यभाननियमात् असंभवः समवायादितितं उद्देश्यतावच्छेदकविधेयसामानाधिक
रण्यभानोपगमेपि निर्धर्मितावच्छेदककनिरूपितसामानाधिकरण्यसंबंधेन वह्न्यभागविशिष्टहृदत्वावानितिज्ञानेपि यथोक्तविष
यितायाः सत्वेन [illegible] वह्न्यभाववद्धृदत्वेन यद्रूपपदेनोपादेयं [illegible] तद्रूपावच्छिन्नविषयि
तायाः प्रतिबंधकज्ञानसाधारण्येन संभवत्यतः य [illegible] संबंधावच्छिन्नयद्रूपनिष्ठावच्छेदकताकविषयिताशालित्वमिति प्रति
बध्यकज्ञाने निरूपितत्वसंबंधेन तद्रूपावच्छिन्नोद्देश्यता [illegible] वह्न्यभाववद्धृदत्वोभयावगाहिनः वह्न्यभा
वावच्छिन्नविशेष्यकहृदत्वप्रकारकज्ञानस्य च वारणार्थं पूर्वनिर्दिष्टं च देयं एवं चास्मिन्निरापि किंचिद्विशेषणदानं समा
वह्न्यभाववद्धृदत्वप्रकारकज्ञान [illegible] मानितिप्रतियोगितावच्छेदकतया [illegible] विधेयसामानाधिकरण्यभानस्याप्रामाणि
कत्वेनैव [illegible] परित्यागात् यद्रूपावच्छेदेन वह्न्यभाववद्धृदत्वस्य वापादेयत्वे च यद्रूपनिष्ठावच्छेदकतायाः संबंधावच्छिन्न

त्वस्यावच्छेदकतया समवायसंबंधावच्छिन्नसंयोगत्वावच्छिन्नविषयितासामान्यव्यापकविषयिताशून्यत्वमपेक्षणीयं समवायत्वावच्छिन्नविषयितायाश्च न तादृशविषयिताया अ-
व्यापकत्वमित्यसतिव्याप्तिर्दुर्वारैवेति ध्येयं। अभाववान् वह्न्यभाववानित्यभावत्वेन रूपेण तत्त्वावगाहिबुद्धिवारणार्थं संबंधावच्छिन्नविषयितातादृशप्रतियोगितावच्छेदकतासं-
बंधावच्छिन्नतद्रूपावच्छिन्नविषयिताशून्यत्वस्यावलंबनीयतया संयोगत्वविशिष्टविषयिताव्यापकं समवायावच्छिन्नसंयोगत्वावच्छिन्नविषयितात्वमित्यसन्नतिप्रसंगात्॥
न च गोत्वाभाववान् गोभेदस्य साध्यके गोत्वाभाववान् गोरिति प्रतिबंधकत्वमविषयप्रसंग इति व्याप्तिरतः सामान्यपदं। न हि तत्र समवायावच्छिन्नगोत्वावच्छिन्नविषयिताया अव्यापक-
त्वं। ग्राहकनीयं गोत्वस्य स्वरूपतोभानादिति वाच्यं तेजसि समवायेन वह्न्यभावस्य साध्यत्वे वह्नित्वेन तेजस्त्वावगाहिन्यां वह्निमान् वह्निमानित्यप्रतिबंधकबुद्धौ वह्निमत्तेजस्त्वावच्छि-
न्नविषयितायाः सत्वेनाव्याप्तेः यद्रूपावच्छिन्नविषयितानिरूपिततद्रूपावच्छिन्नविषयितात्वं तादृशतद्रूपावच्छिन्नविषयितानिरूपितविषयिताशून्यत्वस्य वक्तव्यतया समवाय-
त्वावच्छिन्नविषयितानिरूपितगोत्वाभावत्वावच्छिन्नविषयितारूपायाः अव्यापकविषयितायाः सत्वेन दोषादिति। अत्रेदं समाधानं। एवमभावो वह्निमानित्यादिबुद्धौ वह्न्यभावव-
दभावेऽव्याप्तिः अभाववान् वह्न्यभाववानित्यप्रतिबंधिकायां अभावत्वेनाभावत्वावगाहिन्यां बुद्धौ वह्न्यभाववदभावत्वावच्छिन्नविषयितायाः सत्वात् तद्रूपावच्छिन्नविषयितानिरू-
पितविषयितानिरूपितयद्रूपावच्छिन्नविषयितात्वं तादृशं तद्रूपावच्छिन्नविषयितानिरूपिततद्रूपावच्छिन्नविषयिताशून्यत्वं वाच्यं एवं च ह्रदो न द्रव्यमित्यादौ ह्रदो द्रव्यमित्या-
दौ बाधाघेकदेशह्रदत्वद्रव्यत्वादेर्वारणायैव सामान्यपदं अत एव ह्रदः पृथिवी न वेति संशयस्य पृथिवीत्वाभाववद्ह्रदविषयकत्वाव्यापकविषयिताशून्यतया पृथिवीत्वाभा-
ववद्ह्रदेऽतिव्याप्तिवारणाय निश्चयपदोपादानमपि संगच्छत इत्याहुः परे तु संयोगः संयोगाभाववानित्याहार्यसंयोगः संयोगवानिति भ्रमे यद्यपि संयोगेनातिव्याप्तिः संयोग-
त्वसमवायत्वावच्छिन्नविषयितायाः संयोगत्वविशिष्टविषयितायाः अव्यापकत्वाभावेऽपि संयोगवत्संयोगस्याप्रसिद्ध्या यद्यपि तु भ्रमस्याकथनत्वेऽपि च संयोगावच्छिन्नविषयितायास्तद्व्या-
पिकायाः सत्वात् न च संयोगावच्छिन्नत्वमेवास्ति व्याप्तिरतः सामान्यपदं अस्तु निर्धर्मितावच्छेदककसंयोगवानिति निश्चीयमसंयोगावच्छिन्नविषयितायाश्च तत्वाव्याप्ता-
तिप्रसंग इति वाच्यं। स्वान्यत्व स्वनिरूपितविषयितानिरूपितत्वोभयसंबंधेन यद्रूपावच्छिन्नविषयिताविशिष्टयद्रूपावच्छिन्नविषयितात्वं यादृशवह्निविशिष्टविषयकत्व

३८

समाने सादिक्रमेण परिष्कारस्य आवश्यकत्वात् संयोगः संयोगवानिति भ्रमे संयोगत्वावच्छिन्नविषयिताविशिष्टसंयोगत्वावच्छिन्नविषयितायास्तथाविधायाः सत्त्वेन तद्व्यावर्त्तनासंभवात् तथापि
जलाद्देशे पृथिवीभेदे साध्ये जलं पृथिवीति प्रतिबंधकभ्रमविषयकेवलजलादावतिप्रसंगवारणाय सामान्यपदनिवेशात् तत्र पृथिवीत्वप्रकारताया निरवच्छिन्नतया निरूक्तोभयसंबंधेन
जलत्वावच्छिन्नविषयिताविशिष्टेषूक्तोभयसंबंधेन यद्रूपावच्छिन्नविषयिताविशिष्टयद्रूपावच्छिन्नविषयिताशाब्देनोपादातुमशक्यत्वात् इत्याहुः अन्ये तु सामान्यपदं किमर्थमिति साध्यं गो
त्वाभाववो गोत्ववानित्यनुमिति प्रतिबंधकगोत्वाभाववो गोत्ववानिति भ्रमविषयपक्षवारणार्थत्वं निवेशयत्किंचित्संबंधानवच्छिन्नयद्रूपावच्छिन्नविषयितात्वे पादनाविशिष्टविषयकत्वसमाने
सादि परिष्कारादरासमवायसंबंधावच्छिन्नगोत्वत्वावच्छिन्नविषयितात्वस्य तादृशतत्यावत्त्वावच्छिन्नशून्यत्वाभावान्न दोष इति तदुपर्युक्तं स्यात् समाधानाय गोत्ववत्समानकालीनगोत्वाभाववो गोत्व
वानित्सादौ विशिष्टपक्षवारणार्थं सामान्यपदमित्यस्तु संप्रदायप्रक्रिया वस्तुतः ह्रदो जलस्वभाववानित्यादौ जातिमान् जातिमानिति ज्ञानस्य कथं वारणं यद्रूपपदेन जातिमत्त्व जातिमत्त्वस्यो
न नोपादेयतया तद्रूपावच्छिन्नविषयिताया विशेष्यतारूपत्वेन संबंधांशेऽवच्छिन्नतया घटत्वावच्छिन्नविषयितायाएवोपादेयतयोक्तज्ञानस्य तच्छून्यत्वात् तथा च जातिमत्त्वदेऽव्याप्तेः संबंधोनशक्यनि
वेशन इति प्रथमस्थल एव सामान्यपदव्यावृत्तिः यत्तु यद्रूपावच्छिन्नविशेष्यितात्वं व्यापकतावच्छेदकं तद्रूपावच्छिन्नविशेष्यिताशून्यत्वेन ज्ञानविशेषणेन गोत्वाभावरूपपक्षवारणं तदप्युक्तं
क्तविवक्षायाः प्रागदूषितत्वादित्याहुः तच्चिंत्यं। अनतिरिक्तवृत्तित्वरूपावच्छेदके तत्कल्पे जातिमान् जातिमानिति ज्ञानस्यावारणीयत्वेऽपि स्वरूपसंबंधरूपावच्छेदकतात्कल्पे तद्वारणे प्रयोज
नाभावेन संबंधविवक्षापक्षस्य संवारयितुमशक्यत्वादिति शिवं। ननु संशयनिश्चययोर्विषयिताभेदाद्दोषविषयितात्वव्यापकत्वमवच्छेदकतायां न संभवति। अन्यथा संशयस्यापि प्रतिबंध
कल्पापत्तेरित्यत आह समानेति निश्चयत्वविशिष्टीयतयेति। निश्चयत्वघटकज्ञानत्वादेः स्वरूपतो निवेशार्थं तत्त्वेन तदंतर्भावेण पर्याप्तेन संशयस्य प्रतिबंधकत्वमित्यर्थः॥ ननु भट्टाचार्यमते संश
ये विशेष्यताद्वयस्वीकारात्। वह्न्यभाववद्ध्रदविषयिताया निश्चयसाधारण्ये नैक्येपि स्वविरोधिधर्मधर्मितावच्छेदककस्याहार्यस्य वह्न्यभाववद्ध्रदविषयितायामनाहार्यतद्विषयिताभेदे दु
र्वारः आहार्यतद्विषयितायावन्निरूपितत्वादनाहार्यतद्विषयितायाश्च तदनिरूपितत्वादित्याशयेन शंकते न चेति। तादृशेति। अनाहार्यज्ञानसामग्रीनादृशेयघटिता। अनाहार्यज्ञानसा
मग्री च विपरीतज्ञानाभावघटिता न ह्येतादृशसामग्रीसंवलनसंभवः इत्याहार्यसामग्रीप्रयोज्यविषयिताया नानाहार्यज्ञानसाधारण्यसंभवः अनाहार्यसामग्रीप्रयोज्यविषयितायाश्च ना
हार्यसाधारण्यसंभव इति भावः। सामान्यत आहार्यज्ञानसमानाकारानाहार्यज्ञानस्याप्रसिद्धत्वाभिधानेन संगच्छते ह्रदो वह्न्यभाववान् वह्निमांश्चेति समूहालंबनात्मकाहार्यसमानाकार
कस्य ह्रदो वह्न्यभाववान् वह्निमान्वेत्यनाहार्यस्य केश्चिदुपगमादतस्तादृशेत्युक्तं। लाघवानपायादिति। ननु संशयान्यत्वानिवेशेन लाघवमिति यदुक्तं तन्न संगच्छते अन

७ (= अत्र च ह्रदो वह्न्यभाववानिति ज्ञाने वह्न्यभावप्रकारितात्वेन ह्रदत्वावच्छिन्नविशेष्यितात्वेन च परस्परं निरूप्यनिरूपकभावः न तु वह्न्यभावत्वावच्छिन्नप्रकारितात्वेन वह्न्यभाववद्ह्रदत्वावच्छिन्नविशेष्यितात्वं
तिरिक्तवृत्तित्वरूपावच्छेदकत्वमतेपि संशयात्मकत्वस्य प्रयोजनविरहेणानिवेशात् न च तन्मतेतद् निवेशेऽसंभवापत्तिः ह्रदो वह्निमान्नवेति संशये वह्न्यभाववद्ह्रदत्वावच्छिन्न
विषयितासत्त्वेन प्रतिबंधकतायाश्चासत्त्वेन व्यापकत्वाभावादिति वाच्यं उक्तसंशयेऽभावांशे संसर्गतया वह्निविशेषभानस्यावश्यकतया तादृशविशेषत्वावच्छिन्नविषयितात्वं ता
दृशविशिष्टविषयकत्वसमानाधिकरणाभावप्रतियोगितावच्छेदकं तादृशविशेषत्वावच्छिन्नविषयिताशून्यो न सं शयः किंतु ह्रदो वह्न्यभाववानित्याकारकनिश्चय एव तत्
वृत्तित्वविशिष्टयद्रूपावच्छिन्नविषयिताव्यापकत्वस्य प्रतिबंधकतायां सत्त्वेन संशयात्मकत्वानिवेशादिति चेन्न वह्निविरुद्धवह्न्यभावकालीनह्रदो वह्न्यभाववानित्यादौ वह्न्यभा
वविशिष्टवह्न्यभावकालीनह्रदो दोषस्तत्रातिव्याप्तिवारणाय संशयात्मकत्वावश्यकत्वात् अन्यथा विशेषत्वावच्छिन्नवि षयितात्वं न वह्न्यभाववैशिष्ट्यवह्निविरुद्धवह्न्यभावकाली
नह्रदत्वविशिष्टविषयकत्वसमानाधिकरणाभावप्रतियोगितावच्छेदकं किंतु घटत्वावच्छिन्नविषयितात्वमेव तद्रूपावच्छिन्नविषयिताशून्यं च ज्ञानं वह्निविरुद्धवह्न्यभावकाली
नह्रदो वह्न्यभाववान्नवेति संशयः तद्वृत्तित्वविशिष्टयद्रूपावच्छिन्नविषयिताव्यापकत्वस्य प्रतिबंधकतायामभावादव्याप्त्यापत्तेः अत्रेदमवधेयं। यद्रूपावच्छिन्नविषयितात्वावच्छिं
न्ननिरूपकताकयद्रूपावच्छिन्नविषयितात्वं तादृशविशिष्टविषयकत्वसमानाधिकरणाभावप्रतियोगितावच्छेदकमित्यादिरीत्या निष्कर्षे संशयात्मकत्वनिवेशो निष्फलः वह्नित्वा
वच्छिन्नविषयितानिरूपितवह्निविरुद्धवह्न्यभावकालीनह्रदत्वावच्छिन्नविषयितात्वं तादृशविशिष्टविषयकत्वसमानाधिकरणाभावप्रतियोगितावच्छेदकं भवति तद्रूपावच्छिन्नविष
यितानिरूपिततद्रूपावच्छिन्नविषयिताशून्यश्च नोक्तसंशयः अपि तु वह्निविरुद्धवह्न्यभावकालीनह्रदो वह्न्यभाववानिति निर्णय एव तत्र प्रतिसज्ञावादिति [संशयात्मकत्वनि
वेशानप्रयोजनप्रकारः प्रागप्यभिहितः सोपि चैककोट्यंश एव विशेषभानपक्षे संभवतीति बोध्यं) प्रतिबंधकतासंपत्तये जलावच्छेदेनेति। दोषांतर्भावभ्रमं निरस्यति।
सत्यतीति जलव्यापकवह्न्यभावासामानाधिकरण्यविशिष्टजलाघटितत्वात्॥ न तु यद्रूपावच्छिन्नविषयकत्वमित्यादिना प्रतिबंधकतायां ज्ञानवैशिष्ट्यानवच्छिन्नत्वं निवे
श्यपाषाणमयत्वं व्यर्थं तेऽतिव्याप्तिवारकं कृतं लाघवं च दर्शितं। परं तु जलावच्छेदेन वह्न्यभाववत्ताघटितवह्न्यभाववत् जलवत्कालीनह्रदत्वावच्छिन्नपक्षकस्थले जलवद्वह्न्यभा
व वेजलवत्कालीनह्रदत्वावच्छिन्नेऽतिव्याप्तिः तादृशपक्षे जलवत्तानिश्चयस्यानियमतो जलावच्छेदेन वह्न्यभाववत्तानिश्चयकालीनतयाऽनुमितिं प्रति विशिष्टविषयकनिश्चयत्वेनैव

प्रतिबंधकत्वात् प्रयोजनाभावे ज्ञानविशिष्टत्वस्य प्रतिबंधकतावच्छेदककोटौ निवेशात् एवमनतिरिक्तवृत्तित्वरूपावच्छेद
कतानिवेशकल्पेऽपि विशिष्टबुद्ध्याघटितत्वरूपघटकप्रतिबंधकतायामसंभववारणाय ज्ञाने वैशिष्ट्यावच्छिन्नत्वे
निवेशस्यावश्यकतया दर्शितप्रतिबंधकतायां ज्ञानवैशिष्ट्यावच्छिन्नत्वाभावेन विशिष्टबुद्ध्याघटितत्वस्याप्यु
ततया दर्शितस्थलेऽतिप्रसंगो दुर्वारः अत्र केचित् यत्र जलसामानाधिकरण्येन वह्न्यभावस्य धर्मितावच्छे
दकाघटकतातत्र वह्न्यभाववज्जलवत्कालीनह्रदविशेष्यकजलवत्तानिश्चयस्य जलावच्छेदेन वह्न्यभाववत्तानि
श्चयकालीनत्वानियमात् तत्र जलावच्छेदेन वह्न्यभाववत्तानिश्चयकालीनत्वेन ज्ञानविशिष्टत्वेन तादृशह्र
देजलवत्तानिश्चयत्वेनावश्यप्रतिबध्यतावत्त्वं कल्पनीयं। तेनैव यत्रलोजेन घटेन वह्न्यभावस्य पक्षतानवच्छेदकाघटे
कतातत्राप्यनुमितिप्रसंगसंभवे ज्ञानवैशिष्ट्यानवच्छिन्नप्रतिबंधकत्वांतरं कल्प्यते प्रयोजनाभावादित्याहुः। न च तत्सामानाधिकरण्येन बाधनिश्चयवद्
वच्छेदकधर्मदर्शनमपि तत्सामानाधिकरण्येन विशिष्टबुद्धिप्रतिबंधकं तथा च सामानाधिकरण्येन विशिष्टबुद्धौ तदवच्छेदेनैवावच्छेदकधर्मदर्शनं विरोधि वाच्यं त
च संसर्गांशे तद्धर्मव्यापकतावगाहितया च सामानाधिकरण्येन वह्न्यभाववज्जलवत्कालीनह्रदत्वव्यापकतातोऽवच्छेदकावच्छेदेन वह्न्यभाववज्जलवत्कालीनह्रदत्वव्या
पकतायामेदान्नक्तप्रतिबंधकत्वेन निर्वाहः इति ज्ञानवैशिष्ट्यानवच्छिन्नप्रतिबंधकत्वांतरमावश्यकमिति वाच्यं तत्सामानाधिकरण्येनावच्छेदकधर्मदर्शनस्यापि प्रति
बंधकतायास्तर्के मथुरानाथभट्टाचार्यैरुक्तत्वात् अनतिरिक्तवृत्तित्वरूपावच्छेदकत्वनिवेशे तु विशिष्टबुद्ध्याघटितत्वाभावादेव नातिप्रसक्तिरिति। वस्तुतस्तु अवच्छेदकध
र्मदर्शनस्थलेऽवच्छिन्नत्वावगाहित्वसामानाधिकरण्यावगाहित्वप्रयुक्तप्रतिबध्यप्रतिबंधकभावभेदे विप्रजेन प्रतिबध्यप्रतिबंधकभावभेदः यतः प्रतिबंधकतावच्छेदकको

(विशेष)

टो धर्मितावच्छेदकव्यापकतायाः व्यापकतात्वेनैव निवेशः नतु धर्मितावच्छेदकनिरूपितव्यापकतात्वेनानच संसर्गांशे उदासीनपदार्थव्यापकतावगाहि धर्मितावच्छेदकसा
मानाधिकरण्यावगाह्यवच्छेदकधर्मदर्शनस्थले सामानाधिकरण्येन विशिष्टबुद्धिप्रतिबंधकत्वापत्तिः तद्धर्मावच्छेदेन विशिष्टबुद्धौ तद्धर्मव्यापकत्वमेव संसर्गकोटौ भासत
इति नियमादिति। नन्वेवं यद्विषयकनिश्चये ऽनुमितिप्रतिबंधकतानवच्छेदकविषयिताशून्यत्वनिवेशे नैव नार्थः हेतोः वह्न्यभाववज्जलवद्वृत्तिजलवान् ह्रद इति निश्चयस्य
प्रतिबंधकतानवच्छेदकीभूतवह्नित्वावच्छिन्नविषयिताशालित्वात् न च ज्ञानवैशिष्ट्यानवच्छिन्नत्वमपेक्ष्येत तन्निवेशे किं लाघवमिति वाच्यं वह्न्यभाववान् ह्रदो वह्निमा
निसाहार्यसंशये च वह्नित्वावच्छिन्नप्रकारितानिरूपितह्रदत्वावच्छिन्नविशेष्यितायाः प्रतिबंधकतानवच्छेदकतया तत्र व्याप्तिस्वेनावारणात् नाहार्यत्वस्य निश्चयत्वस्य च नेनि
वेशः एवमव्यापकविषयिताशून्यत्वस्य विशिष्टान्तराघटितत्वस्य न निवेशः। जातिमान्वह्न्यभाववानित्यादौ तादृशजातिमत्त्वावच्छिन्नविषयितायाः मेयत्वविशिष्टवह्निवाशादि
निश्चये तादृशमेयत्वावच्छिन्नविषयितायाः सत्त्वेनैवावारणात्। यत्तु ह्रदो वह्न्यभाववानित्यादिज्ञाने ह्रदत्वावच्छिन्नविशेष्यतातोऽन्या ह्रदत्वनिष्ठप्रकारतानिरूपितविशे
ष्यतास्वीकार्या अन्यथा वह्न्यभावनिष्ठप्रकारतानिरूपितविशेष्यतावच्छेदकस्यैव ह्रदत्वे ह्रदत्वधर्मितावच्छेदकताप्रसंगात् न चेष्टापत्तिः केनापि स्वस्य धर्मिताव
च्छेदकतानुपगमात् तथा च ह्रदत्वनिष्ठप्रकारतानिरूपितविशेष्यतारूपप्रतिबंधकतानवच्छेदकविषयिताशालित्वात् असंभव इति तदसत्त्व वह्न्यभावत्वाव
च्छिन्नप्रकारतानिरूपितविशेष्यतात्वेनैव ह्रदत्वनिष्ठप्रकारतात्वेन निरूप्यनिरूपकभावोंगीक्रियते न तु ह्रदत्वनिष्ठप्रकारता
निरूपितविशेष्यतात्वेनेति अथ स्वनिष्ठधर्मितावच्छेदकतान्यप्रकारतानिरूपितविशेष्यतावच्छेदकत्वं स्वधर्मितावच्छेदकत्वं निर्वक्तव्यमिति ह्रदत्वे तद्धर्मि
तावच्छेदकतापत्तेरविचारणादिति दिक्। ह्रदत्वनिष्ठप्रकारतानिरूपितविशेष्यतांगीकारे प्रमाणाभावात् तदुपगमेपि प्रतिबंधकतानवच्छेदकविषयिताशून्यत्व
निवेशान्नासंभव इति चेन्न एकदेशातिव्याप्तेः केवलवह्न्यभावत्वावच्छिन्नविषयितायाः प्रतिबंधकताशून्यत्वात्
त्वात् तस्याश्च प्रतिबंधकतानतिरिक्तत्वेन वह्नित्वात् तत्स्य प्रतिबंधकतावच्छेदकताव्याप्यत्वाच्च एतेनैकदेशावारणाय प्रतिबंधकतानवच्छेदकविषयिताशून्यप्रतीतिविषयतावच्छेदकत्व

83

५१

यद्रूपविशिष्टेषणानवच्छिन्नप्रमेयत्वाभाववद्वह्निकालीनपर्वतो धूमवान् प्रमेयत्वाभाववद्वह्निकालीनधूमवान्वा वन्हेः धूमवान्प्रमेयाभाववद्वन्हेरित्यादौ प्रमेयत्वविशिष्टधूमव्यभिचारि
वन्हीवतिव्याप्तिः तथाविधवह्निविषयितायाः पक्षसाध्यसाधनग्रहप्रतिबंधकतानवच्छेदकत्वात् एवं द्रव्यत्वाभाववद्धूमादेः पक्षसाध्यसाधनघटकत्वे वह्निव्यभिचारिद्रव्य
त्ववद्वन्ह्यादौ चातिव्याप्तिरिति वाच्यं स्वानवच्छेदकेत्यादिक्रमेण वाच्यत्वात् स्वपदस्य तत्तत्प्रतिबंधकतापरत्वात् अथ नैकदेशद्वारूपया व्यापकविषयिताशून्यत्वं प्रवेश्यं।
तावता विशिष्टद्वयाघटितत्वविशिष्टं प्रत्येकसाघटितत्वयोरनिवेशेन लाघवानवकाशात् प्रमेयत्वाभाववद्वह्निद्रव्यत्वाभाववद्वह्निघटितस्थले प्रमेयत्वद्रव्यत्वादिविशिष्टधूमा
भाववद्वृत्तिवन्ह्याद्यतिव्याप्तिस्तु स्वानवच्छेदकेत्यादिक्रमेण निवेशाद्वारणीयेति परास्तं। वन्ह्यभावो वह्निमानित्यादौ वन्ह्यभाववद्वन्ह्यभाववद्वन्ह्यभाववद्वन्ह्यभावरूपबाधाविशिष्ट
बाधे गगनस्याभावाप्रतियोगिगगनादित्यादौ यभावाप्रतियोगित्वव्यापकीभूताभावप्रतियोगिगगने बाधघटितासाधारण्ये च प्रतिबंधकतानवच्छेदकविषयिताशून्यस्य ज्ञानकतया
ऽतिव्याप्तेः कल्पद्वयेविशिष्टान्तराघटितत्वस्यावश्यकत्वात् शुद्धजले ह्रदत्वनित्त्वघटितघटिते जलावच्छेदे न वन्ह्यभाववत्ताघटितेव न्ह्यभाववज्जलवत्से व समव्याप्तिव्याप्ते ईदृशत्वात्।
ज्ञानतिरिक्तत्वनित्वरूपावच्छेदकत्वविषयकत्वस्य प्रतिबंधकतावच्छेदकत्वपक्षेपि मतानसीयवह्निमान् धूमाभाववानयं च वह्निमानिति ज्ञानद्वयसाधारण्याद एववस्तुतो धर्मितावच्छे
दकघटितरूपेणैव प्रतिबंधकत्वात् किंच जलेवत्कालीनजलकालीनो ह्रदो वह्निमानित्यादौ वन्ह्यभाववज्जलेन कालीनजलवद्ह्रदे इति व्याप्तिः जलवद्वन्हिजलकालीनोह्रदो वह्निमानि
त्यादौ वन्ह्यभाववज्जलवद्वृत्तिजलवद्ह्रदे इति व्याप्तिस्तु न दोषाय। प्रतिबंधकताघटितलक्षणस्य तत्स्थले गमकेचरत्वात् जलत्वस्वानयोर्लक्षणान्तरत्वे असंगतमेव एतेन प्रतिबंधकतानु
वच्छेदकविषयिताशून्यस्यानुमितिप्रतिबंधकत्वे भयचलत्वे यद्रूपावच्छिन्नविषयिताव्यापकं तद्रूपवत्वेपि वक्षितपाकाणमयत्वव सर्वत्र साधारण्यापत्तिरित्यादि दलेत धर्मस्य प्रकृतानु
मित्वप्रतिबंधकत्व पक्षधर्मताज्ञानकालीनत्वेन यथाभावे: तेनासाधारण्यासंग्रह इति। अथवा स्वावच्छेदकविषयितानवच्छिन्नविषयिताशून्यत्वं स्वस्वरूपोभयसंबंधेन यद्रूपावच्छि
न्नविषयिताव्यापकं प्रतिबंधकत्वं तद्रूपावच्छिन्नत्वं यत्र एवं च ह्रदत्वेनिष्प्रकारतानिरूपितविशेष्यतांतर्भावे पितस्याः प्रतिबंधकतावच्छेदकीभूतवन्ह्यभावप्रकारिता
निरूपितविशेष्यितावच्छिन्नत्वं यथा नासंभवः असाधारण्ये संग्रहश्च पारिभाषिकप्रतिबंधकतानिवेशात् अन्योदासीनविषयिताया अनवच्छेदकत्वात् प्रमेयत्वादिविशिष्ट

६

४

तद्रूपावच्छिन्नविषयकत्वस्य

इष्टदोषवारणाच्छिन्नविशिष्टान्तराघटितत्वं कल्प्यते यदि तदेव मितिनुनवान्यं तत्कल्पनं तु केवलं रूपकत्वात् विशिष्टद्वयाघटितत्वं तु न देयं प्रयोजनाभावात् प्रमेयधूमाभाव
वद्व्याप्यादिघटितपक्षस्थले प्रमेयत्वविशिष्टधूमाभाववद्वृत्तित्वस्याप्रेतथाविधवह्न्यादिविषयितायाः विशिष्टपक्षादिज्ञानप्रतिबंधकतावच्छेदकत्वेन तत्र तन्नवच्छिन्नविष
यिताशून्यत्वाभावादिति व्याप्तिस्तु न स्वपदस्य तत्तत्प्रतिबंधकतापरत्वादिति परास्तं वह्न्यभाववद्वृत्तिजलवत्त्वहेतुकस्थले तादृशजलत्वव्यापिनीजलवद्वृत्तेर्वा
तिव्याप्तिप्रसङ्गात् अत एव योर्लक्षणान्तरत्वं विसमेवा। न तु विशिष्टान्तराघटितत्वदलेन तदवच्छिन्नपर्याप्य यद्रूपावच्छिन्नविषयकत्वं प्रतिबंधकतानतिरिक्तवृत्तितद्धर्माव
च्छिन्नविषयकप्रतीतिविषयतावच्छेदकतद्रूपवत्त्वमर्थं। विशेष्यदलस्य विशिष्टद्वयाघटितत्वस्यानिवेशात् पदं तत्समवायेन वारणाय प्रमेयत्वादिविशिष्टदोषविषयता
रणाय तद्रूपावच्छिन्नविषयकेऽस्य तद्रूपावच्छिन्नविषयकत्वप्रयुक्तानुमितिप्रतिबंधकतानवच्छेदकविषयिताशालित्वोभयाभाववत्त्वमर्थः अत एव वह्न्यभावव
व्याप्य इति जले वह्निदेवाघविशिष्टप्रमितिवारेवानातिव्याप्तिः। तथापि प्रमेयवत्तवैशिष्ट्यविषयिताशालितात् न वैशमपि वह्न्यभाववद्वृत्तिमानिति बाधविशिष्टबोधे प्रति
व्याप्तिरिति वा। अंततः घटकप्रतिबंधकतायोग्यरूपावच्छिन्नविषयितं प्रमत्वमतत्वं व्याप्यत्वोपादानात् प्रमत्वनिवेशान्नासंभवः। एवं तत्स्यामेव प्रतिबंधकताया मा
नितत्वमविशेषणं अन्यथा हृदेवह्न्यभाववानवच्छिन्नस्यात्तस्य साधारण्ये अप्राप्तेः तदेतानि स्युर्हदो वह्निमानिति भ्रमत्वव्याप्यप्रतिबंधकतानवच्छेदकविषयिताशा
लित्वात् प्रतिहेतुव्यापकसाध्याभावादिमद्वृत्तिप्रतिहेतुमसभुत्तूनाभासदृतिवेद्यागनमभावप्रतियोगिगगनादिसत्वेबाधघटितसाधारण्ये इति व्याप्तेः तद्ज्ञान
स्यासाधारण्यविषयिताव्याप्यप्रतिबंधकतानवच्छेदकविषयितावत्त्वाभावात् तत्स्थले वह्न्यभाववज्जलवत्कालीनजलवद्वृत्तावृत्तिव्याप्तेश्च न तु यद्रूपावच्छिन्नविष
यकत्वं यद्रूपावच्छिन्नविषयकत्वव्याप्यप्रयुक्तानुमितिप्रतिबंधकतानतिरिक्तवृत्तित्वं तादृशप्रतिबंधकताव्यापकतावच्छेदकविषयिताशालित्वोभयशून्यत्वं तद्रूपवत्त्वं तथा सति
विशिष्टान्तराघटितत्वविशिष्टद्वयाघटितत्वव्यापकविषयिताशून्यत्वानामनिवेशेन लाघवात् वह्न्यभाववद्वृत्तित्वावच्छिन्नविषयितायाः संयोगादिगोत्रिमान् वह्न्यभाववानिति
ज्ञाने सत्त्वेनातिरिक्तवृत्तित्वात्। न चैवं जातिमान् प्रमेयधूमाभाववद्वृत्तिरिति ज्ञानमादाय प्रमेयत्वादिविशिष्टव्यभिचारादावतिव्याप्तिः विशिष्टान्तराघटितत्वेनैव

८२ ते

तादृशप्रतिबंधकैसादिविशेषणवैयर्थ्येनयथोक्तलक्षणेपर्यवसानं यद्रूपावच्छिन्नविषयिताव्याप्यत्वं प्रतिबंधकताविशेषणं तत्त्वं यद्रूपावच्छिन्नविषयिताशून्यत्वमात्यन्तिकत्वाभावः
अव्यापकविषयिताशालिनः शेषविषयकसंशयादेर्वारणाय सिद्धिस्थले प्रमेयत्वादिविशिष्टतद्दोषवारणाय तादृशप्रतिबंधकेत्वाव्यापकेत्यादि एवमपि पाषाणमयत्वेन स
र्वतादावतिव्याप्तिवारणाय यद्रूपावच्छिन्नविषयिताव्यापकः प्रत्यक्षानुमितिसप्रतिबंधकत्वपक्षधर्मताज्ञानकालीनत्वोभयाभाववत्तद्रूपावच्छिन्नत्वमेवलक्षणं तादृशप्रतिबंधकता
व्यापकतावच्छेदकविषयितान्यत्वेन यद्रूपावच्छिन्नविषयितायाः विशेषणीभूतया अना[illegible]हार्यत्वविशिष्टान्तरघटितत्वविशिष्टद्वयाघटितत्वानां वैयर्थ्यमिति चेन्न बाधादिविषयिता
याः सत्प्रतिपक्षादित्वानविषयितावच्छिन्नप्रतिबंधकताव्यापकतानवच्छेदकत्वविषयितात्वसत्त्वादसंभवात्। अप्रतिबंधकत्वानीयतादृशावच्छिन्नाभावादिविषयितान्यतादृशावच्छिन्नाभावविषयि
ताव्यापकतायाः अक्षततयैकदेशाव्याप्त्या तेन त्वानतिरिक्तवृत्तित्वस्वव्यापकतावच्छेदकविषयितात्वोभयसंबंधेन प्रतिबंधकताविशिष्टान्यत्वं निवेश्यं। अप्रतिबंधकत्वानविषयघटव
भूतत्वादिमात्रवृत्तियेतादृशविशिष्टान्यत्वे स्वावच्छेदकविशिष्टत्वेन विशेषणीयमिति यत्सत्त्वा। एकदेशावारणात् तद्द्वयावच्छिन्नविशेष्यतानिरूपितवन्स्वभावप्रकारितात्वके: स्वाव्याप
कतानवच्छेदकत्वात् पाषाणमयत्ववत्सर्वत्र वारणाय तद्विषयितायाः प्रतिबंधकतातिरिक्तवृत्तित्वात्। तेन प्रतिबंधकत्वाव्यापकतावच्छेदकविषयितात्वमन्यद्रूपावच्छिन्नविषयिताप्र
तिबंधकतानतिरिक्तवृत्तित्वस्यापास्तं प्रमेयत्वाभाववद्वह्न्यादेः पक्षादिघटकत्वे छलेऽकातिप्रसंगोच्चाने तु यद्रूपावच्छिन्नविषयितात्वेन यत्किंचिदेकप्रतिबंधकतानिरूपितमनतिरि
क्तवृत्तित्वस्वरूपसंबंधोभयावच्छेदकत्वोभयं तद्रूपवत्त्वविवक्षणाद्विशिष्टद्वयाघटितत्वविशिष्टान्तराघटितत्वैश्वयर्थं। मेयत्वविषयितान्तर्भावेणादोषविषयितायाअनवच्छेदकत्वात्।
स्वावच्छेदकविषयितायामनतिरिक्तवृत्तित्वनिवेशोऽननुगमादित्यभिहितं। स्वानवच्छेदकत्वस्वानतिरिक्तवृत्तित्वोभयवत्त्वसंबंधेन प्रतिबंधकतावत्त्वं निवेश्यम्। एकप्रतिबंधकतानि
वेशादेव प्रमेयत्वाभाववद्वह्न्यादिघटितपक्षतावच्छेदके प्रमेयत्वविशिष्टव्यभिचारवारणासंभवात्। व्यभिचारघटितबाधेव धूमेऽव्यभिचारित्ववह्निमत्प्रकपक्षमाविषयितात्वेन बाधविषयि
तावच्छिन्नप्रतिबंधकतावच्छेदकत्वेपि न तदनतिरिक्तवृत्तित्वं। व्यभिचारत्वान प्रतिबंधकतानतिरिक्तवृत्तित्वेऽपि न तदवच्छेदकत्वमिति तदेकदेशेऽपि नातिव्याप्तिरिति चेन्न विशिष्टविषयितात्वे
नन स्वरूपसंबंधरूपावच्छेदकत्वं किंतु निरूप्यनिरूपकभावापन्नविषयितात्वेनैव संभवात्। यद्रूपावच्छिन्नविषयितात्वं तदुभयमनिवेशे तु मेयत्वविशिष्टव्यभिचारवारणाय विशिष्टान्तराघटि
तत्वादेरनुपपत्तेवात्। किंचासाधारण्येऽव्याप्तिः यद्रूपावच्छिन्नविषयकत्वावच्छिन्नाप्रतिबंधकत्वपक्षधर्मताज्ञानकालीनत्वोभयाभाववन्निवेशे तु मेयत्वविशिष्टव्यभिचारादावतिव्याप्तिरि
तिनेकिंचिदेतत्। ननु यद्रूपावच्छिन्नविषयिताप्रत्यक्षानुमितिप्रतिबंधकतानतिरिक्तवृत्तिः तद्रूपावच्छिन्नविषयकत्वावच्छिन्नाविषयकेप्रतत्वानं तद्वृत्तिप्रतिबंधकतानतिरिक्त.

शि ६

ष्टत्वेर्थरूपावच्छिन्नविषयिताया रूपावच्छिन्नत्वं विशिष्टान्तराघटितत्वं तदर्थः। एवं च विशेष्यदलं न देयमिति चेन्न। असाधारण्येऽव्याप्तेः प्रतिबन्धकताया निरुक्तोभयाभावरूपत्वे
विताद्दशोभयाभावस्य स्वावच्छिन्नाविषयकज्ञानवृत्तित्वेन तद्व्याप्यत्वानुद्धारात् साध्यव्यापकीभूताभावप्रतियोगिहेतुमत्पक्षेतिव्याप्तेश्च। तद्विषयके केवलासाधारण्यादि
ज्ञाने तदुभयाभावसत्त्वात्। न च अयमयं कूपपदेन जलवद्ध्रदत्वोपादाने नेयमतिव्याप्तिर्वारयितुं शक्या। केवलासाधारण्यादिज्ञानस्य तद्रूपावच्छिन्नाविषयकत्वेपि प्रमेयसवि
शिष्टासाधारण्यवारणाय तत्र तादृशोभयाभावस्यैव प्रतिबन्धकतापदेन विवक्षणीयतया यथाश्रुतेपि च तद्दोषेन तदुपादानासंभवात्। तदवच्छिन्नविषयिताया: प्रतिबन्धकताति
रिक्तवृत्तित्वात्। परं तु स्वविषयिताव्यापकीभूतनिरूप्यनिरूपकभावापन्नविषयिताशून्यत्वस्वनिरूपितप्रतिबन्धकतावच्छेदकविषयितावत्त्वोभयसंबंधेन यादृशविशिष्टज्ञानत्वस्वव्यापक
ज्ञानवैशिष्ट्यानवच्छिन्नप्रतिबन्धकताशून्यत्वं प्रकृतहेतौ साध्यव्यापकीभूताभावप्रतियोगित्वानवगाहित्वोभयाभावकृता दृशविशिष्टत्वं हेत्वाभासत्वं अनाहार्यत्वनिश्चयत्वयोरनिवेशात्। हृद इति ज्ञान
स्य प्रतिबन्धकताशून्यत्वेन च तत्स्वभाववानहृद इति स्वविषयिताव्यापकत्वस्यादिविषयिताशून्यत्वाभावेन च तादृशोभयसंबंधेन हृदत्वविशिष्टविशिष्टत्वाभावान्नेहृदत्वावच्छिन्नैकदेशोऽति
प्रसंगः संयोगः संयोगाभाववान् निसादौ संयोगः संयोगवानिति भ्रमस्य यथाश्रुतव्यापकविषयिताशून्यत्वेपि च निरुक्तव्यापकसंयोगत्वावच्छिन्नविषयितानिरूपितसंयोगत्वावच्छिन्नविषयि
ताशून्यत्वाभावात् संयोग इति ज्ञानस्य प्रतिबन्धकतावच्छेदकविषयितावत्त्वविरहात् संयोगत्वविशिष्टेऽतिप्रसंगः। नापि जातिमान् तत्स्वभाववानिति ज्ञानमादाय असंभवः। तत्रानिरुक्तसंस
र्गेणावैशिष्ट्यविरहात्। नापि वह्न्यभाववज्जलादिमद्वृत्तिजलवद्ध्रदोपादानमयत्वं च सर्वत्रादोषोऽतिव्याप्तिः। तज्ज्ञानस्य तादृशोभयाभाववत्त्वविरहेण तादृशोभयाभावेनिरुक्तव्यापकताविर
हात् हृदो वह्न्यभाववज्जलवृत्तिजलाभाववान् वह्निरित्यादौ तादृशजलवद्ध्रदात्मकहेतुमत्ताग्रहे प्रतिज्ञानवैशिष्ट्यावच्छिन्नप्रतिबन्धकताश्रयज्ञानविषयतादृशजलवद्ध्रदात्मकबाधसंग्रहाय ज्ञा
नवैशिष्ट्यावच्छिन्नप्रतिबन्धकत्वमुपेक्ष्य तदनवच्छिन्नप्रतिबन्धकताभाववन्निवेशः। असाधारण्यसंग्रहाय ज्ञानावच्छिन्नात निवेश:। न चैवं पक्षवृत्तित्वघटितासाधारण्येऽतिव्याप्तिरिति वाच्यं हेतुम
त्पक्षज्ञानकालीनत्वेन ज्ञानविशेषणादित्याहुः। अत्र प्रमेयत्वविशिष्टव्यभिचारवारणाय प्रतिबन्धकतानवच्छेदकविषयिताशून्यत्वविवक्षणेपि प्रमेयाभाववद्वृत्तिघटितपक्षादिवृत्तिः तत्राव्याप्तिः
स्वनिरूपितयत्किंचित्प्रतिबन्धकतानवच्छेदकविषयिताशून्यत्वविवक्षणे सव्यभिचारः। प्रमेयत्वमवृत्ति प्रमेयत्वादित्यादौ बाधघटितव्यभिचारसंग्रहाय प्रतिबन्धकतयोरैक्यं विवक्षितमिति ध्येयं।
यत्किंचिद्विशिष्टे तत्र विशिष्टान्तरविषयिताप्रयोज्यत्वादिविवक्षणीयकल्पेऽतिप्रसंगवारणीभूते स्वावच्छिन्नाविषयकप्रतीतिविषयीभूततादृशाविषयकप्रतीतिविषयस्वरूपयथाश्रुतविशिष्टान्
तराघटितत्वं कल्पे तद्वारणाय तत्कल्पे ज्ञानवैशिष्ट्यावच्छिन्नत्वमादाय रूपकमिसांकता न चेति। यादृशेति। यद्रूपावच्छिन्नविषयिताशालिनिश्चयविशिष्टयद्रूपावच्छिन्नविषयिताशालिनिश्चयत्वव्या

३   की

पिकाप्रकृतानुमितिप्रतिबंधकतातद्रूपावच्छिन्नविषयितावत्तद्रूपावच्छिन्नविषयितानिष्ठद्वित्वावच्छिन्नप्रतियोगिताकासंताभावकूटवत्तीयाप्रतीतिस्तद्विषयतावच्छेदकत्वेसतिस्वावच्छिन्नविषयिताशू
न्यप्रतीतिविषयितावच्छेदकरूपद्रूपावच्छिन्नविषयिताव्यापिकाप्रकृतानुमितिप्रतिबंधकतातद्रूपावच्छिन्नविषयिताशून्यप्रतीतिविषयतावच्छेदकत्वमर्थः नन्वभाववज्जलादिमद्वृत्तिजलवद्ध्रदा
दौच प्रकृतानुमितिप्रतिबंधकतायावन्ह्यभाववज्जलावच्छिन्नविषयिताशालिनिश्चयविशिष्टजलवद्ध्रदत्वावच्छिन्नविषयताशालिनिश्चयत्वेनवन्ह्यभाववज्जलावच्छिन्नविषयित्वजलवद्ध्रदत्वावच्छिन्न
विषयित्वनिष्ठद्वित्वावच्छिन्नविषयिताशून्यत्वस्यवन्ह्यभाववज्जलादिमद्वृत्तिजलवान्ह्रदइतिज्ञानेऽभावान्नातिव्याप्तिरितिभावः। अन्यस्याविषयकप्रतीतिविषयीभूतेतादृशप्रकृतानुमितिप्रतिबंधकता
निरूपितावच्छेदकीभूतस्वनिरूपितविशिष्टविषयिताकेताभ्याम घटितत्वमितिमुखसातादृशविशिष्टद्वयाघटितत्वस्यतादृशविशिष्टान्तरेणाघटितत्वमितिमुखसाचतादृशविशिष्टान्तराघटितत्वस्य
चलीभावोप्यदृति।। नचयादृशविशिष्टविषयकनिश्चयविशिष्टनिश्चयव्यक्तित्वविशिष्टयादृशविशिष्टविषयितासामान्येऽनुमितिप्रतिबंधकतायाःस्वरूपसंबंधरूपावच्छेदकत्वनिवेशेनैवोपपत्तौ
विशिष्टद्वयाघटितत्वशरीरेऽनतिरिक्तवृत्तित्वनिवेशनंव्यर्थमितिवाच्यं। द्रव्यत्वाभावस्यपक्षतायांघटत्वस्यहेतुतायांघटत्वव्यापकद्रव्यत्वत्वव्यापकविशेषतासंबंधेनघटत्वाभाववद्द्रव्यत्व
कालीनगोत्वाभावस्यसाध्यतायांघटत्वाभाववद्द्रव्यत्वेत्वाविशिष्टविषयकनिश्चयविशिष्टद्रव्यत्वत्ववान्द्रव्यत्वाभावइत्याकारकद्रव्यत्वाभावाविशिष्टविषयकाव्यापकविषयिताशून्यनिश्च
यत्वस्यपक्षेघटत्वरूपहेतुमत्ताज्ञानप्रतिबंधकतावच्छेदकतयातादृशसंबंधेनघटत्वाभाववद्द्रव्यत्वकालीनगोत्वाभाववद्द्रव्यत्वात्मकबाधेपक्षवृत्तिजलमितिनिश्चयविशिष्टवन्हिव्यापकीभू
ताभावप्रतियोगित्वविशिष्टहेतुनिश्चयस्तेनप्रतिबंधकतयाजलत्वविशिष्टनिश्चयविशिष्टनिश्चयनिष्ठवन्हिव्यापकीभूताभावप्रतियोगित्वविशिष्टहेतुनिश्चयत्वेनप्रतिबंधकतयाजलत्वविशि
ष्टविषयकनिश्चयविशिष्टनिश्चयनिष्ठवन्हिव्यापकीभूताभावप्रतियोगित्वविशिष्टविषयितायाःस्वरूपसंबंधरूपावच्छेदकत्वेनाजलत्वविशिष्टवन्हिव्यापकीभूताभावप्रतियोगित्वविशिष्ट
हेतुरूपाविशिष्टद्वयघटितत्वेनासाधारण्याव्याप्तिवारणायतत्सार्थक्यात्। अथयादृशविशिष्टविषयकनिश्चयविशिष्टयादृशविशिष्टविषयकनिश्चयत्वप्रकृतानुमितिप्रतिबंधकतायाः
स्वरूपसंबंधरूपावच्छेदकतावदित्येवकृत्यंतन्नलाघवेनिश्चयद्वयेऽव्यापकविषयिताशून्यत्वमवश्यंदेयं अन्यथाजलेनतिरिक्तवृत्तित्वकल्पेपिजातित्वादिनाजलत्वावगाहिज्ञानघटितनिश्चयत्वे
नतादृशानुमितिप्रतिबंधकतावच्छेदकमितिविशिष्टद्वयाघटितत्वनिवेशनमनर्थकंस्यात् तथाचासाधारण्येनाव्याप्तिः जलत्वविशिष्टविषयताव्यापकीभूतविषयिताशून्यनिश्चयविशिष्टासा
धारण्यनिश्चयत्वेस्वरूपसंबंधरूपावच्छेदकत्वविरहान्नाव्याप्तिरितिकिमनतिरिक्तवृत्तित्वनिवेशनेनयदिचप्रथमयादृशविशिष्टविषयकनिश्चयेऽव्यापकविषयिताशून्यत्वंनप्रवेश्यंशुद्धज
लत्वविशिष्टजलव्यापकताघटितसंबंधः शुद्धजलत्वविशिष्टजलधर्मितावच्छेदककज्ञानेभासतेइतिजातिमद्व्यापकताघटितसंबंधेनवन्ह्यभाववज्जलवद्ध्रदरूपविशिष्टघटकइतिमन्यतेतदा

तदृश्यसाधारण्ये ऽव्याप्तिवारणायैव तादृशव्यापकविषयिताशून्यत्वं देयं। तावताप्यप्रामाण्यग्रहाभावाघटितविवेचने नलाघवात् अजनतिरिक्तवृत्तित्वापेक्षया लाघवादिति चेत् एवमपि जल
वर्तमानकालीनः पर्वतो जलवत्समानकालीनपर्वतकालीनवह्निमान् जलादिसाध्यके जलप्रकारकतादृशपक्षनिश्चयविशिष्टजलवत्समानकालीनपर्वतकालीनवह्निव्यापकीभूताभावप्र
तियोगिहेतुनिश्चयत्वेनाप्रतिबंधकतया तत्र साधारण्ये जलवत्समानकालीनपर्वतकालीनवह्निव्यापकीभूताभावप्रतियोगिहेतुत्वे ऽव्याप्तिः तत्र तादृशपक्षरूपतादृशसाधारण्य
रूपद्वयघटितत्वात् तदनतिरिक्तवृत्तित्वनिवेशनमिति। एवं गंधत्ववान् संयोगो गंधत्वाभावव्याप्यसंयोगवह्निमान् जलादिसाध्यके गंधत्वाभावव्याप्यसंयोगवह्निव्यापकीभूता
भावप्रतियोगिजलादिरूपासाधारण्ये ऽव्याप्तिः संयोगत्वविशिष्टगंधत्वाभावव्याप्यसंयोगत्वविशिष्टद्वयस्य संयोगत्वविशिष्टरूपैकविषयिताशालिना संयोगः
संयोगवान् इति निश्चयेन विशिष्टस्य गंधत्वाभावव्याप्यसंयोगत्वविशिष्टरूपापरविशिष्टनिरूपितविषयिताविशिष्टत्वरूपसंबंधत्ववान् संयोग इति विशिष्ट
पक्षग्रहनिरूपितप्रतिबंधकतावच्छेदकत्वात्तद्घटितत्वात् अनतिरिक्तवृत्तित्वनिवेशे तु संयोगनिश्चयविशिष्टगंधत्वाभावव्याप्यसंयोगनिश्चयत्वस्य संयोग
इति निश्चयविशिष्टगंधत्वाभावव्याप्यः संयोग इति निश्चये ऽपि सत्त्वेन तत्राश्रयासिद्ध्यादिप्रतिबंधकताविरहेणादोषात्। यद्यपि यादृशविषयिताद्वयसामान्य
स्य प्रतिबंधकतायाः स्वरूपसंबंधरूपावच्छेदकताप्रवेशेन दोषः निश्चयत्वानिवेशेन लाघवं च तथापि परिचायकस्य पुरस्फूर्तिकस्य प्रतिबंधकतावच्छेदकघ
टितत्वार्थं तथाभिधानं। स्वरूपसंबंधरूपावच्छेदकतापर्याप्तिनिवेशस्य दुष्करतया ऽनतिरिक्तवृत्तित्वनिवेशः। ननु विशिष्टद्वयाघटितत्वनिवेशे ऽभाववान्
वह्न्यभाववानयं वाभाववानित्यवच्छेदकधर्मभेदेन विधया प्रतिबंधकताभेदाद्यवह्न्यभाववत्त्वविशिष्टह्रदत्वविशिष्टरूपविशिष्टद्वयघटिततया वह्न्यभाववद्
ह्रदाद्यसंभवः। न चेदं न जलमित्यादौ जलत्ववदिदंत्वावच्छिन्नेवाधेयलक्षणासमन्वयः स्यादिति वाच्यं। तत्रापि पृथिवी जलमिदं च पृथिवीत्यादिज्ञानमादायेदं
त्वावच्छिन्ने जलत्वावच्छिन्नविषयितयोः स्वरूपसंबंधरूपावच्छेदकत्वसंभवेन जलत्वविशिष्टेदंत्वविशिष्टद्वयघटितत्वादिसत्त्वोऽनतिरिक्तवृत्तित्वनिवेशः
सत्त्व न संगच्छते तदुपादानेऽपि वह्न्यभावत्वविशिष्टवह्न्यभाववद्ह्रदत्वरूपविशिष्टद्वयघटिततयाऽसंभववारणाय ज्ञानवैशिष्ट्यानवच्छिन्नप्रतिबंधकतानवच्छेदक
त्वेन विशिष्टद्वयविषयितायाः निवेशनीयतया वह्न्यभाववत्त्वविशिष्टविषयिताऽभाववद्ह्रदत्वावच्छिन्नविषयितयोर्ज्ञानवैशिष्ट्यानवच्छिन्नबाधनिश्चयप्रतिबंध

५५

कतायामवच्छेदकत्वेनैव वारणसंभवेन तद्वैयर्थ्यात्। यत्तु प्रतिबंधकताया एव ज्ञानवैशिष्ट्यावच्छिन्नत्वनिवेशान्न सार्थक्यमिति तन्न। ह्रदो वह्निमान्वह्न्यभाववज्जलादिमद्वृत्ति
जलवद्ह्रदाभावादिसाध्ये वह्न्यभाववज्जलवद्वृत्तिजलवद्ह्रदालोकस्य रूपासिध्यापत्तेरिति व्याप्तेः। यत्तु शुक्लद्रव्यवति रक्तद्रव्यः साध्यते तत्र रक्तद्रव्याभाववच्छुक्लद्रव्यवृत्तित्वाधेऽव्याप्तिः। प्रत्य
क्षसामग्रीघटकत्वेन शुक्लद्रव्यविषयकनिश्चयविशिष्टरक्तद्रव्यविषयकनिश्चयत्वेनानुमितिप्रतिबंधकत्वेन शुक्लरक्तद्रव्यरूपविशिष्टद्वयघटितत्वादिति न सार्थक्यं।
तन्न सामग्रीप्रतिबध्यतायां सामान्यकारणानामनिवेशात्। अत एव कालादिसाधारणसामग्र्याः कापि प्रतिबंधकत्वं नास्तीति पक्षताग्रंथे दीधितिकारः। अस्तु वा साधा
रणकारणानामपि सामग्रीघटकता। अस्तु च प्रत्यक्षे विशेषणस्य ज्ञानस्य कारणतेति मतं वा। अस्तु च सामग्रीत्वस्यैकविशिष्टापरत्वरूपतया तेन रूपेण प्रतिबंधकतायाः ज्ञानवै
शिष्ट्यावच्छिन्नत्वं तथापि ज्ञानवैशिष्ट्यानवच्छिन्नबाधज्ञानीयप्रतिबंधकतावच्छेदकत्वेन निरुक्तद्वयविषयिताया अतथात्वान्नाव्याप्तिः। अथ वह्निमान् जलादिसाध्ये वह्निव्यापकीभू
ताभावप्रतियोगिजलेऽसाधारण्येऽव्याप्तिः जलवान् वह्न्यभाववान् जलवांश्च ह्रद इति ज्ञानद्वयप्रतिबंधकतामादाय वह्निजलात्मकविशिष्टद्वयघटितत्वादिति तदुपादानमिति चेन्न
जातिमद्वान् वह्न्यभाववान् जलवांश्च ह्रद इति जलवान् वह्न्यभाववानिति जातिमद्वांश्च ह्रद इति ज्ञानयोरपि वह्न्यभाववज्जलवद्विषयकनिश्चयविशिष्टजलवद्ह्रदविषयकनि
श्चयत्वस्य तेन तस्य प्रतिबंधकतानतिरिक्तवृत्तित्वेन द्विविशिष्टद्वयाप्रसिद्धेरतत्र आपकविषयिताशून्यत्वं निश्चयद्वयविशेषणम्। एवं च स्वरूपसंबंधरूपावच्छेदकत्वनिवेशे
पुनरुक्तरीत्या नासंभवाव्याप्त्योरवकाश इति तद्वैयर्थ्यात्। यत्तु यद्रूपावच्छिन्नविषयकनिश्चयविशिष्टस्वावच्छिन्नाविषयकप्रतीतिविषयतावच्छेदकयद्रूपावच्छिन्नविषय
कनिश्चयत्वं प्रतिबंधकतानतिरिक्तवृत्तीत्यादिक्रमेण निरुक्तविशेषणार्थः एवं चावशिष्टांतराघटितत्वं पृथङ्ग निवेश्यते। प्रमेयत्वविशिष्टविषयकनिश्चयविशिष्टव्य
भिचारत्वविशिष्टविषयकनिश्चयत्वस्याप्रतिबंधकतानतिरिक्तवृत्तितया तत एव मेयत्वविशिष्टव्यभिचारादावतिव्याप्त्यभावात्। एतेनानतिरिक्तवृत्तित्वनिवेशनमपि सार्थकं।
अन्यथा प्रमेयत्वविशिष्टनिश्चयविशिष्टव्यभिचारनिश्चयत्वविशिष्टविषयकनिश्चयत्वे स्वरूपसंबंधरूपावच्छेदकत्वाभावेन न तदतिप्रसंगतादवस्थ्यात् स्वावच्छिन्नाविषय
केत्यादिविशेषणान्नोक्तरीत्या वह्न्यभाववद्ह्रदादावसंभवः इति तन्मंदं। उक्तस्थले वह्न्यभाववज्जलादिमद्वृत्तिजलवद्ह्रदाद्यात्मकाप्रसिद्धाव्याप्तेः। अत्रोच्यते। विशेषणता
त्रयघटिताव्यापकताशून्यत्वनिवेशान्न पृथिवीत्वाभावे पृथिवीभेदे वा साध्ये पृथिवीभेदव्यापकीभूताभावप्रतियोगिघटत्वेऽतिव्याप्तिः घटः पृथिवी अयं च घट इति ज्ञानवैशि
ष्ट्यावच्छिन्नप्रतिबंधकतामादाय निरुक्तपृथिवीत्वघटत्वरूपविशिष्टद्वयघटितत्वादिति न तत्सार्थक्यमिति वदंति॥ अथ वह्न्यभाववद्ह्रदादिविशिष्टविषयकनिश्चय

५५

विशिष्टह्रदत्वादिविशिष्टविषयकनिश्चयत्वस्यानुमितिप्रतिबंधकतानतिरिक्तवृत्तितया तादृशविशिष्टद्वयघटितत्वाद्वन्ह्यभाववद्ध्रदादावसंभवः । ननु स्वावच्छिन्नविषयकनिश्चयविशिष्टयद्रू
पावच्छिन्नविषयकनिश्चयत्वव्यापिका प्रकृतानुमितिप्रतिबंधकता तद्रूपावच्छिन्नविषयकनिश्चयविशिष्टस्वावच्छिन्नविषयकनिश्चयत्वव्यापिका भवति स्वावच्छिन्नविषयित्वतद्रूपाव
च्छिन्नविषयित्वोभयसम्बन्धेन स्वप्रतीतिविषयत्वविवक्षणान्न दोषः प्रकृतानुमितिप्रतिबंधकतात्वव्यापकतावच्छेदकत्वविवक्षया वन्ह्यभाववज्जलवद्वृत्तिजलवद्ध्रदत्वान प्रतिबंधकतयोर्विशे
ष्यविशेषणभावभेदेन भेदेपि न क्षतिरिति चेन्न । एवमपि वन्ह्यभाववद्ध्रदत्वविशिष्टविषयकनिश्चयविशिष्टवन्ह्यभाववद्ध्रदत्वविशिष्टविषयकनिश्चयत्वस्यापि प्रकृतानुमितिप्रतिबंधकता
नतिरिक्तवृत्तित्वात् तादृशयादृशविशिष्टविषयकनिश्चयविशिष्टयादृशविशिष्टविषयकनिश्चयत्वं ज्ञानवैशिष्ट्यावच्छिन्नप्रतिबंधकतानतिरिक्तवृत्ति तादृशविशिष्टद्वयाघटितत्वस्यापि नि
वेशनीयत्वात् । अथैवमपि वन्ह्यभाववज्जलादिमद्वृत्तिजलाभाववद्ध्रदपक्षकस्थले तादृशजलवद्ध्रदाघटकाश्रयासिद्धावव्याप्तिः तत्र तादृशविशिष्टद्वयघटितत्वात् न चाश्रयासिद्धिविषयता
घटकविषयताभिन्नत्वं तादृशविशिष्टद्वयविषयतायां निवेश्यमिति वाच्यं तथा सति तादृशी साध्याप्रसिध्यादावव्याप्तिवारणाय साध्याप्रसिद्धिसाधनाप्रसिद्धिमात्रविषयताघट
कविषयताभिन्नत्वस्यापि निवेशनीयतया गौरवात् ग्रंथकारस्य सत्प्रतिपक्षघटकविषयताभिन्नत्वमात्रनिवेशनानौचित्याच्च । न च यादृशविशिष्टविषयकनिश्चयत्वं ज्ञान
वैशिष्ट्यानवच्छिन्नप्रतिबंधकतानतिरिक्तवृत्ति तादृशविशिष्टघटकविशिष्टद्वयभिन्नत्वं तादृशविशिष्टद्वये निवेशनीयमिति तेन दोषदूषितवाच्यं तथा सति वन्ह्यभाववज्जलादिमद्वृत्तिजला
भाववद्ध्रदपक्षकस्थले वन्ह्यभाववज्जलादिमत्कालीनजलवद्ध्रदेरपि दोषतापत्तेः विशिष्टपक्षग्रहाविरोधितया आश्रयासिद्धित्वाभावादिति चेन्न यादृशविशिष्टविषयकनिश्चयत्वं ज्ञानवै
शिष्ट्यानवच्छिन्नप्रतिबंधकतानतिरिक्तवृत्ति तादृशविशिष्टविषयिताघटकत्वस्य विशिष्टद्वयविषयितायां निवेशनीयत्वात् । अत्रानतिरिक्तवृत्तित्वं किमर्थमिति न वाच्यं । जलवद्ध्रदविशि
ष्टद्वयघटिते दोषघटकविशिष्टेऽतिव्याप्तेः । यत्र वन्ह्यभाववज्जलादिमद्वृत्तिजलादिमद्ध्रदः पक्षः वन्हिः साध्यस्तत्र वन्ह्यभावविशिष्टतादृशह्रदात्मकबाधघटकं यद्वन्ह्यभाववज्जल वृत्त्यात्मकं
विशिष्टं पक्षे जलवद्ध्रदात्मकं विशिष्टं तन्निष्ठप्रकारकनिश्चयत्वस्य ज्ञानवैशिष्ट्यानवच्छिन्नप्रतिबंधकतानिरूपितस्वरूपसंबंधरूपावच्छेदकतया तादृशतादृशविशिष्टविषयिताघटकं निरुक्तविशिष्टद्वय
विषयित्वं तदुभयशून्यप्रतीतिविषयत्वस्य तत्र बाधघटके वन्ह्यभाववज्जलादिमद्वृत्तिजलवद्ध्रदादेः सत्वात् । एवं च सत्प्रतिपक्षज्ञाननिष्ठप्रतिबंधकतायां ज्ञानवैशिष्ट्यानवच्छिन्नत्वाभावेन सत्प्रति
पक्षाविषयितावघटकत्वोपादानं संगच्छते । न च तदपेक्षया लाघवेन ज्ञानवैशिष्ट्यावच्छिन्नत्वसत्प्रतिपक्षविषयितानवच्छिन्नत्वोभयाभावनिवेशेनैवोपपत्तौ व्यर्थतादृशोपादानमिति वाच्यं ।

४५ २ तयोस्ताद्रशविशिष्टविषयिताघटकत्वादिति एवं च वैशिष्ट्यद्वयाघटितत्वशरीरे ऽसंभववारणाय प्रतिबंधकतायां ज्ञानवैशिष्ट्यावच्छिन्नत्वं न देयं वन्ह्यभाववद्ध्रदत्वविशिष्टविषयकनिश्चयत्वस्य ज्ञानवैशि-
ष्ट्यानवच्छिन्नप्रतिबंधकतानवच्छेदकतया ताद्रशविशिष्टविषयिताघटकविषयि २

न तथा सति जलव्यापकवन्ह्यभावकालीनजलवद्ध्रदे ऽतिव्याप्तेः। तद्विषयितायाः सत्त्वेपि पक्षविषयितानवच्छिन्नत्वेनोभयाभाववत्याः प्रतिबंधकतानवच्छेदकतया तद्घटितजलव्यापक-
वन्ह्यभावजलवद्ध्रदविषयितायां निरुक्तविषयिताभिन्नत्वाभावात्। न चैतदपेक्ष्य प्रकृतसाध्यावगाहिप्रकृतहेतुमत्त्वप्रकृतपक्षग्रहप्रतिबंधकतानवच्छेदकत्वं विशिष्टद्वयविषयितायां कुतो नाति-
वेश्यते तावताप्युक्ताश्रयासिद्ध्याव्याप्तिवारणासंभवादिति वाच्यं। तथा सति पर्वतो धूमवान्वन्हेरित्यादौ वन्ह्यभाववज्जलवद्धृतिजलवद्ध्रदे ऽतिव्याप्तेर्दुर्वारत्वात् इति। वस्तुतस्तु लाघवात् ज्ञानवै-
शिष्ट्यानवच्छिन्नप्रतिबंधकतानवच्छेदकताद्रशविशिष्टद्वयविषयिताशून्यप्रतीतिविषयतावच्छेदकत्वं विवक्षितं उक्तस्वरूपासिद्धौ ताद्रशविशिष्टद्वयविषयितायाः ज्ञानवैशिष्ट्यानवच्छिन्नप्रकृ-
तहेतुविशिष्टप्रकृतपक्षग्रहप्रतिबंधकत्वेनोक्ताघटितत्वात्तस्यानपायात्। न दोषः। यत्तु असंभववारणाय ज्ञानवैशिष्ट्यावच्छिन्नप्रतिबंधकतानिवेशे यत्र ह्रदो धूमाभावव्याप्यशैवाला-
भावः साध्यः धूमश्च हेतुस्तत्र धूमाभावव्याप्यशैवालवद्ध्रदरूपबाधाव्याप्तिः धूमाभावव्याप्यशैवालनिश्चयविशिष्टशैवालवद्ध्रदनिश्चयत्वेन ज्ञानवैशिष्ट्यावच्छिन्नप्रतिबंधकतासत्त्वा-
त्। न च ज्ञानवैशिष्ट्यानवच्छिन्नप्रतिबंधकताव्यापकत्वरूपविशेषणविशिष्टप्रतिबंधकत्वविशिष्टद्वयाघटितत्वघटकमिति वाच्यं। उक्तस्थले धूमाभावव्याप्यशैवालकालीनशैवालव-
द्ध्रदे ऽतिव्याप्तेः। तत्र धूमाभावव्याप्यशैवालविषयकनिश्चयविशिष्टशैवालवद्ध्रदविषयकनिश्चयत्वस्य धूमवत्त्वं समादाय ज्ञानवैशिष्ट्यानवच्छिन्नप्रतिबंधकताव्यापकीभूतप्रतिबंधक-
तायाः एवानतिरिक्तवृत्तित्वादिति तदेनपरास्तं। न च तथापि वन्ह्यभाववज्जलवत्त्वविशिष्टजलवद्ध्रदत्वविशिष्टरूपस्य किंचिद्विशिष्टद्वयाघटितेव वन्ह्यभाववच्छैवालवद्ध्रदे शैवालवद्ध्र-
दादावतिव्याप्तिवारणानुरोधेन ताद्रशविशिष्टद्वयविषयित्वाभावकूटवत्त्वानीतिविषयतावच्छेदकत्वं विवक्षणीयं। तथा च वन्हिनिश्चयविशिष्टवन्ह्यभाववद्ध्रदनिश्चयस्यापि प्रति-
बंधकतानतिरिक्तवृत्तितया ताद्रशद्वयांतःपातित्वं वन्हिवन्ह्यभाववद्ध्रदद्वयस्यापि इति ज्ञानवैशिष्ट्यानवच्छिन्नप्रतिबंधकतानवच्छेदकताद्रशद्वयविषयत्वाप्रसिद्ध्या ऽसंभवस्तदवस्थ-
इति वाच्यं। यथा ताद्रशविशिष्टविषयकेषु देश्यतावच्छेदककोटिनिविष्टविषयितायामपि तस्य विशेषणत्वादिति वाच्यं। यत्तु क्वासंभववारणाय ज्ञानवैशिष्ट्यानवच्छिन्नप्रतिबंधकतानवच्छेदक-
यत्किंचिद्विषयताघटितताद्रशविशिष्टद्वयविषयित्वाभावकूटवत्त्वानीतिविषयतावच्छेदकत्वं विवक्षणीयमिति तन्न। प्रमेयत्वविशिष्टवन्हिवारे प्रमेयत्वविशिष्टविषयितारूपताद्रशघ-
टितत्वेनैवातिव्याप्त्यप्रसक्तेर्वक्ष्यमाणविशेषणवैयर्थ्यापातादिति। न च ताद्रशविशिष्टद्वयविषयिताद्वयस्यैकत्र ज्ञानवैशिष्ट्यानवच्छिन्नप्रतिबंधकतानवच्छेदकत्वनिवेशादेवसा-
मंजस्ये ऽपरत्रैतन्निवेशवैयर्थ्यं। ज्ञानवैशिष्ट्यानवच्छिन्नप्रतिबंधकतानवच्छेदकावृत्तित्वस्य ताद्रशविशिष्टद्वयविषयिताद्वयत्वेन निवेशनावैयर्थ्यात् प्रतिबंधकतायां ज्ञानवैशिष्ट्या-

वच्छिन्नत्वनिवेशादपि नोक्तासंभवः विशिष्टविषयित्वाघटकत्वनिवेशकल्पे तु हेयधर्मोपितस्यैवानिवेशेनाप्यत्वन्निवेशो संभवात् न चैवमपि ह्रदो वन्हिमान् वन्ह्यभाववज्जलवद्वृत्तिजलाभावादित्या
दौ पूर्वोक्तस्थले व्याप्तिः वन्हिनिश्चयविशिष्टवन्ह्यभाववज्जलवद्वृत्तिजलवद्ध्रद इति निश्चयत्वस्य ज्ञानवैशिष्ट्यानवच्छिन्नपक्षधर्मिकहेतुमत्ताज्ञाननिरूपितप्रतिबंधकताभावात्वज्ञानवैशिष्ट्यावच्छिन्नपक्षे साध्य
ग्रहनिरूपितप्रतिबंधकताया अनतिरिक्तवृत्तित्वेन वन्हिवन्नीलादिविशिष्टह्रदस्यापि तक्रदृष्टांतः प्रातीतया ज्ञानवैशिष्ट्यानवच्छिन्नप्रतिबंधकतावच्छेदकताद्रशविषयिताद्वयाप्रसिध्याऽवच्छेदकत्वांत
स्यलक्ष्यतावच्छेदके दुरूपपादत्वादिति धार्च्यं । यदेकविशिष्टविषयकनिश्चयविशिष्टापरविशिष्टविषयकनिश्चयत्वं तदेकविशिष्टानिरूपितविशिष्टविषयितानवच्छिन्नज्ञाननिष्ठावच्छेदकताकत्वदपर
विशिष्टानिरूपितविशिष्टविषयितानवच्छिन्नप्रतिबंधकतानतिरिक्तवृत्तिज्ञानवैशिष्ट्यानवच्छिन्नप्रतिबंधकतावच्छेदकावृत्तिताद्रशविशिष्टद्वयविषयिताद्वयत्वावच्छिन्नाभावकूटवत्प्रतीतिविषय
तावच्छेदकत्वस्य विवक्षिततया तद्द्वयस्य ताद्रशद्वयानंतर्भावात् वन्ह्यभाववज्जलवत्स्वरूपजलवद्ध्रदस्वरूपविशिष्टद्वयत्वस्य ताद्रशप्रतिबंधकतावच्छेदकावृत्तित्वेन लक्षणगमनात् ताद्रशविशि
ष्टानिरूपितविशिष्टविषयित्वं च ताद्रशविशिष्टनिरूपितविषयितानिरूपितावच्छेदकतापर्याप्त्यधिकरणधर्मविशिष्टनिरूपितविषयित्वं तेन जलवद्ध्रदत्वादिविशिष्टानिरूपिते न जलत्वेनाभाव
गाहिजलवान् ह्रद इति ज्ञानविषयित्वेन प्रतिबंधकतातदवच्छेदकत्वयोरवच्छेद्यत्वेपि नाप्रसिद्धिः अमविषयित्वस्याप्रसिद्धत्वात् तथा ताद्रशद्वयस्य ज्ञानवैशिष्ट्यानवच्छिन्नप्रतिबंधकता
नवच्छेदकैकविशिष्टनिरूपितविषयिताशालिनिश्चयविशिष्टतथाविधापरनिरूपितविषयिताशालिनिश्चयत्वं प्रतिबंधकतानतिरिक्तवृत्तीति विवक्षणीयम् ॥ अन्यथा वन्हिमत्जलवत्का
लीनह्रदो वन्हिमान् जलाभावादित्यादौ वन्ह्यभाववज्जलवज्जलवद्ध्रदस्वरूपदृष्टांतः प्रातीत्वापसाज्ञानवैशिष्ट्यानवच्छिन्नप्रतिबंधकतावच्छेदकीभूतताद्रशविशिष्टद्वयविषयिताद्वयाप्रसिध्या
तत्र सव्याप्यादावव्याप्त्यापत्तेः एवं चोक्तासंभवानवकाशेन प्रतिबंधकतायाविशेषणानि फलमिति वाच्यं । एवं विवक्षणेपि घटत्वप्रमेयत्वादिविशिष्टवन्ह्यभाववज्जले वृत्तिजल
वद्ध्रदत्वविशिष्टादिरूपानंतस्य दृष्टांतः प्रातीत्वापसाताद्रशताद्रशविशिष्टद्वयविषयिताद्वयत्वावच्छिन्नाभावकूटस्याव्यावर्तकस्य निवेशप्रसंगात् । अव्यावर्तकनिवेशरूपगौरव
वाये वोक्तविशेषणसार्थक्यात् । अत एव ज्ञानवैशिष्ट्यानवच्छिन्नप्रतिबंधकतानवच्छेदकं यादृशयादृशविषयिताशालिनिश्चयत्वं प्रकृतानुमितिप्रतिबंधकतानतिरिक्तवृत्तिताद
शताद्रशाघटितत्वमेव निवेश्यं न तु द्वयाघटितत्वं गौरवात् इति प्रयुक्तौ वन्ह्यभाववज्जलत्वत्वविशिष्टवन्ह्यभाववद्ध्रदत्वविशिष्टद्वयघटितवन्ह्यभाववज्जल[illegible]ज्जिजलवद्ध्रदताद्रश
जलवत्कालीनह्रदकालीनत्वं ताद्रशजलवत्कालीनगगनकालीनजलवद्ध्रदत्वावच्छिन्नेऽतिव्याप्तिवारणाय ताद्रशताद्रशविषयिताभावकूटनिवेशे महागौरवात् । अन्ये तु ज्ञा

वह्न्

५६ नवैशिष्ट्यावच्छिन्नप्रतिबंधकतानिवेशलाभार्थं तथोक्तमिति साहुः। अथ यादृशयादृशपदेन यद्व्यभाववज्जलत्वादिमत्त्वेनिजलत्ववद्ह्रदादेरिव वन्ह्य
भाववज्जलवत्कालीनजलत्ववद्ध्रदादेरपि उपादेयतया तादृशतादृशपदजन्यविषयिताघटितत्वमपेक्ष्यते तदुदृट्कविशिष्टद्वयमुपादायता
दृशतादृशविशिष्टयत्ताध्वीरणमेव सम्यगिति लाघवादिति समाधानमयुक्तं तादृशविशिष्टद्वयाघटितत्वकल्पेपि वन्ह्यभाववज्जला
दिमत्त्वस्वरूपविशिष्टविषयकनिश्चयविशिष्टकालीनत्वविशिष्टजलत्वद्ध्रदत्वविशिष्टविषयकनिश्चयत्वादेरपि तादृशप्रतिबंधकतावच्छे
।६१ दकत्वयोर्विशिष्टद्वयाघटितत्वनिवेशानुगमलाघवादिति चेन्न यादृशयादृशविशिष्टविषयकनिश्चयत्वविशिष्टयादृशविशिष्टविषयकत्वावच्छे
न्नप्रतिबंधकतायास्तदुदृट्कत्वात् वन्ह्यभाववज्जलत्ववन्निश्चयविशिष्टकालीनत्वविशिष्टह्रद [illegible] निश्चयत्वेनाप्रतिबंधकत[illegible]या तादृशरूपस्याप्रा
नेऽसंभवात् न च निरूप्यनिरूपकभावापन्नविषयिताघटितधर्मस्यैव प्रतिबंधकतावच्छेदकत्वपायाः यादृशविशिष्टविषयकनिश्चयविशिष्ट
यादृशविशिष्टविषयकनिश्चयत्वं न प्रतिबंधकतावच्छेदकमिति कथं तथात्वे शिरस्त्विवाच्यं यादृशविशिष्टद्वयस्य विषयितासामान्यस्य प्रतिब
धकतायां वाच्यत्वात् प्रतिबंधकतानवच्छेदकविषयिताशून्यत्वेन निश्चयद्वयस्य वा विशेषणात् तेन वन्ह्यभाववज्जलत्ववत्कालीनत्वरूपविशिष्ट
धिविषयकनिश्चयस्यापि स्मृतत्वादिति न च तथापि वन्हिमज्जलवत्कालीनह्रदो वन्हिमान् जलाभावादित्यादौ वन्ह्यभाववज्जलादिमत्त्वेनिजलत्ववद्ध्रदत्वाव
ति व्याप्तिः तत्र तदुदृट्कविशिष्टविषयितादृयस्य ज्ञानवैशिष्ट्यानवच्छिन्नायाः प्रकृतपक्षस्य पक्षतानिरूपितायाः प्रकृतपक्षधर्मिकप्रकृतहेतुमत्ताग्रहनि
रूपितायाश्च प्रतिबंधकतायाश्चावच्छेदकीभूतत्वदेवदेश विशिष्टविषयितावत्त्वेन ज्ञानवैशिष्ट्यानवच्छिन्नप्रतिबंधकतावच्छेदकावत्तित्वावि

नतेन तल्लक्षणमिति ५ श्रु ४

रहात् यादृशायादृशाद्वयस्य ज्ञानवैशिष्ट्यानवच्छिन्नप्रतिबंधकतानवच्छेदकविषयिताद्वयनिवेशेन तद्दृष्टक विशिष्टद्वयस्य यादृशायादृशाशब्दे
नैवाग्रहणात् एतेन केषांचिद् ज्ञानवैशिष्ट्यानवच्छिन्नप्रतिबंधकतानवच्छेदकविशिष्टद्वयविषयितानिवेशात् सरूदो धूमवान् वह्निवालाभा
दित्यादौ धूमाभावव्याप्यवह्निवालाभावशालीनवीवालव्यभ्रदादावतिव्याप्तिः तत्र विशिष्टद्वयविषयितायां ज्ञानवैशिष्ट्यानवच्छिन्नप्रति
न ४ बंधकतानवच्छेदकत्वाभावादिति दूषणाभिधानं सुसंगतमेव धूमवत्त्वमादाय तन्निषस्य ज्ञानवैशिष्ट्यावच्छिन्नप्रतिबंधकतासत्त्वादिति
वाच्यं आश्रयासिध्यादिरूपविशिष्टान्तरघटितत्वे नैवतत्सुदासात् नेच विशेषणे स्याद्युक्तकलीयाश्रयासिध्यादिसंग्रहाय यादृशं
विशिष्टान्तराघटितत्वं विवक्षणीयं तादृशांदर्शितसाधारणमित्तिं वाच्यं स्वविषयिताप्रयोज्यविशिष्टान्तरविषयिताप्रयोज्यता
शोभयाभावाधिकरणत्वरूपस्य वक्ष्यमाणस्यैवाघटितत्वं तात्पर्यस्य प्रतिबंधकत्वाघटित यथा तल्लक्षणेपि निवेशेनव्यभि श्रु
चारघटितबाधादिसंग्रहस्य यन्नकृता वक्ष्यमाणतया तावतैवोक्तासिद्धिसंग्रहेणान्यादृशाविशिष्टान्तराघटितत्वनिवेश
स्यानभिमतत्वात् ह्रदो वह्निमान् धूमादित्यादावपि वह्न्यभाववज्जलवद्वृत्तिजलवद्ह्रदादिरूपविशिष्टघटकवह्न्यभाववज्जलवद्ह्रदा
दिरूपविशिष्टसत्त्वेन विशिष्टद्वयाघटितत्वस्य तादृशविशिष्टान्तराघटितत्वघटितलक्षणे प्रयोजनविरहेण निवेशासंभवेन य
श्रु २ थोक्तविशिष्टान्तराघटितत्वघटितलक्षण एव विशिष्टद्वयाघटितत्वस्यातिव्याप्तिनिरासाय निवेशेन तत्र दोषविरहात् अत एव अ
न्यकृतापि निष्कर्षविशिष्टान्तराघटितत्वनिवेशमभिप्रेत्य तद्विरहेण वह्न्यभाववज्जलादिमद्वृत्तिजलवद्ह्रदादावतिव्याप्तिवार

(-श्रु २-) त्रि २ श्रु २

७५

९

ण्यत्वं तत्पश्चाद्भूमौ तत्र यथाश्रुतविशिष्टान्तराघटितत्वस्य तत्र सत्त्वेन यथाश्रुततद्घटितलक्षणस्यातिव्याप्तिरित्यस्य परिहारे येति । न वेत्यादिना तं यथाश्रुतविशिष्टान्तराघटि
तत्वे कल्प्ये आपाततः प्रसक्तातिव्याप्तिवारणाय विशिष्टद्वयाघटितत्वं निवेशितमिति दिक् । यन्तुर्णपापि कृते वह्निमान् वह्निमज्जलवत्कालीनजलाभाववद्ह्रदादिस्वादेह्रदो
वह्निमज्जलवत्कालीनजलाभाववद्ह्रदकालीनवह्निमान् धूमादित्यादेरेव स्वभाववज्जलवद्घटितत्वेनवक्रं इति पातिः ज्ञानवैशिष्ट्यानवच्छिन्नहेतुसाध्यग्रहप्रतिबंधकता
यां निरूपितविषयिताद्वयस्यावच्छेदकतया तद्विलक्षणविषयितत्वाद्विशिष्टैतत्संप्रतीतिविषयत्वसत्त्वात् तत्र देयं सर्वं ग्राह्यं तावच्छिन्ननिरूपितप्रतिबंधकता
मात्र यद्विरोधगुणवद्धदादिसग्राहकवस्तुमात्रयत्किंचित्प्रतिबंधकताघटितविशिष्टान्तराघटितत्वसत्त्वात् तो ज्ञानवैशिष्ट्यानवच्छिन्नैकप्रतिबंधकतानवच्छेदकत्वविवक्ष
णीयं तत्र स्थले वस्तु भाववज्जलवद्धिमत्कृतेजलवद्ह्रदविषयकत्वरूपावच्छेदकभेदेनैव प्रतिबंधकताभेदान्नदोषः । परं तु पुनर्ह्रदत्वं काभये न ज्ञानवैशिष्ट्यानव
च्छिन्नप्रतिबंधकतानवच्छेदकत्वविरोधिपरिस्त्रेणाव्याप्तिप्रादिविषयितासाघटकत्वमेव विशिष्टद्वयविषयितायामस्ति निवेश्यं । अत्रेदमाशंकते । स्वावच्छिन्नवि
षयितानात्पातिविषयतात्वव्यापकावच्छेदकताकतानवैशिष्ट्यानवच्छिन्नप्रतिबंधकतानतिरिक्तवृत्तिस्वावच्छिन्ननिरूपितविषयिताकोयोधर्मः तद्य
द्भिन्नविषयिताघटकत्वमेव विशिष्टद्वयविषयिता सामान्यस्वरूपसंबंधरूपप्रतिबंधकता याप्रवेशमितिसर्वसामंजस्यमिति । अत्रेदं समाधानं ॥ इदमारो
सायद्रूपावच्छिन्नविषयितान्तःपातिविषयितासामान्यं स्वरूपसंबंधरूपप्रतिबंधकतावच्छेदकमिति परिष्कृतं शक्यत्वेन विशिष्टान्तराघटितत्वैयर्थ्या
अतः उदाहरति नाभिप्रेतत्वमिति । अत्र स्वावच्छिन्नानिरूपितविषयितानवच्छिन्नज्ञानवैशिष्ट्यानवच्छिन्नप्रतिबंधकतानतिरिक्तवृत्तिस्वावच्छि
न्ननिरूपितविषयिताघटकत्वं विशिष्टद्वयविषयितायां प्रवेश्यं तावतैव निर्वाहात् आश्रयासिद्धिस्वरूपासिद्ध्यादिघटविषयिताघटकत्वा
नेशयरूपप्रयत्नं निवेश्यानीतिप्रकारान्तरं संभवति परंतु स्वावच्छिन्नानिरूपितविषयितानवच्छिन्नप्रतिबंधकतानतिरिक्तवृत्तिस्वावच्छिन्नविषयिताक
धर्मावच्छिन्नत्वस्यानिलघुत्वोवक्ष्यमाणरीत्यैव निष्कृतस्य लक्षणत्वसंभवाद्विशिष्टद्वयाघटितत्वमेव किमर्थमिति अथ तादृशाविशिष्टद्वयविष

यितायास्तादृशविशिष्टद्वयाघटितत्वरूपं यद्विशेषणं तत्कोटिप्रविष्टतादृशविशिष्टविषयितायामेव ज्ञानत्वेऽवच्छिन्नप्रतिबंधकतानवच्छेदकविषयित्वाघटितत्वमेव कुतो नोच्यते। ताव
तापि वह्निमज्जलवत्कालीनजलाभाववद्ध्रदघटितसाध्यकादेव स्वाभाववज्जलादिमद्वृत्तिजलवद्ध्रदादिवारणसंभवात्। उक्तत्वे विषयिताया एव प्रतिबंधकतानवच्छेदकत्वादिति चेन्न तथापि वह्नि
मज्जलवद्वृत्तिजलकालीनजलाभाववद्ध्रदादिघटितसाध्यादिके उक्तविशिष्टेऽतिव्याप्तेः। व्याप्यव्यापकभावानापन्नप्रतिबंधकताद्वयशून्यत्वेन विशेष्यदलप्रविष्टनिश्चयविशेषणेनोक्तदोषवार
णेपि अभावानिरूपितप्रतियोगित्वानिरूपितावच्छेदकताकालीनपर्वतो धूमवान्वह्नेरित्यादौ साध्यतावच्छेदकनिष्ठव्यभिचारेऽव्याप्तेः। तज्ज्ञानस्य विशिष्टपक्षग्रहविरोधिप्रतिबंधकताशालित्वा
दिति वर्णयंति।। तदुभयमपि गदाधरभट्टाचार्यानुयायिभिरनादरणीयमेव। विशिष्टद्वयाघटितत्वस्य यथाश्रुतविशिष्टान्तराघटितत्वपर्यवसाने व्याप्यकतयोक्तस्थले साध्यसाधनाप्रसि
द्धिघटितत्वेनैव बहुतरसंभवाद्रेकप्रतिबंधकताघविवक्षणस्याश्रयासिद्ध्यादिविषयिताघटकत्वरूपविशेषणस्य च वैयर्थ्यात्। अत्र केचित् वह्निमान् स्वाभाववज्जलवद्वृत्तिजलवद्ध्रदो नालो
भयाभावादिसाध्यकस्वरूपासिद्ध्यनात्मकेव स्वाभाववज्जलवद्वृत्तिजलवद्ध्रदमात्रेऽतिव्याप्तिः। तादृशविषयिताशून्यो भयप्रकारकासिद्धिप्रकारकमानविषयत्वादतः स्वानपदार्थेऽनाहार्य
अप्रामाण्यज्ञानानास्कंदिततादृशविषयिताद्वयशून्यत्वे सत्यव्यापकविषयिताशून्यत्वं निवेश्य पिसलं विस्तरेण। अत्र यादृशविशिष्टविषयकनिश्चयविशिष्टयादृशविशिष्ट
विषयकनिश्चयत्वं प्रतिबंधकतानतिरिक्तवृत्तितादृशविशिष्टद्वयविषयिताशून्यविशिष्टान्तरविषयिताशून्ययद्रूपावच्छिन्नविषयकनिश्चयत्वं प्रकृतानुमितिप्रतिबंध
कतानतिरिक्तवृत्तितद्रूपावच्छिन्नत्वं समुदायार्थः। अत्र वह्न्यभाववत्वविशिष्टवह्न्यभाववद्ध्रदत्वविशिष्टद्वयविषयिताद्वयादिकमादायासंभववारणाय द्वितीययादृशविशि
ष्टविषयकनिश्चयविशिष्टयादृशविशिष्टविषयकनिश्चयत्वं प्रतिबंधकतानतिरिक्तवृत्तितादृशविशिष्टमेव प्रथमयादृशविशिष्टपदेनोपादेयं प्रथमयादृशविशिष्ट
शब्देन वह्न्यभाववत्वविशिष्टस्योपादानासंभवान्न दोषः। एवमपि वह्न्यभाववद्ध्रदत्वविशिष्टत्वोभाभ्यां विशिष्टपदाभ्यामुपादानादसंभव इति तादृशविशिष्टद्वय[illegible]विषयिताद्व
यत्वावच्छिन्न[illegible]शून्यत्वं विवक्षणीयं। ह्रदोऽभावाप्रतियोगिवह्निमानित्यादौ साध्याप्रसिद्धिघटिते वह्न्यभाववद्ध्रदरूपबाधेऽव्याप्तेः वह्न्यभावकालीनपर्वतो धूमवान् प्रतियोगित्वानिरूपि
तावच्छेदकत्वकालीनवह्नेरित्यादौ साध्यतावच्छेदकनिष्ठव्यभिचारे पक्षसाधनाप्रसिद्धिघटिते चाव्याप्तिवारणाय द्वितीययादृशविशिष्टविषयकनिश्चयविशिष्टप्रथमयादृशवि
शिष्टविषयकनिश्चयत्वं प्रतिबंधकतानतिरिक्तवृत्तिप्रथमयादृशविशिष्टविषयकनिश्चयविशिष्टद्वितीययादृशविशिष्टविषयकनिश्चयत्वं तत्प्रतिबंधकतानतिरि
क्तवृत्तीति विवक्षणीयं। न चैवं तथापि वह्न्यभाववज्जलवद्विषयकनिश्चयविशिष्टजलवद्ध्रदविषयकनिश्चयत्वावच्छिन्नप्रतिबंधकत्वादन्यदेयजलवद्ध्रदविषयकनिश्चयविशि

ष्टवन्ह्यभाववद्ध्रदविषयकनिश्चयत्वावच्छिन्नप्रतिबंधकत्वमितिविशिष्टबुद्धौ घटितत्वं दुर्निर्वचमेवेति वाच्यं। प्रकृतानुमितिग्राह्ययद्रूपावच्छिन्नेयद्रूपावच्छिन्ननिरूपितप्रतिबंधकतात्वेन प्र-
तिबंधकत्वलघूपस्याप्येकत्वात् न च तथाविधैकरूपावच्छिन्नप्रतिबंधकतात्वेन निवेशे न पिवन्हिमज्जलवत्कालीनजलाभाववद्ध्रदकालीनयत्साध्यादि साध्यकादावसिद्धि
घटितत्वाद्वन्ह्यभाववज्जलवद्वृत्तिजलवद्ध्रदत्वावच्छिन्ना व्याप्तिः यथा श्रुतविशिष्टांतराघटितत्वसत्वात्।। एवं वन्हिमान् वन्ह्यभाववज्जलवद्वृत्तिजलाभावादित्यत्रा-
दौ स्वरूपासिद्ध्यादिसंग्रहश्च स्वरूपासिध्यादिघटकदलद्वयविषयितान्यत्वप्रवेशे येव नत्र्यसत्प्रतिपक्षघटकदलद्वयविषयितान्यत्रमात्वनिवेशस्ववदन्तो महाचार्य-
स्यनाभिप्रेतमिति चेन्न तस्योपलक्षणत्वात् तत्रैव वन्ह्यभाववज्जलवत्कालीनजलवद्ध्रदादिकारणानुवन्ह्यभाववज्जलवत्स्वरूपकालीनत्वविशिष्टजलवद्ध्रदस्व-
रूपविशिष्टद्वयघटितत्वादिति परस्परं यादृशविशिष्टविषयकनिश्चयविशिष्टेत्यादिपथपरिष्कारं प्रतिभः अथोक्तस्थले स्वरूपासिध्यादिसंग्रहाय प्रतिबंधक-
तायां ज्ञानवैशिष्ट्यानवच्छिन्नप्रतिबंधकत्वाव्यापकत्वमेव विशेषणं उक्तस्वरूपासिद्धिनिश्चये प्रतिबंधकतायास्तादृशप्रतिबंधकताव्यापकत्वान्न दोषः
न च तथापि यत्र घटकालीनवन्ह्यभाववज्जलादिमद्वृत्तिजलवद्ध्रदस्य स्वरूपासिद्धत्वं तत्र वन्ह्यभाववज्जलवद्वृत्तिजलवद्ध्रदेति व्याप्तिः तादृशप्रतिबंधकता-
याः ज्ञानवैशिष्ट्यानवच्छिन्नप्रतिबंधकताव्यापकत्वादिति वाच्यं। ज्ञानवैशिष्ट्यानवच्छिन्नप्रतिबंध्यकताश्रयस्य स्वावच्छिन्नविषयिताशालिनिश्चयवृत्तिमादृशविशिष्टविषयकनिश्चयविशिष्टयाद-
शविशिष्टविषयकनिश्चयत्वं प्रकृतानुमितिप्रतिबंधकतानतिरिक्तवृत्तितादृशविशिष्टद्वयघटितत्वपर्याप्तावच्छेदकतावच्छिन्नभिन्नत्वस्य विवक्षितत्वात् न च तथापि तदवच्छिन्नभिन्नत्वं तत्पर्याप्त्यवच्छे-
दकताकविषयिताशून्यप्रतीतिविषयत्वं विवक्षणीयं अन्यथा घटकालीनवन्ह्यभाववज्जलादिमद्वृत्तिजलवद्ध्रदे व्याप्तिः तादृशाधस्य तस्याभाववज्जलादिमद्वृत्तिजलवद्ध्रदत्वं तत्त्वावच्छिन्नान्यत्वस्य
तत्राभावात् तथा च तादृशविशिष्टद्वयघटितत्वपर्याप्तावच्छेदकताकविषयिताशून्यघटकालीनवन्ह्यभाववज्जलवद्वृत्तिजलवत्त्वादौ दृष्टसाकारकप्रतीतिविषयत्वस्य वन्ह्यभावव-
ज्जलादिमद्वृत्तिजलवद्ध्रदे सत्वादति व्याप्तिर्दुर्वारैवेति वाच्यं। तादृशप्रतीतिविषयतावच्छेदकतापर्याप्त्यवच्छेदकं यद्रूपं प्रतिबंधकतानतिरिक्तवृत्तिविषयितानिरूपकतावच्छेदकं तदवच्छि-
न्नत्वस्योक्तत्वात् एतेनोक्तासंभववारणाय ज्ञानवैशिष्ट्यावच्छिन्नप्रतिबंधकतानिवेशे हृदो धूमाभावव्याप्यशैवालाभाववान् धूमादित्यादौ हेत्वसाध्यासाध्यत्वाव्याप्तिः ज्ञानवैशिष्ट्यानवच्छि-
न्नप्रतिबंधकत्वाव्यापकत्वस्य तद्घटकप्रतिबंधकताविशेषणत्वे तत्रैव धूमाभावव्याप्यशैवालकालीनशैवालवद्ध्रदहेतौ सर्वत्र व्याप्तिरिति समाहितमिति चेत् ज्ञानवैशिष्ट्यानवच्छि-
न्नप्रतिबंधकतानवच्छेदकत्वस्य विशिष्टद्वयविषयिताविशेषणत्वे तु वास्त्याविष्टमनान् शैवालाभावादित्यादौ धूमाभावव्याप्यशैवालकालीनशैवालवद्ध्रदो दातत्रि व्याप्तिप्रसक्तत्वात्। विशेष-

गुणवद्वृत्त्यादिसंग्राहकयत्किंचित्प्रतिबंधकताघटितविशिष्टांतरघटितत्वस्यत्वादिति। अत्र ब्रूमः। स्वावच्छिन्नविषयकत्वव्यापकीभूतविषयिताशून्ययद्रूपावच्छिन्नविषयताशालिज्ञानं
यादृशविशिष्टविषयकनिश्चयविशिष्टयादृशविशिष्टविषयकनिश्चयत्वं प्रतिबंधकतानतिरिक्तत्वे ति ज्ञानवैशिष्ट्यानवच्छिन्नप्रतिबंधकतानवच्छेदकीभूततादृशविशिष्टद्वयविषयताशून्यत्वमेव
तित्तद्रूपावच्छिन्नत्वं विशिष्टद्वयाघटितत्वं अत्र ह्रदो वन्ह्यभाववान् वन्ह्यभाववज्जलादिमद्वृत्तिजलवांश्चेति ज्ञानमादायासंभव इति तादृशज्ञानत्वसामानाधिकरण्येन तादृशशून्यत्वं
एवं च ह्रदो वन्हिमान् तादृशस्यैवालोभयथाभावादिसत्त्रतादृशजलवद्ध्रद इति आपि। तादृशजलस्यैवालोभयथान्न ह्रद इति ज्ञानेन तादृशविषयताद्वयशून्यत्वादतः स्वावच्छिन्नविषयकत्वं।
विषयताशून्यत्वं ज्ञानविशेषणं यत्र घटकालीनवन्ह्यभाववज्जलादिमद्वृत्तिजलवद्ध्रदः स्वरूपासिद्धिः तत्र विशिष्टद्वयविषयिताज्ञानवैशिष्ट्यावच्छिन्नविषयकत्वाव्यापकीभूत
स्वशून्यत्वांतविशेषणासत्त्वेन वन्हेः अणसमन्वयः वन्ह्यभाववज्जलादिमद्वृत्तिजलवद्ध्रद इति व्याप्तिवारणात्। एवं ह्रदो वन्हिमान् वन्हिमज्जलवद्वृत्तिजलाभावादिसाध्यं
द्वृत्तिजलवद्ध्रदे वन्ह्यभाववज्जलवद्विषयित्वं जलवद्ध्रदविषयित्वयोर्ज्ञानवैशिष्ट्यानवच्छिन्नप्रतिबंधकतानवच्छेदकतया इति व्याप्तिरतः सजातीयप्रतिबंधकताद्वयशून्यत्वेन यद्रूपावच्छिन्नविषयिता
ताशालिज्ञानविशेषणीयं वन्ह्यभाववज्जलादिमद्वृत्तिजलवद्ध्रदाले केस्वरूपासिद्धौ तन्निश्चयस्य प्रतिबंधकताद्वयशालितयाऽव्याप्तिः अतः साजात्यं निवेशः। साजात्यं च ज्ञानवैशिष्ट्यावच्छिन्नप्रति
बंधकतात्वेन वच्छिन्नप्रतिबंधकतात्वेन रूपेणेति प्रतिभाति। वस्तुतस्तु यादृशविशिष्टविषयकनिश्चयविशिष्टयादृशविशिष्टविषयकनिश्चयत्वं स्वविषयकत्वावच्छिन्नयत्किंचित्प्रति
बंधकतानिरूपितप्रतिबध्यतानवच्छेदकीभूतामापकारताद नवच्छिन्नप्रतिबध्यतानिरूपितज्ञानवैशिष्ट्यावच्छिन्नप्रतिबंधकतानतिरिक्तत्वं तादृशविशिष्टद्वयाघटितत्वमेव समुदितार्थः।
स्वपददेयत्वेनाभिमतविशिष्टपरामर्शकत्वे वन्ह्यभाववज्जलादिमद्वृत्तिजलादिमद्ध्रदविषयकत्वावच्छिन्नो। अपासिद्धिज्ञानीयप्रतिबंधकतानिरूपितप्रतिबध्यतायामनवच्छेदकविषयता
वच्छिन्नत्वाद्वन्ह्यभाववज्जलवद्वृत्तिजलवद्ध्रदविषयकनिश्चयीयज्ञानवैशिष्ट्यावच्छिन्नप्रतिबंधकतानिरूपितप्रतिबध्यतायामस्तु कोव्याप्यनेककारः यत्किंचित्त्वानुपादाने तथाविधा
अपासिद्धिज्ञानीयज्ञानवैशिष्ट्यावच्छिन्नप्रतिबंधकतायामपि धर्तुं शक्यत्वेन तादृशप्रकारत्वानवच्छिन्नप्रतिबध्यतीयज्ञानवैशिष्ट्यावच्छिन्नप्रतिबंधकत्वमादायाव्याप्तिरतस्तदुपादानं। नचैवम
साधारण्यासंग्रहः वन्ह्यभाववद्ध्रदवान्हेतुरिति ज्ञानीयहेतुविषयकत्वावच्छिन्ननिरूपितप्रतिबध्यतानवच्छेदकप्रकारत्वावच्छिन्नत्वमादायपक्षेपवारणाय स्वविषयिताव्यापकत्वस्याव्यापक
त्वादिति वाच्यं यत्किंचित्प्रतिबंधकत्वेन ज्ञानवैशिष्ट्यावच्छिन्नत्वे स्वविषयिताव्यापकसामयाभाववत्प्रतिबंधकतानिवेशस्याभिप्रेतत्वात्। अत्र ह्रदो वन्हिमान् वन्हिमज्जलवद्वृत्तिजलाभावादित्यादौ
वन्ह्यभाववज्जलादिमद्वृत्तिजलवद्ध्रद इति व्याप्तिवारणाय स्यां। पाषाणमयपर्वतवारणायावि निवेशः प्रदत्तः। अथवा यादृशविशिष्टविषयकनिश्चयविशिष्टयादृशविशिष्टविषयकनिश्चये
यत्वं स्वविषयकत्वावच्छिन्नयत्किंचित्प्रतिबंधकतानवच्छेदकविषयितानवच्छिन्नज्ञानवैशिष्ट्यावच्छिन्नप्रतिबंधकतानतिरिक्तत्वं तादृशविशिष्टद्वयघटितं यत्तदन्यत्वं समुदितार्थ इत्यतो।

(९९)

४० नासंभवः वन्ह्यभाववज्जलादिमद्वृत्तिजलादिमद्वृत्तिजलादिमद्ध्रदादिरूपाश्रयासिद्धिस्थले स्वविषयकत्वावच्छिन्नं यदाश्रयासिध्यादिज्ञाननिष्ठं प्रतिबंधकत्वं तदनवच्छेदकीभूतं वन्ह्यभाव
वज्जलत्वकालीनजलवद्ध्रदादिविषयित्वं तदवच्छिन्नमेव ज्ञानवैशिष्ट्यावच्छिन्नप्रतिबंधकत्वमतः तद्घटितान्यत्वं सुलभं यत्किंचिल्लोपादानं पूर्ववत् अथवा यथेयादृशविशिष्टविषयकनिश्च
यविशिष्टयादृशविशिष्टविषयकनिश्चयत्वं प्रकृतानुमितिप्रतिबंधकतानतिरिक्तवृत्तितादृशद्वयाघटितत्वमिति यथाश्रुतेऽसंभवः ह्रदो वह्निमान् धूमादित्यादौ वह्नित्वविशिष्टनिश्चयावि
वे शिष्टवन्ह्यभाववद्ध्रदत्वादिविशिष्टविषयकनिश्चयत्वस्याप्यनुमितिप्रतिबंधकतानतिरिक्तवृत्तितातादृशप्रतिबंधकताविशिष्टद्वयाघटितत्वस्य वन्ह्यभाववद्ध्रदत्वाभावात् न च चरमया
